श्रीलविकुलकेविन्दुजाण राजप्रणीतः

नाट्रदर्शीसङ्ग्रहः ।

कल्पलतिका भिख्यास्वीपरटीकयीपबृंहितः ।

सम्पादक :
डा० दीर्घराज घिमिरे

श्रीकविकुलकैरविन्दुजाण राजप्रणीतः

षड्दर्शनीसङ्ग्रहः ।

कल्पलतिका-भिधयास्वोपज्ञटीकयोपबृंहितः ।

सम्पादक :
डा० दीर्घराज घिमिरे

सूचिः

मूलविषयाणाम्

			पृष्ठम्
१-	प्रास्ताविकम्	-	१ - ४९
२-	विषयसूचिः	-	१ - ६
३-	सङ्केतसूचिः	-	७ - ८
४-	कल्पलतिकाभिधयास्वोपज्ञटीकयोपबृंहितः षड्दर्शनीसङ्ग्रहः ।		१--१३५
५-	परिशिष्टम्	-	१३६-१५२

----000---

प्रास्ताविकम्

तत्रभवतां दर्शनशास्त्रकान्तारे विचरणशीलानां विद्वत्केसरिणां नास्ति ज्ञानागोचरीभूतं तत्तद्दर्शनरहस्यमिति न तेषां बोधायायं प्रयत्नः, सन्ति चाधिकारिणः स्वल्पायासेन स्वस्य दार्शनिकत्व-तदनुरोधिविवेचनकौशल-तत्प्रयुक्ताध्ययनविध्यनुष्ठानत्वादिवैशिष्ट्यसम्पादनं भवत्यपेक्षितम्, तत एव श्रेयोमार्गस्य कण्टकवृत्त्यपसरणं नान्यथेति धिषणाः । तेषामध्ययनसौकर्याय वैदिकदर्शनानां संक्षेपेण साङ्ग्राहकस्यास्य ग्रन्थस्य प्रकाशनमुपयुक्ततमं सामाजिकदृष्ट्येति धिया तत्सम्पादने प्रवृत्तोऽहम् । दार्शनिकभाषानिबद्धतयातिकूटेयं षट्प्रकरणीत्यत्र प्रवेशाय तत्तच्छास्त्रगतविषयाणामवबोधोऽवश्यमपेक्षितः । मतिमतामपि दुरवगाहो विषयवारिधिरिति शास्त्रपरिशीलिनां विपश्चितामनुभवः किमुत दर्शनशास्त्रपरिचयरहितानाम् । अतस्तत्तच्छास्त्राणामन्वर्थत्वविषयपरिचययोः प्रदर्शनमध्ययनसौविध्यनिबन्धनं ग्रन्थस्यगौरवाभिव्यञ्जकञ्चसमीक्षणमिति यथायथं प्रस्तुतिः ।

दर्शनशब्दार्थः

तत्तद्दर्शनगतविषयविवेचनतोऽभ्यर्हितं दर्शनस्य दर्शनत्वमिति तदेव किञ्चिद् विचारयामः । 'दर्शनम्' इति शब्दो दृशिर् प्रेक्षणे इति धातुतः करणे ल्युट्प्रत्ययेन सम्पन्नः । अत्र प्रेक्षणकर्म्मता आत्मनिष्ठा, क्रियाजन्यफलभागित्वस्य कर्मत्वस्वीकारात् । करणानि इन्द्रियाणि मनसोऽपि तत्रान्तर्भावः । आत्मविषयकवृत्तिसम्पादनं शास्त्राध्ययनस्यावान्तरं प्रयोजनम्, तद्विना आत्मविषयकनिश्चयस्यैवानुत्पत्तेः । आत्मविषयकवृत्त्युत्पादनेन तत्र वृत्तेः स्थिरीकरणादिना आत्मज्ञानमेव परमं प्रयोजनं शास्त्राध्ययनस्य । कतमत्तच्छास्त्रमिति जिज्ञासा भवति स्वभावतो जिज्ञासूनाम्, नैव सा जिज्ञासा अपार्था, यतः प्रत्यक्षेण परीक्षादिना वा प्रतिदिनं परिदृश्यमानस्योपचयापचयरूपस्य संसारस्यास्थिरता तत्र पापच्यमानस्य प्राणिनिवहस्य दुःखानुभूतिः, अतस्तत्रानभिष्वङ्गेनैव श्रेयःप्राप्तिरिति निश्चितधियः संसारविरक्तस्य विशुद्धान्तःकरणस्य श्रद्धावतः पुरुषस्योद्भवति तादृशदुःखनिवृत्तिसाधनविषयिणी जिज्ञासा । तथाविधजिज्ञासानिवर्तकत्वेनात्मज्ञानप्रतिपादकं दर्शनशास्त्रम्, अतस्तस्यात्मज्ञानसाधनकोटिनिविष्टत्वेन करणत्वम् । एवं मुक्तिं प्रति प्रयोजकतालाभः

शास्त्रस्य, तथाच तथाविध शास्त्रस्य दर्शनत्वं निराबाधमेव । भावसाधनपरत्वे तु तस्य प्रकृत्यर्थातिरिक्तत्वाभावेन ज्ञानपरमेव, अत्र तु करणार्थकत्वमेव साधु, सन्तिच तदुपोद्बलकानि श्रुतिस्मृतिवाक्यानि -

श्रुतिस्तावत् - "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्या-
सितव्यः [१] " इत्यादिः । स्मृतिरपि -

"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः ।
मत्वा च सततं ध्येय एते दर्शनहेतवः [२] ।। "

"आगमेनानुमानेन ध्यानाभ्यासरसेन च
त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् [३] । "

"अयं तु परमो धर्मो यद्योगेनात्मदर्शनम् [४] । " इत्यादिः ।

दर्शनानां संख्या

दर्शनानि द्वादशविधानि, तत्र षण्नास्तिकदर्शनानि, माध्यमिक-योगाचारवैभाषिकसौत्रान्तिकभेदेन बौद्धदर्शनं चतुर्विधम्, एकमार्हतदर्शनमपरञ्चचार्वाकदर्शनमित्याहत्य षट्त्वं प्रपूर्ते नास्तिकदर्शनगतायाः संख्यायाः । एतेषां विवेचनं यथावसरमुद्दिष्टमन्यत्र, प्रकृतग्रन्थानन्तर्गतत्वेनात्र तेषामविविच्यत्वम् । आस्तिकदर्शनमपि युगलत्रयम्, न्यायवैशेषिकमेकं सांख्ययोग अपरं

---

१ बृ.उ. ४।५ ।

२ पदार्थादर्शः ।

३ कुसुमाञ्जलि अवतरणम् ।

४ या.स्मृतिः १।८ ।

पूर्वोत्तरमीमांसाचान्यतू, एषां सम्मेलेन षड्दर्शनानि, तथाच दर्शनानां द्वादशसंख्यासंख्येयत्वं सिद्धम् ।

आस्तिकनास्तिकत्वयोर्हेतुः

वेदत्वावच्छेदेन वेदप्रामाण्याभ्युपगन्तृत्वानभिगन्तृत्वे एवास्तिकनास्तिकत्वयोः प्रयोजके, वेदत्वसामानाधिकरण्येनप्रामाण्याभ्युपगन्तृत्वाभिधाने तु तथात्वस्य बौद्धादितन्त्रेष्वपिसत्त्वात्, तत्राप्यात्मविचारस्यैव तत्त्वादिति। नन्वेवमपि कथमास्तिकेषु गणनं वैशेषिकादिषण्णामेवदर्शनानामन्येषां वैष्णवशैवशाक्तपाशुपतादिदर्शनानामपि सत्त्वादितिचेन्न अवच्छेदकावच्छेदनप्रामाण्याभ्युपगन्तृत्वानभ्युपगन्तृत्वादिनिबन्धन एवास्तिकनास्तिकत्वयोर्मूलमिति हि प्रतिपादितत्वात् एवं हि पञ्चरात्रादिवेदमूलकदर्शनानां सत्त्वेऽपि तेषां प्रोक्तेष्वन्तर्भावविवक्षयाऽऽस्तिकदर्शनानां षट्त्वमिति न न्यूनत्वम् । तथाच त्रिविध एव प्रस्थानभेदो यथा-

१. आरम्भवादः -

स हि असदेवकार्यंकारणव्यापारादुत्पद्यते इति तार्किकाणां पूर्वमीमांसकानाञ्च पक्षः । पार्थिवाप्यतैजसवायवीयाश्चतुर्विधाः परमाणवो द्व्यणुकादिक्रमेण ब्रह्माण्डान्तं जगदारभन्त इति तेषां सिद्धान्तः ।

२. परिणामवादः -

सदेव कार्यं कारणव्यापारेणाभिव्यज्यते नतूत्पद्यत इति पक्षः सांख्ययोगवैष्णवपाशुपतानाम् । सत्त्वरजस्तमोगुणात्मिकाप्रकृतिरेव महत्तत्त्वादिक्रमेण जगदाकारेण परिणमत इति तेषां सिद्धान्तः ।

३. विवर्तवादः -

स्वमायावशान्मिथ्यैव जडाकारेण कल्प्यते, ब्रम्ह तु स्वप्रकाशपरमानन्दाद्वितीयं वस्तु तज्ज्ञानान्मिथ्याज्ञाननिवृत्त्या मोक्ष इति हि तेषां सिद्धान्तः[1]।

एवंविधया प्रक्रियया सर्वेषां प्रस्थानानां यथायथमुक्तप्रस्थानत्रयेऽन्तर्भावविवक्षयैव षण्णामेवास्तिकदर्शनानामत्र निरूपणम्, प्राधान्यात्, अन्येषामप्रधानत्वादेतन्निरूपणेन तेषामपि निरूपितत्वमवगन्तव्यम् । एवं निरूपणक्रमप्राप्तम् -

वैशेषिकदर्शनम्

एतस्य दर्शनस्य प्रतिपाद्याः पदार्थाः षट् सप्त वा, द्रव्यगुणकर्मसामान्यविशेषसमवायाः, सप्तमत्वेऽधिकसंख्याऽभावस्य ।

तत्र द्रव्याणि -

एवं हि द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नव।

पृथिवी - सर्वेषां प्राणिनामाधारभूता मृदादिवस्तुत्वेन प्रत्यभिज्ञायमाना गन्धवत्त्वसमानाधिकरणजातिमती । एवमन्येषां गुणानां स्पर्शादीनामप्याधारत्वप्रयोजिका, पार्थिवशरीराद्युपादानभूता । सा हि नित्यानित्यभेदेन द्विविधा, परमाणुस्वरूपा नित्या तदन्या सर्वाप्यनित्या ब्रम्हाण्डान्ता, सृज्यमानप्राणिकर्मभोगोपकरणत्वेनेश्वरेच्छावशाद्द्व्यणुकादिक्रमेण सृज्यमाना प्रलयान्तावस्थास्थायिनी ।

---

१ महिम्नस्तोत्रमधुसूदनीटीका श्लो. ७ ।

आपः - चूर्णादिपिण्डीभावहेतुः स्नेहस्य रसस्य च समवायिकारण-
भूताः जलीयशरीरोपादानभूता हि आपः, अन्यत् सर्वं
पृथिवीवत् ।

तेजः - उष्णस्पर्शवद्वृत्तिद्रव्यत्वजातिमान्, सोऽपि पृथिवीवद्द्विविधः,
परन्त्वत्रविशेषोविषये - भौमदिव्योदर्याकरजभेदात्,
ज्वलनेन्धनसंयोगेनदीप्यमानो भौमो वह्न्यादिः ।दिवि-
अन्तरिक्षेभवं 'दिव्यम्' अविन्धनसौरविद्युदादिकम् ।
उदर्यं - प्रतिप्राण्युदरवर्त्युष्माविशेषः, येन हि प्राणिभि-
र्भुक्तमन्नं जीर्यति, रसरक्तमांसादिक्रमेणायुर्वेदिकपद्धत्या
शरीरपुष्टिर्भोगादिकञ्च जायते । आकरजस्य सुवर्णादेस्तै-
जसत्वञ्चानुच्छिद्यमानजन्यद्रवत्वाधिकरणत्वेन, तद्द्रवत्वं
हि अनेकधाऽत्यन्ताग्निसंयोगेऽपि न न्यूनीभवति नापि
विकृतिं याति, अतस्तस्य पार्थिवत्वादिबाधात् तेजस्त्वम्,
अन्यत् पृथिवीवत् ।

वायुः - सर्वप्राणिसूत्रभूतोऽयं पृथिवीवद्द्विविधः, शब्दस्पर्शधृतिकम्पा-
नुमेयः, रूपाद्यभावेनाप्रत्यक्षः इहलोकपरलोकादिगमनागमनस-
म्पादकः प्राणापानाद्यन्वर्थसंज्ञया सर्वशरीरान्तर्वर्ती, एकस्यापि
तस्य कार्यकृतोपाधिनिबन्धना प्राणादिसंज्ञा, अन्यत् पूर्ववत्।

आकाशः - आ-समन्तात्काशते अवकाशप्रदानेनेत्याकाशः, स च नित्यः
शब्दाश्रयत्वेन तस्य सिद्धिः, यथा- अत्र पक्षतावच्छेदकविशि-
ष्टपक्षस्य पूर्वमसिद्ध्या नात्र प्रयुज्यतेऽनुमानम्, अतः परिशेषा-
नुमानाश्रयेणैवायं साधनीयः । चक्षुर्ग्रहणायोग्यत्वादिहेतुना

शब्दस्य सामान्यातिरिक्तगुणत्वं संसाध्य तस्य तेनैव हेतुना बहिरिन्द्रियग्राह्यत्वं तेन च विशेषगुणत्वं संसाधनीयम् [1]। ततश्च"आत्मानो भूतवर्गाश्च विशेषगुणयोगिनः"[2] इत्यभियुक्तोक्तिं पुरस्कृत्य शब्दाश्रयत्वेन आकाशः साधनीयः परिशेषानुमानेन, तच्च स्फुटं प्रकृतग्रन्थ इति न पुनः पिष्टपेषणम् ।

कालः - परापरव्यवहारहेतुः, परत्वमपरत्वञ्च कालापेक्षया भवति- लक्ष्मणापेक्षयाऽधिकसूर्यपरिस्पन्दी रामशरीर इति तस्य लक्ष्मणापेक्षया परत्वाज्ज्येष्ठत्वम्, एवं रामापेक्षया न्यूनपरिस्पन्दः सूर्यस्येति रामापेक्षया लक्ष्मणस्यापरत्वात्कनिष्ठत्वम्, इत्यादि व्यवहारस्य य आधारः सः कालः ।क्षण-लव- निमेष - काष्ठा - कला- मुहूर्त- यामा- होरात्रार्धमास- मास -ऋतु- अयन- सम्वत्सर- युग- कल्प- मन्वन्तर-प्रलय- महाप्रलयव्यवहाराणां कारणम् । अस्याखण्डस्यैकत्वेऽपि विभिन्नोपाधिवशादनेकत्वव्यपदेश इति स्फुटं मूले, विस्तृतं ग्रन्थतोऽवगन्तव्यम् ।

दिक् - कालवद् दिगपि परापरव्यवहारहेतुः, यथा कलिकातामपेक्ष्य पाटलिपुत्रस्यापरत्वं पाटलिपुत्रापेक्षया च कलिकातायाः परत्वम् । देशिकं परत्वमपरत्वञ्च यत्किञ्चिद्देशमधिकृत्य व्यवह्रियते । सापि - एका व्यापिका, सत्यप्येकत्वे

---

१ पदार्थधर्मसंग्रहे तट्टीकायां व्योमवत्यां मुक्तावल्यादौ च ।

२ कारिकावली प्र.स. २६ ।

उपाधिभेदात्प्राचीप्रतीचिअवाच्युदीच्यादिव्यवहार उपाधि-जन्यः । एतस्या उपाधिविस्तारो मुक्तावल्यामिश्चेति नेह तन्यते ।

प्रासङ्गिकं किञ्चिदिव विचारणीयतामर्हति विषय-परिचयसन्दर्भे - परत्वमपरत्वञ्च द्विविधं भवति कालकृतं-देशकृतञ्च, तच्च विशेषणतारूपम्, कालकृतस्य तस्य कालिक-विशेषणता देशकृतस्य दैशिकविशेषणतेत्यभिधीयते, तद्द्वि-विधमपेक्षाबुद्धिविशेषणम्, यतो विनापेक्षां तादृशी बुद्धिर्न नोदेति । कालिकविशेषणतया यावत्पदार्थं जन्यमात्रे महाकाले च वृत्तिमन्तः 'नित्येषु कालिकायोगात्' इति प्रवादान्नित्येषु तेन सम्बन्धेन वृत्तित्वं नाङ्गीक्रियते। अस्ति च कश्चिन्मतभेदस्तत्रापि । दैशिकविशेषणतापि प्रतियोग्यनुयोगिभावनियामकः स्वरूपसम्बन्धविशेषः, तत्वञ्च, कालिकविशेषणताया अपि समानमित्यलं शास्त्रार्थप्रक्रियया, विशेषजिज्ञासुभिर्द्रष्टव्यमाकरेषु ।

आत्मा - ज्ञानाधिकरणत्वेनात्मनः परिचयो यत्र तत्र ग्रन्थेषु विहितः। आत्मत्वस्य जातित्वेन तद्वत्त्वस्यापि लक्षणत्वमभिमतम्। स हि जीवात्मपरमात्मभेदेन द्विविधः, तत्र परमात्मा ईश्वरपदवाच्य एको व्यापकः कार्यसामान्यप्रति साधारण-कारणीभूतः । जीवात्माप्रतिशरीरं भिन्नो विभुर्नित्यश्च। तत्र परमात्मा अनुमानेन शब्देश्च ज्ञायते, जीवात्मा तु परशरीरादावनुमानेन ज्ञायते, स्वात्मज्ञाने प्रत्यक्षेणानुमाना-

दिना वा भवतीति विभेदः । आत्मविषयक विचाराणा
मुपलब्धिस्तदाकरग्रन्थेष्विति नात्र विचार्यते ऽधिकम् ।

मनः - मनस्त्वाभिसम्बन्धान्मन इति पदार्थधर्मसङ्ग्रहवचनान्मनस्त्वं जातिरेव, तथाच तद्वत्त्वं मनसोलक्षणं युक्तम् ।प्रत्यात्ममेकं मन आवश्यकमिति आत्मवन्मनसोपि नानात्वं, सत्यपि विषयेन्द्रियसन्निकर्षे मनसो व्यापाराभावे ज्ञानोत्पत्तेरभावात्स्यान्तःकरणत्वं नित्यत्वमणुपरिमाणवत्त्वञ्चेति द्रव्यम् ।

अथगुणाः-

'रूपरसगन्धस्पर्शाः संख्याः परिमाणानि पृथक्त्वं संयोगविभागौ परत्वापरत्वे बुद्धयः सुखदुःखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः[१]' इति कणादसूत्रे कण्ठत उक्ताः सप्तदश 'च' शब्दसमुच्चिताश्च गुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाः सप्त इत्याहत्य चतुर्विंशतिसंख्याकागुणा द्रव्यमात्रे वर्तन्ते, परं सर्वगुणानां नास्ति द्रव्यमात्रवृत्तिता, केषाञ्चिदेवास्ति तथात्वमिति सर्वमेव ग्रन्थे व्यक्तं भविष्यति ।

रूपम् - चक्षुरिन्द्रियमात्रग्राह्यगुणविशेषो रूपम्, पृथिवीजलतेजोवृत्तिः, शुक्लनीलरक्तपीतहरितकपिशचित्रभेदात् सप्तविधं रूपं पृथिव्यां, जलेऽभास्वरशुक्लं तेजसि च भास्वरशुक्लमिति।

रसः - रसनेन्द्रियग्राह्योगुणविशेषो रसः सोपि मधुराम्ललवणकटुकषायतिक्तभेदात् षड्विधः पृथिव्यामेव, जले मधुर एव।

---

१ कणादसूत्रम् १।१।६ ।

गन्धः - घ्राणजप्रत्यक्षयोग्यजातिमान् गुणो गन्धः स च पृथिवीमात्रवृत्तिः ।

स्पर्शः - त्वगिन्द्रियमात्रवृत्तिगुणः स्पर्शः, पृथिवीजलतेजोवायुवृत्तिः उष्णशीतानुष्णाशीतभेदात्त्रिविधः, उष्णस्तेजसि, शीतो जले अनुष्णाशीतः पृथिवीवाय्वोः । इत्थं रूपरसगन्धस्पर्शानां गुणानां नित्यानित्यभेदेन द्वैविध्यम् । गन्धस्य त्वनित्यत्वमात्रं, पृथिवीमात्रवृत्तित्वात्, यतः पृथिव्यां पाको न तु जलादौ, तत्र हि पाकेन रूपरसगन्धस्पर्शाः परिवर्तन्ते, यथा कश्चिदाम्रफलेऽनुभूता रूपरसगन्धस्पर्शाः पाकोत्तरदशायां नानुभूयन्ते तत्र, अनुभूयन्ते तु हरितपीताम्लमधुरसदनुकूलगन्धकठिनमृदु च रूपरसगन्धस्पर्शाः । सः परिणाम अवयवपरिणामानुसारीति प्रतियन्ति लौकिका अपीति किमु विवेकिनः । अत एव पृथिवीपरमाणुवृत्तयोऽपि रूपरसगन्धस्पर्शा अनित्या एव, तत्र पाकेन रूपादीनामन्यथात्वस्यानुमानेनैव सिद्धत्वात्, एष एव न्यायः पार्थिवद्रव्येषु सर्वत्र योज्यः ।

न्यायवैशेषिकयोर्भेदः पाकप्रक्रियायाम्, परमाणुद्व्यणुकादिक्रमेण महावयवी अन्त्यावयवी वा पच्यत इति वैशेषिकराद्धान्तः । न्यायसिद्धान्तस्तु अवयविनो सच्छिद्रत्वात् तेजसश्चाणुमार्गगामित्वाद् घटादीनामन्तः पाकः संभवत्येव, अतः परमाणुक्रमेण पाकस्वीकारो व्यर्थ इति केवलं सामान्यपरिचयः विशेषोऽन्यत्र ग्रन्थे ।

संख्या - एकत्वद्वित्वादिव्यवहारहेतुः संख्या, एकत्वादिपरार्धान्ता, एकत्वसंख्या हि नित्यगतानित्या अनित्यगता अनित्या द्वित्वादिकास्तु संख्याः सर्वा अपि अपेक्षाबुद्धिजन्यत्वेनानित्या एव । यथाहि - 'इमौ द्वौ' 'इमे त्रयः' इत्यादिकाबुद्धिर्द्वित्रीत्पत्तौ, द्वित्वघटकयोस्त्रित्वघटकेषु च प्रत्येकमेकत्वमपरिहार्यम्, अन्यथा प्रत्येकसमूहस्य द्वित्वत्रित्वादि बुद्ध्युत्पादकत्वं व्याहन्येत, अतएवेयमपेक्षाबुद्धिपदेन व्यवह्रियते, अयमेक अयमेक इत्यादि प्रत्येकत्वमपेक्ष्यैव द्वित्वबुद्ध्युत्पत्तेरनुभवसिद्धत्वात्, एवं त्रित्वादिकमपि, अपेक्षाबुद्धिनाशात्तासां नाश इति ।

परिमाणम् - मानव्यवहारस्यासाधारणंकारणं परिमाणम् । तत् चतुर्विधम्, अणु महत् ह्रस्वं दीर्घं च । अणुपरिमाणं परमाणुमनसाम्, परममहत्परिमाणं कालाकाशात्मदिशाम्, एतदुभयं नित्यमेव । अपकृष्टमहत्परिमाणं त्वाश्रयनित्यानित्यत्वाधीनम्, द्व्यणुकादिगतमणुपरिमाणमपि तथैव ।

ह्रस्वं दीर्घं च पञ्चहस्तपरिमितापेक्षया त्रिहस्तपरिमितस्य ह्रस्वत्वं तदपेक्षया च पञ्चहस्तपरिमितस्य दीर्घत्वमिदं स्थलान्तरेऽप्यूह्यम् ।

अनित्यस्यास्योत्पत्तिस्त्रिधा सम्पद्यते -

१. अवयवपरिमाणात्
२. अवयवसंख्यायाः
३. प्रचयाच्च

आद्यं यथा- कपालद्वयपरिमाणतुल्यं घटपरिमाणम् । द्वितीयं कपालद्वयसंयोगजन्यघटपरिमाणापेक्षया कपालत्रय-संयोगजन्यघटस्य परिमाणाधिक्यमिति संख्या परिमाण-स्योत्पादिका ।

तृतीय - प्रचयो नाम शिथिलाख्यः संयोगः, यदा संयोगे शैथिल्यं तदा परिमाणावृद्धिरवश्यं भाविनी, यथा-तूलपरिमाणे सुवर्णपरिमाणे च । अवयवसंयोगनाशादवयवना-शादाश्रयनाशाद्वास्य नाशः ।

पृथक्त्वम् - पृथक्त्वव्यवहारासाधारणंकारणं पृथक्त्वम् । 'अयमस्मा-त्पृथक्' इति प्रतीतिविषयम् । नाचास्यान्योन्याभावेन गतार्थता, तत्र हि घटपटभेदो प्रतीयते घटस्य पटाभावा-धिकरणत्वेन, सा च प्रतीतिर्घटः पटो न भवतीतिवाक्य-जन्या, पृथक्त्वन्तु घटात् पटः पृथगित्येवंविधम्, अतोऽन्यो-न्याभावपृथक्त्वयोर्नसमानविषयत्वम् ।

संयोगः - पृथग्भूतयोर्याप्राप्तिः सा संयोगः, स च त्रिविधः अन्यतर-कर्मजः उभयकर्मजः संयोगजश्च । अद्यः श्येनकर्मणा वृक्षश्येन-संयोगः । द्वितीयो मल्लयोर्मेषयोर्वासंयोगः ।तृतीयस्तु हस्तघटसंयोगाच्छरीरघटसंयोग इति । शब्दाहेतुशब्दहेतुभेदेन पुनर्द्विविधः, यस्माच्छब्दोत्पत्तिर्नास्ति सो नोदनाख्यः संयोगः । शब्दोत्पादकस्तुसंयोग अभिघाताख्य इति, बहुधा प्रपञ्चितो-ऽयमाकरेषु तत्सम्बद्धनिबन्धेष्विति संक्षेपः ।

विभागः - विभक्तप्रत्ययासाधारणंकारणं विभागः । सोऽपि संयोगवद् द्विविधः, प्रथमद्वितीययोरुदाहरणं संयोगवत् । विभागजविभागस्तु द्विविधः, कारणमात्रविभागजन्यः कारणाकारणविभागजन्यश्च, संयोगनाशेनास्यान्यथासिद्धत्वं नास्ति, अन्यथा कारणाकारणविभागप्रतीत्यसंभवादिति व्यक्तमाकरणे ।

परत्वापरत्वे - परापरव्यवहारस्यासाधारणकारणे परत्वापरत्वे । परत्वमपरत्वञ्च द्विविधं कालकृतं देशकृतञ्च, तत्र कालकृतं ज्येष्ठत्वकनिष्ठत्वापादकम्, यथा लक्ष्मणापेक्षया रामस्य परत्वं रामापेक्षया च लक्ष्मणस्यापरत्वम् । दैशिकन्तु दूरत्वनिकटत्वयोरापादकम्, यथा काष्ठमण्डपाद् धनकुटापेक्षया जनकपुर्य्यापरत्वन्तदपेक्षया च धनकुटायाः परत्वम् । अनयोश्च नियामके कालिकविशेषणतादैशिकविशेषणतेति व्यपदिश्येते । अनयोरपेक्षाबुद्धिजन्यत्वात्तन्नाशेन नाश इति ।

बुद्धयः - बुद्धिरिति लक्ष्यनिर्देशो लक्षणनिर्देशश्चोभयं भवति, तथैव विवरणकर्तृपरम्परादर्शनात्, अतएव तर्कसङ्ग्रहकृता 'सर्वव्यवहारहेतुर्बुद्धिर्गुणो ज्ञानम्'[१] इति तस्या लक्षणमुद्दिष्टम् । युक्तमपि तथा किमपि बुद्ध्यपेक्षं दृश्यते श्रूयते वा । अतस्तस्याः सर्वव्यवहारहेतुत्वे का प्रतिपत्तिः ? अस्ति च सर्वशास्त्रेष्वपि बुद्धेर्महिमा, एतादृशमहिमशालिनि बुद्धौ कथं वैशेषिकैरपि मौनमवलम्बितं भवेत्, पदार्थधर्मसङ्ग्रहे

---

१ त.सं. प्र.स. ।

च ''तस्याः सत्यप्यनेकविधत्वे समासतो द्वे विधे विद्या-
चाविद्याचेति''' प्रस्तुत्य तत्प्रपञ्चो निरूपितः। यथाहि
अविद्याभिधाबुद्धिश्चतुर्विधा-

१. संशय २. विपर्यय ३. अनध्यवसाय ४. स्वप्नभेदात्।
संशयस्तावदुभयावलम्बी विमर्शः, सोपि द्विविधः, अन्तर्बहि-
श्च, अन्तरेकविधः, बहिस्तु द्विविधः प्रत्यक्षाप्रत्यक्षाविषय-
भेदात्।

विपर्यय अतस्मिंस्तदिति प्रत्ययः, सोपि द्विविधः प्रत्य-
प्रत्यक्षाविषयानुमानविषयभेदात्।

किंस्विदित्यालोचनमात्रमनध्यवसायः, सोपि पूर्ववत्
प्रत्यक्षानुमानविषय एव भवति।

मनसः प्रलीनावस्थायामसत्सु विषयेषु प्रत्यक्षाकारं
मानसं स्वप्नज्ञानम्। तत्त्रिविधम् -

१. संस्कारपाटवजन्यं २. धातुदोषजन्यं ३. अदृष्ट-
जन्यञ्चेतिबुद्धेरविद्याभेदस्यसंदोपः। तेषां उदाहरणोदाहर-
णपूर्वकंविवेचनमाकरेषु व्यक्तम्।

विद्यापि चतुर्विधा-

१. प्रत्यक्ष २. लैङ्गिक ३. स्मृति ४. आर्षभेदात्।
अक्षमक्षं प्रतीत्योत्पद्यत इति प्रत्यक्षम्, तद्धि षड्विधम्,
घ्राणरसनचक्षुस्त्वक्श्रोत्रमनोभेदेनेन्द्रियाणां षट्त्वात्,
प्रत्यक्षंप्रतीन्द्रियाणां कारणत्वातेषाञ्च षट्त्वात्।

---

१ प.ध.सं. गुणप्रकरणम्।

लिङ्गदर्शनात्संजायमानं लैङ्गिकम् । लिङ्गम्-हेतुः, हेतुदर्शनात्साध्यमनुमेयं भवति । तदपि द्विविधं दृष्ट-सामान्यतोदृष्टञ्च, दृष्टं यथा - सास्नावत्त्वमुपलभ्य तेनैव हेतुना देशान्तरे गोज्ञानम् । सामान्यतोदृष्टञ्च यथा - प्रभूतलाभवृष्टिमाकलय्य वणिजां व्यापारे प्रवृत्तिरिति स्वनिश्चयार्थं स्वार्थानुमानम् ।

परार्थानुमानन्तु पञ्चावयवेन वाक्येन स्वनिश्चितार्थ-प्रतिपादनम् । अवयवाश्च - प्रतिज्ञापदेशनिदर्शनानुसन्धान-प्रत्याम्नायाः । समानतन्त्रे न्याये प्रतिज्ञाहेतूदाहरणोपनय-निगमनशब्दैर्बोध्यन्ते । एतेषां लक्षणोदाहरणपूर्वकं विवेचनं तर्कसङ्ग्रहे मुक्तावल्यादौ च विहितमिति नात्यन्तमुपयोगोऽत्र निरूपणस्य तथापि न्यायविषयसमीक्षायां निरूपणार्थं किञ्चिदावश्यकं हेत्वाभासादिकं निरूपयिष्यते ।

वैशेषिकैः प्रत्यक्षानुमाने एव प्रमाणे स्वीक्रियेते, अन्यतैर्थिकस्वीकृताः शब्दादय अनुमानेऽन्तर्भावयन्ति तच्छास्त्रतात्पर्यविदः । अन्तर्भावप्रक्रिया प्रायः सर्वत्रार्चिता।

स्मृतिरपि दृष्टश्रुतानुभूतेष्वर्थेषु भवति । दृष्टः प्रत्यक्षेण, श्रुतः शब्देन, अनुभूतोऽनुमानेन, तथा च यत्रापि विषयेऽनुभवोऽतीतस्तत्र स्मृतिरुत्पद्यते इति । अत्र प्रत्यक्षानुमानगर्भा स्मृतिस्तथापि ज्ञानभेदनिबन्धनः स्वरूपभेद इति तत्तत्सिद्धान्तानुसारिशास्त्रानुशीलनमतिरोहितः ।

प्रातिभज्ञानं सिद्धदर्शनम् । तच्च आत्ममनसोः संयोगाद्धर्मविशेषाद् वा भवति, नेदं ज्ञानं सामान्यम्, अम्नायविधातॄणां सूक्ष्मव्यवहितविप्रकृष्टविषयदर्शिनामिव कदाचिदेव लौकिकानाम्, अत अस्यापि प्रत्यक्षानुमानयोरन्यतरान्तर्भूतत्वम् । प्रत्यक्षानुमानभेदेन प्रमाणस्य द्विविधत्वेपि स्मृत्यार्षज्ञानयोः पृथगुट्टङ्कनं तयोर्वैशिष्ट्यबोधनाय । द्विविधाया अपि बुद्धेः प्रस्तारानन्त्यसूचकं दिङ्मात्रमिह निदर्शितं समग्रतावलम्बनमाकरग्रन्थैर्बुद्धिरिति ।

सुखम् - सर्वेषामनुकूलवेदनीयं सुखम् । तद्धि धर्माज्जायते, स्रक्चन्दनवनितादिसंयोगजन्यं तदिति प्रतियन्ति लौकिका अपि । अतीतेषु स्मृतिजमनागतेषु च सङ्कल्पजम्, अन्येच्छानधीनेच्छाविषयत्वमेव तदिति निष्कर्षः ।

दुःखम् - प्रतिकूलवेदनीयं दुःखम्, अधर्मजन्यं तत्, दुःखत्वज्ञानादेव तस्य स्वाभाविकद्वेषविषयत्वम् ।

इच्छा- इच्छा- कामः, सुखं सुखसाधनं चेच्छा जायते, अननुभूतसुखविषयिणीच्छा नोत्पद्यते, नाकारणं सुखोत्पत्तिरतः साधनविषयिणी फलविषयिणी चेच्छा भवत्येव । फलविषयिण्यां फलज्ञानमुपायविषयिण्यामिच्छायान्त्विष्टसाधनताज्ञानं हेतुः । फलमत्र- सुखं दुःखाभावश्च, पुरुषार्थोऽप्ययमेव स च ज्ञातश्चेत् स्ववृत्तित्वेष्यते, तथाचेतरेच्छानधीनेच्छाविषयत्वमितिनिष्कर्षः ।

द्वेष- द्विष्टसाधनताज्ञानजन्यगुणो द्वेषः, स च दुःखायदात्
स्मृत्यपेदाद् वा जायते ।

प्रयत्नः- प्रयत्नत्वजातिमान् प्रयत्नः, स त्रिविधः प्रवृत्तिनिवृत्तिजी-
वनयोनिभेदात्, प्रवृत्तिरिच्छाजन्या, निवृत्तिर्द्वेषजन्या,
जीवनयोनिरदृष्टजन्या सा च प्राणसञ्चारकारणम् ।

गुरुत्वम् - आद्यपतनासमवायिकारणम् गुरुत्वम्, पृथिवीजलवृत्तिः ।
तन्नित्यगतं नित्यमनित्यगतमनित्यम् ।

द्रवत्वम् - आद्यस्यन्दनासमवायिकारणं द्रवत्वम् । तद्द्विविधम् सांसि-
द्धिकं नैमित्तिकञ्च, सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः ।
अस्य नित्यानित्यत्वविवेको गुरुत्ववत् ।

स्नेहः - जलस्य विशेषगुणः स्नेहः, चूर्णादिपिण्डीभावहेतु ।
नित्यानित्यत्वनिष्पत्तयः पूर्ववत् ।

संस्कारः- संस्कारो हि सामान्यगुणात्मविशेषगुणोभयवृत्तिगुणत्व-
व्याप्यजातिमान् । सत्त्रिविधो वेगो भावना स्थितिस्था-
पकश्च । तत्र वेगो द्वितीयादिपतनासमवायिकारणम्, पृथिवी-
जलतेजोवायुमनोवृत्तिः । अनुभवजन्या स्मृतिहेतुर्भावना, आत्म-
मात्रवृत्तिविशेषगुणः । स्थितिस्थापकत्वन्तु पृथिवीमात्रसम-
वेतसंस्कारत्वव्याप्यजातिमत्त्वम्, पृथिवीमात्रवृत्तिरपि
केषाञ्चिन्मते पृथिव्यादिचतुष्टयवृत्तिः ।

धर्मः - वेदविहितकर्मजन्यो धर्मः । स हि कर्मनाशाजलस्पर्शकीर्तनभो-गतत्त्वज्ञानादिना नश्यति ।

अधर्मः - निषिद्धकर्मजन्योऽधर्मः । सोऽपि भोगेन प्रायश्चित्तादिना वा नश्यति ।

धर्माधर्मावेव 'अदृष्टम्' इति पदेन व्यवह्रियेते वासना-जन्यावपि भवतः । वासना च विलक्षणः संस्कारविशेषः, अनयोर्भिन्नफलजनकत्वाद् धर्मत्वमधर्मत्वञ्च जातिविशेषौ, अदृष्टत्वन्तु न जातिरिति ।

शब्दः - श्रोत्रग्राह्योगुणः शब्दः । आकाशवृत्तिः, सपर्शिनुश्रुतशब्दादा-वव्याप्तिवारणाय श्रोत्रग्राह्यजातिमत्त्वमिति स्फुटीभवि-ष्यति ग्रन्थत एव । सद्विविधः ध्वन्यात्मको वर्णात्मकश्च। उत्पत्तिश्च संयोगतो विभागतः शब्दतश्चेतिगुणपरिचयसंदीपः ।

अथकर्माणि

संयोगभिन्नत्वेसति संयोगासमवायिकारणत्वं, नित्यावृत्तिसत्तासाक्षा-द्व्याप्यजातिमत्त्वं कर्मत्वजातिमत्त्वं वा कर्मत्वम् । उत्क्षेपणापक्षेपणाकु-ञ्चनप्रसारणगमनभेदेन पञ्चविधत्वं कर्मणः । उत्क्षेपणत्वादयः कर्मत्वव्या-प्याजातयः भ्रमणादीनां गमनेऽन्तर्भाव इति न पञ्चत्वविरोध इति कर्मा-णि ।

अथसामान्यम्

नित्यमेकमनेकानुगतं सामान्यम् । तद्द्विविधं परमपरञ्च, परत्वमधि-कदेशवृत्तित्वम्, अपरत्वं न्यूनदेशवृत्तित्वम् । यथा द्रव्यत्वापेक्षया सत्तायाः

द्रव्यादित्रिकवृत्तित्वेनाधिकदेशवृत्तित्वात्परत्वम् । सत्तापेक्षया च द्रव्यत्व-गुणत्वकर्मत्वानां न्यूनदेशवृत्तितया अपरत्वम् । पृथिवीत्वरूपत्वाद्यपेक्षया द्रव्यत्वगुणत्वयोः परत्वम् । द्रव्यत्वं गुणत्वं कर्मत्वञ्च पररूपेण अपर-रूपेण च प्रतीतिविषयमिति तत्र परत्वमपरत्वञ्चाविरुद्धम्, यत्र च नोभयप्रकारताऽपेक्षिकी तत्र न तथा प्रतीतिर्यथा सत्तायाम्, तत्र परत्व-मात्रस्य सत्त्वात् घटत्वादौचापरत्वमात्रस्येति सामान्यम् ।

अथविशेषाः :-

नित्यद्रव्यवृत्तय अन्त्याविशेषाः, ते हि स्वत एव व्यावृत्ताः, एषां व्यावृत्त्यर्थं विशेषान्तरापेक्षा नास्ति । अतएव सृष्ट्यादौ परस्पर संमिश्राणामपि परमाणूनां भेदको विशेष एव, अन्यथा पृथिव्यादिपरमा-णूनां परस्परसंपृक्ततया प्रळयोत्तरं प्रत्येकं पृथिवीजलतेजोवायूनां पृथक् पृथग्रूपे-णोत्पत्त्यसंभवादिति विशेषाः ।

अथसमवायः

स्वरूपसम्बन्धभिन्नत्वेसति नित्यत्वेसति सम्बन्धत्वं समवायस्य लक्षणम् । अयुतसिद्धवृत्तिः, ययोर्द्वयोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठते तावयुतसिद्धौ । यथा अवयवावयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती विशेषनित्यद्रव्ये च । अयञ्च योग्यवृत्तिः प्रत्यक्षोऽप्यतीन्द्रियश्चेति समवाय इति षट्पदार्थाः ।

अभावः

द्रव्यादिषट्कान्योन्याभाववानभावः, सश्चतुर्विधः, प्रागभावः, ध्वंसः, अत्यन्ताभावोऽन्योन्याभावश्च । आद्यानां त्रयाणां संसर्गाभाव इति संज्ञा, तत्त्वञ्चान्योन्याभावभिन्नत्वेसत्यभावत्वम्, अनादिः सान्तः

प्रागभावः, सादिरनन्तः प्रध्वंसः, त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताको-ऽत्यन्ताभावः, तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभाव इति। एवं निरूपितेऽन्योन्याभावघटकत्वमभावस्याभावघटकत्वञ्चान्योन्याभावस्येति प्रातिस्विकरूपेण तयोर्विवेचनासंभवादभावत्वमखण्डोपाधिरिति शास्त्रार्थरहस्यवेदिनः । तत्त्वञ्च[1] शाब्दबोधीयस्वरूपसम्बन्धावच्छिन्न-निरवच्छिन्नप्रकारताश्रयत्वम्[2]।

वैशेषिकत्वे युक्तयः

प्राधान्येन वाच्यपदार्थनिरूपणपरस्य दर्शनस्य वैशेषिकत्वसाधिका युक्तयः षड्धा प्रतिपाद्यन्ते तद्विदः । "अन्यत्रान्त्येभ्यो विशेषेभ्यः[3]" इति सूत्रस्थान्त्यशब्दसूचितान्त्य विशेषपदार्थ सम्बन्धात्, समानतन्त्रसिद्ध 'तदत्यन्तविमोक्षोऽपवर्गः[4]' इति सूत्र सूचितदुःखध्वंसरूपमोक्षपदार्थादन्य-दशविशेषगुणध्वंसरूपो[5] वैशेषिकतन्त्रसिद्ध एव मोक्ष इति सिद्धान्तात्, 'विगतः शेषो यस्य सः विशेषः' इति व्युत्पत्त्या विशेषपदार्थस्य निर्विशेषत्वात्, 'विशेषणं विशेषः' इति व्युत्पत्त्या विशेषपदार्थस्य लक्षण-प्रमाणाभ्यां निरूपणात्, 'विशेष' शब्दस्य भेदो विशेषगुणश्चेत्यर्थद्वयम्, तादृशार्थद्वयसम्बन्धात्, 'विशेष' शब्दप्रयोगः परमाणुष्वपि, परमाणूद्भावस्य तन्मूलिकायाः सृष्टेश्च प्रतिपादनाद् वाऽन्वर्थत्वं वैशेषिकस्येति[6] ।

---

१ अखण्डोपाधित्वम् । टि.

२ प्रस्तुते ग्रन्थेऽभावस्य प्रातिस्विकी चर्चा परित्यक्ता ग्रन्थकृता, 'बोधोऽपि तेषामसा' वित्यादिनाऽभावस्य प्रतियोगिज्ञानसाध्यत्वेन पृथङ्-निरूपणानावश्यकत्वं साधितम् । युक्तञ्चैतत्, वैशेषिकप्रक्रियानुसारिणां तत् सिद्धान्ताभ्युपगमस्यावश्यकत्वम्, अन्यथाऽपसिद्धान्तापातः स्यात्, तथापि प्रसिद्धः ग्रन्थान्तरसंवादमुखेन वाऽभावस्यात्र परिचयः पाठकस्यावबोधायोपन्यस्त इति । टि.

३. वै सू. १।२।६ ।

४ न्या. सू. १।१।२२ ।

५ पदार्थधर्मसंग्रहे मङ्गलव्याख्यायां गुणप्रकरणे च व्योमवत्याम् ।

६ न्यायकन्दलीभूमिकायां दुर्गाधरझा महोदयाः ।

न्यायदर्शनम्

तत्र हि वैशेषिके तद्घटकविषयनिरूपणाधीनमिवतज्ज्ञानमितीरितो विषय-याथार्थ्याय तद्घटकानां क्रियाणां सामान्येन निरूपणमुपन्यस्तमतश्चदार्शनिकभूमिषु प्रथमभूमिकागतं न्यायवैशेषिकयुगलंतत्रापि प्राथम्यं वैशेषिकस्य तदनु च न्यायस्य, वैशेषिकापेक्षया प्राथम्यान्ततदङ्गनिरूपकत्वमतस्तस्य क्रमो निरूपणस्यातोऽभ्यहितं समानतन्त्रं न्यायदर्शनम् पाठकानामुपायनी-क्रियते ।

न्यायदर्शने सिद्धा अपि पदार्था वैशेषिकसिद्धान्तसिद्धा एव, निरूपण-प्रक्रियाऽन्यादृशी न्यायदर्शनस्य, पदार्थानामुद्देशविधिश्चान्यविधः, तदर्शना-नुसारेणोद्देशो हि इत्थम्- "प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्कनिर्णय-वादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधि-गम[1]" इति गौतमीयमादिमं सूत्रम् । प्रमाणप्रमेयान्तर्गताः सर्वेऽत्र उद्दिष्टा-स्तत्रापि वस्तुतः प्रमेयमात्रास्तथापि प्रमेयाणां प्रमाणमात्राधीनत्वेन प्रमाण-प्रमेययोः प्राधान्यम् । तथाच द्विविधं पदार्थज्ञानमावश्यकमिति प्राप्तम् । अस्यां स्थितौ संशयादीनां पृथगुद्देशप्रयोजनं प्रत्यपादयद्भाष्यकारः[2] । यथाहि-चतस्रः खलु विद्याः पृथक्प्रस्थानाः, त्रयी, दण्डनीतिः, वार्ता आन्वी-क्षिकी च प्राणभृतामनुग्रहायोपदिश्यन्ते, संशयं पुरस्कृत्य विषयं प्रवर्तते । यतो हि न्यायो नानुपलब्धे नवा निर्णीतेऽर्थे प्रवर्तते किन्तु संशयिते । संशयोत्तरं हि परीक्षाऽपेक्यते परीक्षा च न्यायः, न्यायश्च प्रमाणैरर्थ-परीक्षणरूपः । अतो न्यायप्रवृत्तेः कारणं संशयो न्यायस्य पूर्वाङ्गत्वेन कार्यं प्रवर्तयति, ततश्चैकतरपक्षस्य युक्तत्वं निर्धार्यते स एव निर्णयः

---

१ न्या. द. १।१।१ ।

२ वात्स्यायनभाष्ये १।१।१ ।

" विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः[1] " इति । स च प्रमेयान्तर्गतोऽपि प्रयोजनप्रयुक्तत्वात्पृथगुद्दिष्टः ।

प्रयोजनमभिलक्ष्य कार्येषु प्रवृत्तिः प्रयोजनस्य, लौकिकपरीक्षकाणामेकस्मिन्नर्थे दृष्टविधानाय दृष्टान्तस्य, सिद्धान्तानुसारिणो वादजल्पवितण्डाः प्रवर्तन्ते नातोऽन्यथेति सिद्धान्तस्य, प्रमाणैरर्थपरीक्षणरूपन्यायस्योपपादनायावयवानां, प्रमाणानुग्राहकत्वप्रदर्शनाय तर्कस्य, प्रमाणानां फलप्रदर्शनाय निर्णयस्य, लोकयात्रावाहकत्वदर्शनाय वा तर्कनिर्णययोः, गुरुशिष्ययोः कथावादस्तस्यापि परम्पराबोधनाय वादस्य, तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डयोः प्रमेयेऽन्तर्भूतानामपि पृथक् पृथगुपदेशः ।

जातयो निग्रहस्थानानि च पराजयहेतवः, हेत्वाभासा अपि निग्रहस्थानान्तःपातितया तत्फला एव । अतश्छलजातिनिग्रहस्थानानां पृथगुपदेशोऽपि जयपराजयप्रक्रियाबोधनद्वाराऽस्यशास्त्रस्यान्वर्थता सञ्जीवनाय ।

न्यायविद्या आन्वीक्षिकी

अन्वर्थत्वञ्चास्याऽऽन्वीक्षिकीत्येन इक्षा प्रत्यक्षम्, अनुपश्चात्, ईक्षा- अन्वीक्षा[2] प्रत्यक्षागमाश्रितमनुमानम्, प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया प्रवर्तत इत्यान्वीक्षिकी - न्यायविद्या-न्यायशास्त्रम् । तथाच शास्त्रान्तरेभ्योऽस्य शास्त्रस्य वैशिष्ट्यम्, एतादृशवैशिष्ट्यबोधनाय प्रमेयेऽन्तर्भूतानामपि संशयादीनां पृथग्वचनमावश्यकम् । अन्यथा उपनिषदादिवदस्याध्यात्मविद्यामात्रत्वेन आन्वीक्षिकीत्वं विलुप्येत, त्रय्याऽन्यथासिद्धत्वात् ।

---

१ न्या.सू. १।१।४१ ।
२ न्यायभाष्योपोद्घाते ।

मीमांसादर्शनम्

आस्तिकदर्शननिरूपणप्रधानयोर्वैशेषिकन्यायदर्शनयोर्निर्दिष्टा विषया: संक्षेपेणोद्दिष्टा: । ततो वेदार्थमात्रे साक्षाद्व्यापृतस्य मीमांसादर्शनस्य क्रम: । तद् द्विविधम्, कर्ममीमांसादर्शनं ब्रह्ममीमांसादर्शनञ्च । पूर्वभागगतवेदार्थनिरूपणपरकस्य ग्रन्थक्रमानुगतस्य च कर्ममीमांसादर्शनस्य ब्रह्ममीमांसापूर्ववृत्तित्वमित्यधिकारानुविधायी तद्गतविषयाणां दिग्दर्शनम् ।

मीमांसा का?

मीमांसनं नामान्वेषणम् । यद्यपि मीमांसाया: पर्यायो नान्वेषणं, प्रकृत्यर्थभूतयोर्धात्वर्थयोर्भिन्नत्वात् । यतो हि- अन्वेषणस्यैकानिवर्त्यत्वमात्रं प्रतीयते, मीमांसा तु न सामान्यविषयतामात्रं व्याप्नोति, अपि तु पूजितविचारवचनविषयताम् [1] । अस्य विवेचनं मदीये विद्यावारिधि शोधप्रबन्धे[2] स्फुटम् । धर्ममीमांसाया: प्रत्यध्यायगता मूलविषयास्त्विमे -

प्रथमे धर्मप्रमाणम्

वेदप्रामाण्ये आशङ्कामुत्थाप्य तत्प्रामाण्यं प्रसाधितम् । तत्प्रसङ्गे प्रमाणानां निर्वचनं तद्गतां संख्यां तद्विषयतां लौकिकेष्वपीति निधार्य 'य एव लौकिका: शब्दास्त एव वैदिका' इति न्यायोऽन्वर्थीकृत: ।

द्वितीये धर्मभेदाभेदौ

सर्वाणि कर्माणि भिन्नान्यभिन्नानि वेति संशये 'यजति', 'जुहोति' इत्यादि शब्दान्तरादिहेतुभिरुत्पत्तिविधिभेदपूर्वक: कर्मभेदो निरूपित: ।

---

१ भामती तथा न्यायनिर्णय: १।१। १ ।

२ १९८९ ई. विद्यावारिधि स्वीकृतं सं.सं.वि. वाराणस्याम् ।

तृतीये शेषशेषिभावः

समत्वं प्रधानत्वं वा सर्वत्रेति शङ्कायां, "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यम् [1]," इति रीत्या प्रमाणबलाबलत्वचिन्तानिरूपणपुरस्सरमङ्गाङ्गिभावो व्यवस्थापितः ।

चतुर्थे प्रयुक्तिविशेषः

एतावतामनुष्ठानं क्रत्वर्थत्वेन पुरुषार्थत्वेनेत्यवतामिति निर्धार्य विषयाणां वर्गीकरणेन व्यवस्था निर्दिष्टा ।

पञ्चमे क्रमः

"वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेत," इत्यादौ श्रुत्यर्थपाठादिक्रमभेदाः साधुप्रपञ्चिताः ।

षष्ठे अधिकारः

काम्यविधौ कामनावतः पुरुषस्य नित्यनैमित्तिकविधौ च जीवनादिमित्तवतश्चैवाधिकारो निरूपितः ।

इति पूर्वषट्केन प्रकृतिविध्युपादानो विचारो निर्वर्तितः। यस्मिन् विधौ समग्राण्यङ्गान्युपदिश्यन्ते सा प्रकृतिः, स हि विधिरुपदेशरूप एव।

विकृतिविधिस्तु विकलाङ्गसंयुक्तः, विकृतिविध्युपादानो विचार उत्तममारभ्योत्तरषट्केन विधीयते, स चातिदेशरूपः । "इत्थं कुर्यात्" इत्युपदेशः, "तद्वत् कुर्यात्" इत्यतिदेशः । तथाच "प्रकृतिवद्विकृतिः कर्तव्या" इति शास्त्रमर्यादा सिद्धा भवति [2] ।

---

१ मी. सू. ३।३।१३ ।

२ मीमांसान्यायप्रकाशार्थसङ्ग्रहमीमांसापरिभाषाविवरणप्रमेयसङ्ग्रहवार्तिकसिद्धिमीमांसादर्शनादयो ग्रन्थाः । टि.

सप्तमे सामान्यातिदेशः

प्रकृतावुपदिष्टानामङ्गानां सामान्येनातिदेशो विकृताविति निर्णयो विहितः ।

अष्टमे विशेषातिदेशः

प्रकृतिभूतायां दर्शपूर्णमासनाम्न्यामिष्टौ "आग्नेयोऽष्टाकपालः" इत्यत्र व्रीहीणां पुरोडाशप्रकृतिद्रव्यभूतानां धर्मा ये निर्वापावघातप्रोक्ष-णादयो निर्दिष्टास्ते विकृतिभूते सौर्यचरौ व्रीहिरूपद्रव्यसारूप्ये चरुप्रकृति-भूतव्रीहिष्वप्यतिदिश्यन्त इत्यादि विशेषातिदेशः साधु प्रतिपादितः ।

सामान्यविशेषातिदेशयोः पार्थक्यप्रयोजकं इदमभियुक्तोक्तम् -

"सप्तमेनातिदेशेन धर्माः सन्तीति साधिते ।
ततोऽष्टमेन यो यस्य धर्मस्तस्येति निरूपणा ॥" इति ।

नवमे ऊहः

प्रकृत्युपदिष्टसामसंस्काराणां विकृतावतिदेशः, तत्र च प्रकृतिविकृत्यो-र्द्रव्यदेवताभेदसति प्रकृतिगतद्रव्यादिशब्दं परित्यज्य विकृतिस्थद्रव्यादिशब्दा-ध्याहाररूप ऊहो निरूपितः । यथा- "अग्नये जुष्टम्" इति मन्त्रस्य विकृतौ "सूर्याय जुष्टम्" इति पदस्थापनम् ।

दशमे बाधः

प्रकृतौ सावकाशानां विकृतावतिदेशप्राप्तानां विकृतिगतविशेषोपदेशा-दिना बाधः प्रपञ्चितः । यथा- "शरमयं बर्हिर्भवति" इति विकृतिगतविशेषो-पदेशजन्यः प्रकृतिसम्बन्धिबर्हिषां बाधः ।

यथा वा प्राकृतानामवघातादीनां बाधः कृष्णलेषु, कृष्णलादि सुवर्णशकलानामवघातेन रूप(तुष) विमोकासंभवः प्रत्यक्षेण दृष्टत्वात्, अतस्तत्र विकृत्युपदिष्टत्वावघातादिप्राप्तानां बाधः । यथावा "तौ न पशौ करोति" इति निषेधवाक्यजन्यः पशावाज्यभागयोर्बाध इति ।

शिष्टोपदेशजन्यत्वप्रत्यक्षत्वनिषेधजन्यत्वमेदेनोदाहरणत्रयं क्रमेण बोध्यम् ।

एकादशं तन्त्रम्

अनेकशेषिविधिप्रयुक्तस्य शेषस्य सकृदनुष्ठानेनैव सर्वशेषिणामुपकारः साम्येन भवति तदनुष्ठानं तन्त्रम् । पौर्णमासकर्मप्रयुक्तप्रयाजादेः सकृदनुष्ठानात् "आग्नेयोऽष्टाकपालः" "उपांशुयाजमन्तरा यजति" "अग्नीषोमीय एकादशकपालः" इति शेषित्रयस्योपकार इति । एकस्योभयार्थप्रयोजकमनेकार्थप्रयोजकं वा तन्त्रं भवति, लोकेऽपि तथैव दृश्यते व्यवहारः ।

द्वादशः प्रसङ्गः

एकं शेषिणमुद्दिश्य प्रयुक्तस्य शेषानुष्ठानस्य प्रयोजकसामान्याविशेषात् अन्यत्रोऽप्युपकारः प्रसङ्गाभिधः । यथा पशुविधिप्रयुक्तमनुष्ठानं पुरोडाशमप्युपकरोति ।

मीमांसाया उपयोगिता

एते विषया असाधारणबुद्धिबोध्याः साधारणबुद्ध्यपेक्षया न सर्वसुलभाः । विषयाणां परस्परबाध्यबाधकभावादि निराकरणेन कार्याकार्यव्यवस्थापने महती उपयोगिताऽस्य शास्त्रस्य सर्वव्यवहारेष्वपीति किमु वक्तव्यं शास्त्रोपकारत्वे ? ।

अत एव 'उत त्वः शृण्वन् न शृणोत्येनाम्' इत्युक्तिर्वेदस्य, व्याकृतञ्च निरुक्ते - कश्चिदर्थज्ञानाय व्याकरणाद्यङ्गानि शृण्वन्नपि मीमांसाराहित्यादिना वेदरूपां वाचं न सम्यक्शृणोति । 'यावतोऽश्वान् प्रतिगृण्हीयात् तावतो वारुणांश्चतुष्कपालान्निर्वपेत्' इत्यत्र व्याकरणमात्रेण प्रतिग्रहीतुरिष्टिः प्रतीयते, मीमांसायां तु न्यायेन दातुरिति निर्णीतम्[1]।

मीमांसापरिशोधितन्यायज्ञानविधुराच्छास्त्रलोकव्यवस्थापनीया अर्था अतदर्थतां भजन्ते, तेन हि शास्त्रलोकमार्गाणामतदर्थतापादनमात्रमपि तु भ्रमानुवृत्तिजन्यान्धपरम्परापोषकत्वमप्यापन्नं भवति, अत एव भट्टपादाः-

"मीमांसायामविज्ञानि दृश्यते वाऽविविक्तः ।
न्यायमार्गे महान्दोष इति यत्नोपपत्तितः[2] ।।" इति

सर्वत्रापन्यायभीतानामात्मन उच्छृङ्खलताया गोप्तुकामानामवश्यमपेक्षितं मीमांसाशास्त्रज्ञानम् । मीमांसा हि वाक्यशास्त्रम्, अतस्तस्य ज्ञानं विना कथं निश्चिनुयाद्वाक्यार्थम् ?, तथाच मीमांसाराहित्याच्छृण्वन्नपि न शृणोतीत्युक्तम् ।

मीमांसायां प्राधान्येन मतद्वयस्य प्रचलनम् तत्रैकं भाट्टमतम् प्राभाकरञ्चापरम्, प्रकृतग्रन्थेऽप्येतन्मतद्वयसमावेशः, भाट्टानुसारिण एव पदार्थाः प्राभाकरीयेऽपि प्रायः, कुत्रचिन्मतभेदः - यथा प्रमाणानि षड् भट्टमते प्रभाकरमते च पञ्च, अभिहिते शक्तिर्भाट्टानां प्राभाकराणाञ्चान्विते, नियोगस्य कृत्युद्देश्यत्वं प्राभाकरीये न तु भाट्ट इत्यादयः सन्ति । आकरानुसारिपदार्थदिग्दर्शकोऽयं विषयपरिचय इति ।

---

१ ऋग्वेदभाष्यभूमिका ।
२ श्लो.वा.प्र.सू. १५ ।

सांख्यदर्शनम्

सांख्यदर्शनं भेदवादिषु चरमम्, तत्राधिकं साम्यं वेदान्तदर्शनस्येत्यग्रे समीक्ष्यते । तत्त्वद्वयमस्मिन्दर्शने प्रधानम् पुरुषश्च, तत्र प्रधानं प्रकृतिः, तस्याश्चभेदाश्चतुर्विंशतिः प्रकृतिमहत्तत्त्वाहङ्काराः, पञ्चतन्मात्राः, पञ्चमहाभूतानि, एकादशेन्द्रियाणि इति सर्वं समेत्य चतुर्विंशतितत्त्वानि। मूलप्रकृतिर्विकाररहिता नित्या जगतः कारणभूता त्रिगुणा । महत्तत्त्वादिकं सर्वं वैकृतम् स्वप्रकृत्यपेक्षयैव, स्वविकृत्यपेक्षया प्राकृता अपि भवितुमर्हन्ति। यथा- प्रकृत्यपेक्षया महत्तत्त्वं वैकृतम् अहङ्कारापेक्षया च प्राकृतम्, एवं सर्वत्र बोध्यम् ।

पुरुषस्तु पुष्करपलाशवन्निर्लेपो चेतनो निष्क्रियो भोगापवर्गभाक्, निर्लेपोऽप्ययं बुद्धितादात्म्याध्यासाद्दुःखित्वादिव्यवहारवान् जडायाः प्रकृतेः संसर्गेण पुरुषः संसरतीव, तयोर्विवेकज्ञानाच्चापवर्गः,- "अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम्[१]" इत्युक्तः । एवं पुरुषसहित पञ्चविंशति-तत्त्वप्रतिपादकं दर्शनम् सांख्यम् ।

यौगः सांख्यसमानतन्त्रः

सांख्यसमानतन्त्रो योग इति प्रसिद्धिः, योगोऽप्येकं दर्शनम्, या प्रक्रिया सांख्यस्य सैव च योगस्यापि, सांख्यकल्पिततत्त्वेभ्योऽधिकमेकंतत्त्वम्, तदीश्वररूपम्, अतो योगसूत्रे- ईश्वरलक्षणम् 'क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर[२]' इति, एवं तस्योपास्यत्वं तादृशोपासनाया मुक्तिप्रयोजकत्वमुपपादितम्, अत एव षड्विंशतितत्त्वप्रतिपादकं योगदर्शनम्, सर्वविधासु प्रक्रियासु सांख्यमार्गानतिक्रमात्तत्वैक्याच्च सांख्यमतप्रक्रियायामन्तर्भाव्यास्यापि व्याकृति-

---

१ सांख्यकारिका ६४ ।

२ योगसूत्रम्- १।२४ ॥

विहिता ग्रन्थकृता । युजिर्- योगे युज- समाधौचेतिधातुद्वयमस्ति, धातुद्वयादेव योग शब्दो निष्पद्यते, योगश्चाप्राप्तस्य प्राप्तिः, सा पृथग्भूतयोरेकीभावरूपा, तथाचानादिदुर्वासनया पृथगिव संभूतस्यात्मतत्त्वस्याऽऽमुष्का सम्पादनेनाऽऽत्मनि वृत्तेः स्थिरीकरणादिना एकीकरणरूपमुपासनमेव योग इत्यन्वर्थसंज्ञा, सूत्रविवरणकर्तां तथाभिप्रायदर्शनात् ।

प्रवृत्तिनिमित्तन्तु चित्तवृत्तिनिरोधरूपमेव, सूत्रे तथैव दर्शनात् । यद्वा योग इति प्राप्तिः, एकनिरोधेऽन्यस्य प्राप्तिरवश्यं भाविनी, पूर्वसंयोगनाशादुत्तरसंयोगोऽपरिहार्यः 'क्षणमप्यपरिणम्य वर्तन्ते भावा ऋते चितिशक्ते' रिति सिद्धान्तात्, अतः किं चित्रं निरोधस्यापि योगत्वे? । अन्यन्मूलग्रन्थ एवेति ।

साङ्ख्यत्वम्

सम्यक् ख्यायते- प्रकाश्यते प्रकृतिपुरुषयोर्वस्तुतत्त्वमनयेति संख्या- सम्यग् ज्ञानम्, सा अस्ति यत्रेति विग्रहेऽण् प्रत्यये सांख्यमात्मतत्त्वप्रतिपादकं- दर्शनशास्त्रम्, एवं हि एतादृशस्य ज्ञानमात्मतत्त्वजिज्ञासूनां श्रीमार्गप्रशस्तकर- तयाऽभ्यर्हिततरम् ।

वेदान्तदर्शनम्

ग्रन्थक्रमेण वेदान्तदर्शनम्, तत्र प्रतिपाद्यविषयाः कर्ममीमांसायां निदर्शिताः । 'व्यवहारे भट्टनाय' इति प्रावादुकानां प्रवादात्, तथापि मृत्रो वैसादृश्यं भजन्तः सन्ति पदार्थाः ।

प्रथममध्यासनिबन्धनत्वं शास्त्रीयलौकिकसर्वविधप्रमाणप्रमेयव्यवहार- विधीनाम्, अध्यासतथा व्यवहारयोरन्वयव्यतिरेकसिद्धत्वमुपपाद्यते तैर्थैरेस्तदा- धारेणैव सत्तात्रयस्याभ्युपगमः । तत्र पारमार्थिकीसत्ता ब्रह्मनिष्ठा, प्रातिभा- सिकी शुक्तिरजतादितुच्छवस्तुनिष्ठा, व्यावहारिकी सत्ता व्यवहारकाले

पारमार्थिकघटादिनिष्ठा, ज्ञानोत्तरमेव बाधो व्यावहारिकवस्तूनाम्, यावज्ज्ञानं नोदेति तावद् व्यावहारिकसत्ताधारिणैव प्रमाणप्रमेयादिपदार्थेण प्रवृत्तिनिवृत्ती । ज्ञानोदयसमकालमेव सम्पूर्णाध्यासनिवृत्तिरूप आवरणापगमात्स्वस्वरूपावाप्तिरूपो मोक्षः इति हि तद्दर्शनसिद्धान्तः ।

वेदान्तदर्शनं वेदस्यान्तिमभागप्रतिपाद्यमित्यापाततः शब्दबोध्यम्, तदर्थः कथं निर्णीतो विश्वस्तो वा भवतीति प्रामाणिकः कश्चन ग्रन्थोऽपेक्षितो वाक्यार्थनिर्णयाय, तादृशनिर्णयोपयोगिग्रन्थरत्नं शारीरकमीमांसायाः शाङ्करभाष्यम्, तद्विना अनिर्णय उपनिषदामर्थस्य, अतो नान्यत् तत् कोटिमारूढः कोऽपि ग्रन्थस्तत्र हि -

प्रथमेऽध्यायेऽध्यासचर्चा, वेदान्तवाक्यानां ब्रह्मणि समन्वयः ।
द्वितीयेऽविरोधप्रदर्शनमुखेन स्वरूपे प्रतिष्ठापनम् ।
तृतीये साधनानां विचारः ।
चतुर्थेऽवशिष्टसाधननिरूपणं मुक्तिरूपफलविचारश्च । एवं समापि तो विषयः सर्वे च विषयाः समाविष्टाः सन्त्यत्र ।

वेदान्ते विषयचिन्ता युक्ता

वेदान्तदर्शनं मीमांसान्तर्गतम् सा विवृताऽधस्तात्, तत्रापि विशिष्टम्- मुत्तरत्वम् । तच्च उद् + तृ= अच्प्रत्यये तरप्प्रत्यये वा, 'उत्तरम्' इति, तस्य 'मीमांसा' इत्यनेन समासात् 'उत्तरमीमांसा' इति । 'तस्योदितिनाम' इति श्रुतेः 'उद्' इत्यस्य ब्रह्मपरत्वम्, तथाचोत्तरमीमांसा 'ब्रह्ममीमांसा' इति सिद्धा भवति ।

ब्रह्मणो निर्गुणत्वेन तस्य मीमांसाऽसम्भवमाकलय्य "त्वं" पदार्थवाच्यस्यैव मीमांसाविषयत्वं प्रतिज्ञातम्, "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरभ्यन्ते । यथा चायमर्थः सर्वेषां वेदान्तानां तथा वयमस्यां शारीरकमीमांसायां प्रदर्शयिष्यामः[1]" इत्यादिना । शारीरकश्च त्वं पदवाच्य आत्मा, एवञ्च तत्पदवाच्यस्य मीमांसनीयत्वेऽपि अभ्यर्हितं "त्वं" पदवाच्यं ब्रह्म, तस्यैव बन्धमोक्षभागित्वेन[2] शास्त्रश्रवणादावधिकारात् । अन्यद्विस्तर आकरेषु ।

मीमांसाविषयता चोपनिषत्सु ताः प्राधान्येन वेदान्तेषु, अतः स्थानत्रापिदयो "वेदान्त" शब्दः ।

यद्वा अन्तः शब्दस्य निश्चयः स्वरूपं स्वभावो वाऽर्थः । निश्चयः संशयान्यज्ञानम् निर्णयो वा, तथा च वेदान्त "इत्यस्य" वेदनिश्चय "इति "वेदस्वरूपम्" इति "वेदस्वभाव" इति वाऽर्थः सम्पद्यते ।

वेदत्वञ्च -

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता[3]" ।। इति वचनोदितं निष्कर्षितञ्च-

"शब्दातिरिक्त शब्दोपजीविप्रमाणातिरिक्तञ्च यत्प्रमाणं तज्जन्यप्रमितिविषयानतिरिक्तार्थको यो य स्तदन्यत्वे सति आमुष्मिकसुख जनकोच्चारणकत्वे सति जन्यज्ञानाजन्यो यः प्रमाणशब्दस्तत्त्वमि[illegible] उत्तर-मीमांसाया वेदान्तत्वं तस्य च ब्रह्ममीमांसाविषयत्वमिति सिद्धम् ।यथोक्त-तथाऽन्यत्र "शाङ्कवेदान्ते उपासनायाः समीक्षणात्मकमध्ययनम्" इति

---

१ ब्र.सू. अध्यासभाष्यम् ।
२ ब्र.सू. अध्यासभाष्ये आनन्दगिरि ।
३ वै.स्व.वि.पृ.११५, वृ.प्र.५।५ उपस्कार ६।१।१ ।

विषयके विचावाराधिशोधप्रबन्धे । उपजीव्यविषयप्रबोधोऽत्र प्रविशाय बारमभ्यस्त उपन्यस्तोविषयसंक्षेप इति ।

अथसमीक्षा

प्रतिज्ञाक्रमानुसृता ग्रन्थसमीक्षा । तत्रादौवैशेषिकस्य टीकामङ्गल-प्रतिज्ञा, "अभीष्टार्थदां कल्पलतिकां टीका षड्दर्शनीसङ्ग्रहं व्याकर्तुं रचयामी" ति । एतेन षड्दर्शनीसङ्ग्रहस्य, "कल्पलतिका, " नाम्नी टीका बहुशास्त्राली-ढनैव सुधिया भवति नान्यथेति निर्धारिता ।

ग्रन्थानुगुणं मङ्गलम्

युक्तश्चैतत्, श्रीशम्भुमित्यादिमङ्गलपूर्वार्धेन ईश्वरनतिर्विहिता तथैव गुरुनतिरपि । अत्रेश्वरस्य नतिविषयताख्यापनं तादृशविषयतासामाना-धिकरण्यं जगत उत्पत्तिस्थितिलयानां, तदधिकरणत्व सर्वज्ञः परमेश्वर एवेति। स हि लक्षणप्रमाणाभ्यां बोधनीय इति धिया स्वानोदत्यपरिशेषेऽनिष्ट-भावनाविधश्चेश्वरलक्षणं तत्र प्रमाणमपि कितत्य, "मानाधीना मेयसिद्धि" रिति नियमोऽन्वथीकृतः ।

वैशेषिकप्रकरणान्तर्वर्तित्वाज्जनुगुणाव्याख्या ज्यायसीत्यवधारावपि तां नातिक्रामतीति प्रदर्शितम् । यत् - प्रणम्यहेतुमीश्वरमित्यादीश्वर-नतिरूपं मङ्गलं [1], तल्ल ज्ञानस्येश्वरचोदनाभिव्यक्तत्वादयः पदार्थधर्म-सङ्ग्रहस्येष्टसिद्ध्यनुकूलत्वप्रयोजिका उक्तयः । सूत्रञ्च "तद्वचनादाम्नायस्य प्रामाण्यम् [2] " इति । तत्पारवर्तिभिराचार्यैरपिकेश्चः परमात्मनश्चर्चा स्वस्वग्रन्थेषु,

---

१ पदार्थधर्मसङ्ग्रह मङ्गलश्लोकः ।

२ वै. सू., १।१।३ ।

क्ता । उदाहरणानि - किरणावलीकन्दलीन्यायलीलावती सेत्वादयः प्राचीना अर्वाचीनाश्च टीकाग्रन्थाः । तदनुरोधिनिप्रतिपादनशैली प्रकृतग्रन्थकृतोऽपि, यथा- इष्टदेवतानमस्कारस्य परमैश्वर्यप्रतिपादकशास्त्रारम्भात्प्राक्कालीनत्वमाह श्रीशम्भुमित्यादिनेति, विशेषस्तत्तद्ग्रन्थाध्येतॄणां स्फुट एव ।

इयं षड्ग्रन्थी स्वस्वसिद्धान्ताविरुद्धार्थसाधिका विवेचिका च सर्वशास्त्रसङ्ग्रहाणां नैकत्र पर्यवसाना कुत्रचित् - अपितु प्रातिस्विकि, अतथात्वे नियतसिद्धान्तज्ञानार्जनत्वदतिरिक्ततच्छास्त्रसङ्ग्रहचिकीर्षुरीतिप्रतिज्ञाव्याकोपाच्च, एवं हि मङ्गलेन तथाविधेन सामान्येन भाव्यम्, प्रकृतग्रन्थानुसारात् । अतो मङ्गलश्लोकपूर्वार्धार्थं इत्थं प्रतिभाति -

ईश्वर आत्मभेदान्तर्गत अत आत्मत्वजातिमान्व्यापकोज्ञानाधिकरणरूपश्च । आत्ममनइन्द्रियसंयोगनिबन्धना शरीरावच्छिन्नआत्मनिज्ञानोत्पत्तिस्तद्विरहाच्च न घटादौ तथेतिव्युत्पादितं मुक्तावल्यादौ । शरीरावच्छिन्नस्यात्मनः प्रत्यक्षानुमानगम्यत्वं वैशेषिकाणामभिमतम् ।

कः खलु प्रत्यक्षस्य विषये वायुरग्निर्वा ? यदिवायुमात्रं तदानुपपत्तिस्तस्यप्रत्यक्षाविषयत्वादृशरीरेपि तस्योपलभ्यमानत्वाच्च, यदिचाग्निस्तदापि पूर्वोक्तदोषस्यातिवृत्तितः, वायुवनाधारेणाग्नेर्वृत्तित्वाभावात्, तस्मादग्निवायूवीः पृथगेव स्वनिमित्तवशादध्यात्मभावमापन्नः शरीरस्त्यात्मेति निश्चयः ।तथोपदिशः "न वायुक्रियेपृथगुपदेशात्[1] " इति सूत्रभाष्ये, श्रुतिरप्येतदनुक्ता 'तस्याः शिखायामध्ये परमात्माव्यवस्थितः[2] " इत्युपनिषदि सुषुम्नाकाण्डस्थितज्ञानान्तुगतानामूर्ध्वमुखानां वेगानामाश्रयभूतो वन्हौ परमात्मत्वमाम्नातम् । वैष्णवे तु जाठराग्नेरीश्वरत्वेनोपासनं सिद्धमेवातो न्याय-

---

१ ब्र.सू. शां.भा. २।४।८ ।

२ तै.संहिताक्रमेण कृ. भूमिकायां राजेश्वर द्राविड़ः ।

वैशेषिकैस्तैजसविषयत्वेन परिगणितस्याप्युदर्याग्नेरात्मभेदाग्नितत्त्वं निष्प्रत्यूहम् ।

अस्मिन्नर्थे स्मृतिरपि -

“अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।
प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम्[1] ॥” इति

कुसुमाञ्जलावपि वाचोभङ्ग्या सूचितम् -

“देवताः सन्निधानेन प्रत्यभिज्ञानतोऽपि वा[2]” इत्यादि विस्तरतोविभीता वयम् । एतत् सर्वं सम्यगुपपादितं राजेश्वरशास्त्रिमहाभागैः[3] ।

पूर्वमीमांसायां भाष्यवार्तिककाराभ्यां प्रदर्शिता आत्मन अस्तित्वसाधिका युक्तिः, सूत्रेषु सा नैव प्रदर्शितेति तन्न्यूनतापरिपूरणाय “भगवतोपवर्षेण पूर्वतन्त्रे आत्मास्तित्वाभिधानप्रसक्तौ शारीरके वक्ष्याम इत्युद्धारः कृतः[4]” इत्यभियुक्तोक्तिः पुरत एव । विदुषाम् । पुरस्कृत्यैव सर्वशेषिभूत आत्मा मीमांसकानामप्यभ्युपगत एव । उक्ततन्त्रेऽस्तीत्युक्तम्, तत्र सूत्रमपि ‘जन्माद्यस्य’ इतीदृक्साधकम् ।

“प्रकृतिस्त्रिवर्णा बहुरूपं विकारजातं जनयति, अविदुषा दीक्षितेनोपभुज्यते विदुषा च परित्यज्यते[5]” इति रूप कल्पनासाम्येनोक्तिरियं

---

१ गी. १५। १४ ।
२ कु.का. १।१२ ।
३ न्या.कु.प्रस्तावना ।
४ ब्र.सू. शाभा. ३।३।५३ ।
५ ब्र.सू. शां.भा. १।४।१० ।

"पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृति [१]" इति सांख्यसिद्धान्तानुकूलं, अतः सांख्यानामपि पुरुषआत्मस्थानीयः । ईश्वरसांख्यस्य योगपदाभिधेयस्य तु कण्ठत एव स्वीकारः । ईश्वरलक्षणं तन्मतविवेकी उपपादितमेव ।

अतः सर्वतान्त्रिकसम्प्रदायैः सादादभ्युपगमवादेन वा स्वीकृतस्येश्वरतत्त्वस्यात्मभिदात्वरतस्य सर्वशिष्टानां परमेश्वरस्य युक्तमेव मङ्गलरूपमुपासनम् । एतच्च टीकाकृतापि लेशतः सूचितमेव वैशेषिकप्रक्रियानुवर्तिकिञ्च्चमश्लोकस्थ "एकः परमेश्वरः" इत्यंशव्याख्यायाम् "प्रथमश्लोके कथित ईश्वरः परमात्मा स एकः" इत्यादिना । तथाच मङ्गलपद्यस्य वैशेषिकानुसारिव्याख्यानं तस्य श्लोकस्य तत्प्रक्रियानुवर्तित्वविघातमात्रम् । सामान्यपरत्वेनापि विशेषणानां संलापयितुं यथोक्ततयोपपादितमेवेति ।

वैशेषिकम्

एवं द्वितीयेन श्लोकेन मोक्षस्य परमप्रयोजनतां पदार्थसामान्यलक्षणप्रक्रियां प्रदर्श्य द्वितीयतृतीयाभ्यां पदार्थविभागमभावस्य पदार्थनिषेधपरत्वेनापदार्थत्वञ्चोपपादयत् । चतुर्थादिद्वादशान्तैः श्लोकैः सामान्यतः पदार्थानां लक्षणपरीक्षाः प्रदर्शिताः । पदार्थज्ञानस्य परमं प्रयोजनञ्च मोक्षप्राप्तिः । स च दुःखध्वंसजन्यो दुःखमात्रविलयो वैवल्यरूप इति निधार्य दर्शनप्रक्रियोपसंहृता ।

न्यायः

वैशेषिकदर्शननिरूपणेनानिरूपितप्रायेषु न्यायदर्शनगतविषयेष्वपि दृष्टिपात अवसरप्राप्तः, तमनुरुध्याऽऽकरग्रन्थानुरोधित्वेन ग्रन्थप्रणेतृवैशिष्ट्येन-

---

१ सां.का. ५९ ।

चातितरां प्रकाशते विषयदीधितिप्रकाश इति व्यापायात्र स्थलविशेषो-दाहरणम् । तदेव निदर्शनतामुपेत्य साधकं भवत्यन्यत्रापि तादृशी प्रक्रियोपयो-गिनीति । अत एवास्यदर्शनस्याऽऽन्वीक्षिकीत्वमिति नामनिरुक्ति साधूपपादि-तम् ।

निग्रहस्थानस्य विप्रतिपत्त्यप्रतिपत्तिभेदेनद्विविध्यम्, विरुद्धाप्रतिपत्ति-र्विप्रतिपत्तिः, उभयकोट्यनुगतज्ञानप्रतिपादकं वाक्यम् । अप्रतिपत्तिश्च अज्ञाता प्रतिपाताप्रतिपत्तिरूपस्थापितविषयकमज्ञानम् । तदुभयमप्यभिप्रेतार्थसाधनाऽ-पार्थकम्, अत अनयोर्निग्रहस्थानत्वम् । अन्यथा ज्ञाने विषयाप्रतिपत्तौ वा वादी निगृहीतोभवतीति विशेषतो न्यायालयेष्वेव प्रमाणीक्रियते ।

एवं निग्रहस्थानान्तर्गता अपि हेत्वाभासा विशेषतो विविक्तास्तत्र-तत्राकरेषु । तस्य सामान्यविशेषभावेन प्रक्रियाविस्तारो नव्यन्यायसरणिषु । तत्त्वनिर्णयविजयप्रयोजकत्वं तस्यापरिहार्यम्, तत्संख्यायामप्यस्ति विप्रति-पत्तिः । वैशेषिके त्रय एव हेत्वाभासाः "अप्रसिद्धोऽनपदेशोऽसन् सन्दिग्धश्चा-नपदेशः[१]" इति सूत्रोक्ताः, अप्रसिद्धः - असिद्धः, असन् - पदावृत्तिर्विरोधः, सन्दिग्धः - सव्यभिचारः, अन्येषामिष्वेवान्तर्भावात्, तथाचासिद्धविरोध-सव्यभिचाराणां हेत्वाभासत्वमित्येकेषां मतम् ।

असिद्धविरुद्धसन्दिग्धानपदेशानां चतुर्णां हेत्वाभासत्वमाम्नातं पदार्थधर्मसंग्रहे[२], तथैव न्यायलीलावतीकृद्वल्लभाचार्याणामपि "असिद्ध-विरुद्धसव्यभिचारानध्यवसिता[३]" इति सम्मतिर्हेत्वाभासचतुष्टये । मीमांसकमते

---

१ वै. सू. ३।१।१५ ।

२ पदार्थधर्मसंग्रहेलिङ्गकप्रकरणम् ।

३ न्या. ली. हेत्वाभासप्रकरणम् ।

उक्तसूत्रीकास्त्रय एव हेत्वाभासाः "असिद्धिः अनैकान्तिकत्वम् बाधकत्व-
ञ्चेति त्रयो हेतुदोषाः[1] " इति शास्त्रदीपिकावचनात् । बाधकत्वं-विरोध-
बाधश्च, अनैकान्तिकत्वं- सव्यभिचारः सत्प्रतिपक्षश्च । न्याये तु "सव्यभि-
चारविरुद्धप्रकरणसमसाध्यसमकालातीता हेत्वाभासाः[2] " इतिसूत्रीकाः पञ्च।
प्रकरणसमः - सत्प्रतिपक्षः, प्रकरणसमसाध्यसमः - असिद्धः, इति तत्तच्छास्त्र-
सिद्धान्तानुसारिण्यभिमतिस्तेषाम् ।

प्रकृतग्रन्थकृदभिमतास्तु हेत्वाभासाः षट्, ते च "असिद्धविरुद्धानैकान्ति-
कानध्यवसितकालातीतप्रकरणसमाख्यभेदात् " इति अत्रापि प्राकृतवैकृतभेदेन सो
द्विविधः, तदुभयभेदपरिगणनेन सर्वेषामित्येकत्र परिगणयितुं विबुधायुषापि
अशक्यम्, अतएव नव्यन्यायविधासु प्रथमं सामान्यलक्षणं हेत्वाभासस्य, ततश्च
वैकृतेषु प्रधानभूतानां सव्यभिचारबाधसत्प्रतिपक्षाणां प्रकरणशो विभज्य
परिष्कारचिन्तोत्थापिता गङ्गेशोपाध्यायैश्चिन्तामणिकृद्भिस्तदनु च
दीधितिस्तस्या अपि प्रकाशो जगदीशगदाधरप्रभृतिभिर्विद्वद्भिः स्वप्रयत्नात्कृत
इत्यतिरोहितो विद्वन्मण्डलीषु । अतएव अनेकधाप्रसृतेष्वपि हेत्वाभासेषु
तत्प्रवृत्तिनिमित्तानुगमकत्वं सव्यभिचारत्वविरुद्धत्वसत्प्रतिपक्षत्वासिद्धत्वबाधि-
तत्वानां नान्यत्रेति न्यायसिद्धान्ताधारेण विस्तारो नव्यन्यायविधासु
परिलक्ष्यतेऽद्यत्वेऽपि । सा विधोपादेयतमा, अतस्तस्या एव प्रभावो व्याकरण-
साहित्यवेदान्तादिनिबन्धग्रन्थेषु परिष्कारप्रणाल्या निष्कर्णीयेषु ।
एतत्सरणिसादृश्यं सूचयन्त्यनेकत्र इत्यत्र प्रमाणं युक्तायुक्तत्वविवेचनचतुरप-
ण्डितमण्डली ।

---

१ शास्त्रदीपिका हेत्वाभासप्रकरणम् ।
२ न्या.सू. १।२।४ ।

ततः पूर्वमपि अनेकभेदभिन्नस्यानेकशाखाप्रसृतस्य हेत्वाभासस्य निरासं विना वाक्यामामदुष्टत्वसम्पादनमिव सन्दिग्धम्, तथात्वेचार्थसिद्धिः प्रत्यूहिता। अभिलक्ष्यैतत् सूत्रविवरणकर्तृभिरुद्योतकरवाचस्पतिमिश्रप्रभृतिशास्त्रतात्पर्यविद्भिः सामान्यतो विशेषतश्च तत्परिचयो निर्वर्तितः स्वस्व ग्रन्थेषु यथा -

"कालपुरुषवस्तुभेदानुविधानेनापरिसंख्येयः, सामान्यतः साध्यवस्तूपग्रहणेन हेतुहेत्वाभासभेदः प्रपञ्च्यमानः षट्सप्ततिशतम् । तत्र साध्यव्यापकधर्मभेदः षोडशधा, साध्यैकदेशवृत्तिभेदोऽप्येवम्, एवं साध्यावृत्तिधर्मभेद इति । विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्ठिः, एवं समर्थासमर्थविशेषणविशेष्यभेदादिति" इति वार्तिकम् । अत्र तात्पर्यटीका- "एतस्यां त्रिषोडश्यां साध्यव्यापकसाध्यैकदेशवृत्तिधर्मभेदात् षोडशीद्वयम्, विशेषणविशेष्यासिद्धिभेदाच्चतुःषष्ठिः । एवं समर्थासमर्थविशेषणभेदाच्चतुःषष्ठिः । तदेतच्चतुःषष्ठिद्वयमष्टाविंशतिकं शतम् । पूर्वया त्रिषोडश्यासह षट्सप्तकं शतम्" इति ।

नन्वेतद्विभागप्रभाविता ग्रन्थकृतस्तेनात्रासिद्धिभेदा एकादशधा प्रपञ्चिताः, एतेषां पुनर्द्वैविध्यं निर्दिष्टम् । एवं ह्यनैकान्तिकस्य, अनध्यवसितस्य, कालातीतस्यच भेदाः सलक्षणमुद्दिष्टाः । तदत्रविशेषः - बाधव्यभिचारासिद्धविधानां परिगणनं विशेषतो न्यायवैशेषिकनिबन्धेष्वधिकन्ततोऽप्यत्वं मीमांसानिबन्धेषु, बौद्धजैनसांख्येषु प्रसङ्गागतत्वेनैव नोद्दिश्यतया, न्यायवैशेषिकायुद्दिष्टा एव तेषामभिमताः । अतो विशेषचर्चाविदुषां अभ्युपगमसिद्धान्तनिवाहकाः, अतो न न्यूनत्वं कुत्रापि ।

न्यूनत्वन्तुप्रयोगविकलानाम्, प्रमाणप्रमेयादिपदार्थानां सर्वशास्त्रोपकारकत्वमिव परप्रयुक्तदोषोद्धारणेन शास्त्रलोकोपकारकत्वं निग्रहस्थानानामपि

समानम्, तदुभयप्रकाशकं न्यायमीमांसादिशास्त्रम् । अतः प्रदीपमिव प्रदीपस्य न्यायमीमांसादिसिद्धन्यायस्य प्रयोगो न्यायालयेष्वप्यपेक्षितो निर्णयस्यादुष्टत्वसम्पादनाय, तदर्थं तत्र पौरस्त्यपाश्चात्यविद्वत्सहकारितायां काचिद् योजना परिचालनीया, तुलनात्मकसमीक्षाविधयोभमविधप्रक्रियानिष्कर्षितं विधिस्वरूपजनतासु प्रख्याप्य तदनुसारेण प्रशासनप्रमुखा अनुरोद्धव्याः ।एषा च परिपाटी प्रजातान्त्रिकशासनपद्धत्यनुकूलाऽधिकाधिकजनानां हितावहा च ।एवं विधेषु प्रयत्नेषु संस्कृतविश्वविद्यालयस्यापेक्षिताग्रसरता प्रयत्नसाध्यत्वेऽपि प्रभावकारित्वउन्मुखत्वमस्त्येति विभावयामि ।

पूर्वमीमांसा

पूर्वमीमांसायां मतद्वयमित्यविदितं परिचयं, वैशेषिकसम्मतस्य पदार्थविभागस्य नियम्यत्व न भट्टानामभिमतम्, तथात्वे कार्यलिङ्गेन न प्रवृत्तिनिवृत्तिभवतः । अतो भिन्नानुवृत्तात्मकमनन्तमेव तत्त्वम् । नित्यं द्विविधम्, पृथिव्यादयः परिणामिनित्याः, प्रवाहनित्यत्वात् । कूटस्थनित्यास्त्वविकारिण आकाशादयः, संसारस्यानादित्वभङ्गभिया सर्गप्रलययोरस्वीकारः, परिणतिरहिता जीवाः स्वकृतधर्माधर्मानुसारेण शुभाशुभफलभोक्तारः इति सामान्यतो मीमांसासिद्धान्तः प्रथमश्लोकेन व्यक्तीकृतः ।

धर्मस्य प्राधान्यमीश्वरवादरहितादृष्टविशिष्टत्वम्, अन्ये आनुषङ्गिकाः, यतो जीवानां शुभाशुभफलभोक्तृत्वजननविज्ञत्यादयो धर्माधर्मजन्याः, नान्यत् कारणं भोगापवर्गादौ । ईश्वरः पृथक्कल्पितः तर्हि किं प्रयोजनं तस्य कारणकोटिप्रविष्ट ईश्वरः अदृष्टश्चेतिचेत् तथासति कारणद्वयमापद्येत, तच्च न संभवति, धर्मादेरेव कारणत्वस्य शास्त्रयुक्तिसिद्धत्वादीश्वरकारणतावाद अन्यथासिद्धः, ईश्वराभावादेव संसारस्यानादित्वम्, तत एव पूर्वोक्तफलानुबन्ध उत्तरत्रापि संभवति । सादित्वे तु परम्पराविच्छेदेन पूर्वोक्तफलानुबन्धस्यो-

चरिष्वसंभवात्कृतहानाकृताभ्युपगमप्रसङ्गः, अतः सर्गप्रलयौ भाव इति ।

प्रलयश्चतुर्विधः, नित्यः प्राकृतः, नैमित्तिकः आत्यन्तिकश्च । तत्र नित्यः - सुषुप्तिः । प्राकृतः - कार्यब्रह्मनाशजन्यः सकलकार्यनाशः । नैमित्तिकः - कार्यब्रह्मणो दिवसावसाननिमित्तकः सकलकार्यनाशः । आत्यन्तिकस्तु सर्वमोदात्तत्त्व- ज्ञानजन्य इति तद्विदः । नैयायिकास्तु जन्यभावानधिकरणकालविशेष इत्याहुः । एतेषु चतुर्षु प्रलयेषु चरमस्यैव नास्तित्वमन्येषामापेक्षिकत्वेन प्रलयत्वव्यवहारो भाक्तः । तथा च खण्डप्रलयोत्तरसृष्टौ पूर्वानुभूतं वेदं संस्मृत्य सृष्ट्यादौ प्रवर्तते इति स्मर्यते ।

सर्वस्यापि वेदस्य धर्मे एव प्रामाण्यमतत्पराणामर्थवादादिवाक्यानां विधिवाक्यैकवाक्यतया प्रामाण्यं न स्वतस्तादृशं प्रामाण्यं, भावनागम्यत्वेनैव । भावना च द्विविधा शाब्दी आर्थी च । द्विविधाया भावनाया वाचकः प्रत्ययो 'लिङ्' इति । तत्प्रतिपादकं 'स्वर्गकामो यजेत' इत्यादि विधिवाक्यम् । तच्च वेदप्रतिपाद्यम्, वेदत्वन्तु निरुक्तमधस्तात् । वेदस्य वर्णात्मकशब्दराशित्वात्तस्यानित्यत्वे सर्वं व्याकुलं स्याद् विधिनिषेधजन्यं कार्यजातमिति वर्णात्मकशब्दानां नित्यत्वं ध्वनिव्यङ्ग्यत्वं ध्वनिश्चानित्यत्वं व्यवस्थापि- तम् ।

इत्येतत्पदार्थजातस्य ज्ञानं प्रमाणज्ञानाधीनमिति प्रमाणानि तद्ग्राह्य- विषयव्यवस्थापनमुखेन निरुच्य प्रत्यक्षानुमानागमार्थापत्त्यनुपलब्धीनां षण्णां प्रमाणानामावश्यकत्वं व्यवस्थापितम् ।

द्वादशाध्यायात्मकस्य वेदार्थाभिज्ञस्यातिबृहतो ग्रन्थस्य भाष्य- वार्तिकादि- युतस्याध्ययनेन तस्य तलस्पर्शित्वार्जनं प्रायो दुष्करमभवत् तथापि प्रकृतग्रन्थप्रणेतृ-

महोदयो विद्याव्यसनित्वमभिव्यञ्जयदात्मन इत्येतद्ग्रन्थानुशीलनेन ज्ञायते । प्रमाण- प्रमेयविवेचने सर्वथा न्यूनत्वपरिहाराय प्रयतमानो ग्रन्थकारस्तयोः स्वरूप विवेचननैपुण्यमर्थतोऽप्यधीचकार । यत अतिविस्तृतप्रमेयविधानां स्वबुद्ध्या संकल्प्य शास्त्रमर्यादाक्रमानुरोधेन तेषां प्रमाणगम्यत्वं पञ्चभिः श्लोकैर्भट्टस्य त्रिभिश्च प्रभाकरस्य मतभेदसन्दृब्धं प्रकरणमुपस्थापितम् ।

अतिसंक्षिप्ते प्रस्तुते प्रकरणे सर्वेषां प्रमेयाणामनावेशः स्यादतः प्रधानभूतानामतिदेशार्हाणामत्र निरूपणं युक्ततरमित्याकल्प्य पूर्वषट्कान्तर्गताविषयाः प्रायेण निरूपिताः, तत्रापि प्रथमद्वितीयतृतीयपञ्चमाध्यायगताविषया विशेषतः, उत्तरषट्कान्तर्गता तु प्रायो न्यायप्रक्रिया निरूपणान्तः पातिन इति न प्रातिस्विकत्वेन निरूपिताः । तत्रैवबाधो न्यायनिरूपणेन निरूपितो, तन्त्रप्रसङ्गयोर्निरूपणमर्थतः प्रसङ्गमात्रेण, सामान्यविशेषातिदेशावप्यर्थविधया न शक्यतास्तथैव पूर्वषट्कान्तर्गतअधिकारोऽपि । एवं निरूपिते प्रमाणप्रमेयविभागरूपेण व्यवस्थापिते प्रकरणे प्रभावो मीमांसावार्तिकस्य तत्राप्यधिकः श्लोकवार्तिकस्य । प्रमाणत्वेन संगृहीतास्तत्रभवाः श्लोकास्तद्द्वयस्य निरूपका इति ।

साङ्ख्यम्

सांख्यं हि श्रेयोमार्गप्रशस्तकत्वेन प्रत्यासन्नतरमिति यदुक्तं तत् कथम् ? सांख्यसिद्धान्तः परिणामवादः, असत अनुत्पत्तिः, अतः सांख्यतत्त्वकौमुद्यां पुरुषः प्रकृतिश्चोभौ नमस्कृतौ । प्रकृतिनिवृत्त्या पुरुषस्यैकस्यापवर्गेऽपि तेषां बहुत्वादन्यस्यापवर्गोऽसंभव इति निरूपणेन संसारस्यानादित्वमभिव्यञ्जितम् ।प्रकृतिपुरुषविवेकज्ञानादेव मुक्त्युपपत्तौ परमेश्वरो व्यर्थ इत्यपि तेषामभिमानः ।

एकस्मिन्नेव ब्रह्मणि नामरूपक्रियारोपादुपाधिनिमित्तक अनेकत्वव्यवहार इति सद्रूपाधिष्ठाने ब्रह्मण्येव प्रपञ्चस्य कल्पितत्वमिति च निर्मितं सत एव वस्तुतो विविधाकारेण परिणाम इति तत्सिद्धान्तस्य सारूप्यमिव भजते, उभयत्र सत्त्वेन साम्यादतो विवर्तवादस्य समीपवर्ती परिणामवाद इत्युक्तम् । वस्तुतो भाव-रूपस्य त्रिगुणस्याज्ञानस्य समानसत्ताककार्यतया परिणामत्वम्, परमार्थसदधिष्ठा-नभूतब्रह्मणो विषमसत्ताककार्यतया विवर्तत्वमिति विवेकः । सन्ति चैतदुपोद्बल-कानि प्रमाणानि- "भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत्" इति, आपाततः परिणामवादाभ्युपगमेन "तदनन्यत्वमारम्भणशब्दादिभ्य" इति तु विवर्तवादे परमसिद्धान्तदशायां न शङ्का नचोतम्" इत्यद्वैतसिद्धिः । संक्षेपशारीरके च-

"आरम्भसंहतिविकारविवर्तवादा-
नाश्रित्य वादिजनिता खलु वावदीति ।
आरम्भसंहतिमतो परिहृत्य वादौ
द्वावत्र सङ्ग्रहपदं नयते मुनीन्द्रः ॥

तत्रापि पूर्वमुपगम्य विकारवादं
भोक्त्रादिसूत्रगतमर्थ विरोधनुत्त्ये ।
प्रावर्तत व्यवहृतेः परिरक्षणाय
कर्मादिगोचरविधावुपयोगरीतिः ॥

विवर्तवादस्य हि पूर्वभूमिर्वेदान्तवादे परिणामवादः । इत्यादयः । सर्वमिदं शारीरकभाष्यमूलकम् - आरम्भणाधिकरणभाष्ये "अभ्युपगम्येमं भोक्तृभोग्यलक्षणं व्यावहारिकं विभागम् "स्याल्लोकवत्" इति परिहार उक्तः, न त्वयं विभागः परमार्थतोऽस्तीत्यर्थः" इति चन्द्रिका । एवं युक्त्यन्तराण्यप्यभ्यूह्यानि प्रभवन्ति सुधियः । तथा च परिणामवादस्य विवर्त-वादप्रत्यासन्नत्वकथनं नामुक्तमिति व्यवस्थापितम् । अभिप्रत्येदमद्वैतवादपूर्व-

वृत्तित्वेनोपस्थापितं प्रकरणम् । प्रकरणप्रतिपादिताः पदार्थाः सांख्यकारिकां प्राधान्येनोपजीवन्तीति प्रकरणदर्शनात्प्रतिभाति । शिष्टं निवेदितपूर्वम् ।

वेदान्तः

प्रस्तुतग्रन्थक्रमेण चरमा प्रक्रिया वेदान्तदर्शनस्य घटते च चरमत्वं शास्त्रसिद्धान्तप्रक्रियायामपि । तत्त्वकञ्च पुच्छब्रह्मप्रतिपादकत्वरूपम् "ब्रह्म पुच्छं प्रतिष्ठा" इति श्रुतेः । प्रतितिष्ठत्यस्यामिति प्रतिष्ठा पुच्छमिवपुच्छमधालम्बनसामान्याद् यथा गोः पुच्छम् । तथाऽन्नमय- प्राणमय- मनोमय-विज्ञानमयकोशपर्यन्तानामुत्तरोत्तरत्वेनाऽऽधारभूत आनन्दमयकोशस्तस्यत्वाधारभूतं पुच्छं ब्रह्मैव, आनन्दमयपर्यन्तस्याज्ञानकल्पितत्वम्, विकारार्थेन "मयट्" प्रत्ययेन तथा बोधनात्, प्रचुरार्थकत्वेऽपि तथात्वमव्याहतम् "ब्राह्मणप्रचुरोग्राम" इति वत्, यथोक्तस्तथा स्फुटमानन्दमयाधिकरणटीकासु । पुच्छश्रुतिव्याख्यावसरे भगवत्पादाः "एवमन्नादिकृष्यमाणस्यानन्दमयस्याऽऽत्मनः परमार्थब्रह्मविज्ञानापेक्षया ब्रह्मपरमेव यत्प्रकृतं सत्यज्ञानानन्तलक्षणं यस्य च प्रतिपत्त्यर्थं पञ्चान्नमयादिमयाः कोशा उपन्यस्ताः । यच्च तेभ्योऽभ्यन्तरो येन च ते सर्वे आत्मवन्तस्तद् ब्रह्म पुच्छं प्रतिष्ठा । तदेव च सर्वस्याविद्यापरिकल्पितस्य द्वैतस्यावसानभूतमद्वैतं ब्रह्म प्रतिष्ठा । आनन्दमयस्यैकत्वावसानत्वात्[1]" इति । अतोऽप्यन्वर्थतमं वेदान्तदर्शनमर्थतोऽपि चरमम् न केवलं शब्दत इति युक्तम् ।

अत्र हि प्रथमेन कृता प्रतिज्ञा द्वितीयेन पूरिता तटस्थस्वरूपलक्षणे परपदाद्गुणेन निरुच्य प्रसङ्गतस्तत्र प्रमाणं साधु निरूपितम् । पुनश्च पूर्वोदितपदास्थापनमुखेनातः साधकत्वं बाधकनिराकरणपूर्वकं "सकलवाङ्मनसातिगता चितिः सकलवाङ्मनसव्यवहारभाक्[1]" इति न्यायेन निरूपितम् ।

---

१ संक्षेपशारीरकम् १।३३१ ।

जीवस्य जीवत्वमावरणानपगममात्रेण, आवरणं त्वनाद्यविद्योपाधिरूपम् । तदपगमे स्वस्वरूपावाप्तिरूपा मुक्तिः स्वत एवाऽऽविर्भवतीत्युपपाद्य मुक्तिलक्षणं प्रपञ्चितम्, एवञ्चेदमीयं प्रकरणमपि समापितम् विवेचितञ्चेदमीयं प्रकरणं परमसिद्धान्तप्रदर्शनमुखेन न तु प्रक्रियामात्रनिदर्शनेनेति ।

विवेचितोऽयमेवं सृष्टिदृष्टिसृष्टि सृष्टिवादाविहाभिहितौ । परमेश्वरस्या-विद्यागसंस्कृतमज्ञानं कारणात्मना परिणमति तदनु तत्कारणसहितस्य कार्यात्म-नापरिणामः स हि सृष्टिदृष्टिरुच्यते, सृष्टौ सत्यां दृष्टिरनेन सृष्टिदृष्टिः । अत्र परमार्थभूतं वस्तु ब्रह्मैव, व्यवहाराबाध्यं घटादिः, व्यावहारिकसत्ताधिक-रणत्वात्तेषाम्, ब्रह्मज्ञानोत्तरं तेषां बाधः । शुक्तिरजतादौ तूक्तरीत्यैतन्मतेऽपि दृष्टिसृष्टिरेवाऽभ्युपेयत इति सृष्टिदृष्टिवादः ।

दृष्टिसृष्टिवादस्तु परमसिद्धान्तोऽद्वैतवादिनाम् । अत्र हि दृष्टान्तं शुक्तिरजतादिः, तस्य मिथ्यात्वमुभयवादिसिद्धम् वियदादिप्रपञ्चस्य तु तुच्छ-विलक्षणत्वं प्रमाणतः सिद्धम्, शुक्तिरजतादौ रजतत्वप्रकारकभ्रमेण दृष्टिप्रतीतिः, तत्र शुक्तित्वप्रकारकनिश्चयेन रजतत्वप्रकारकभ्रमनिवृत्तौ रजतावयवजन्यत्वभ्रमस्यापि निवृत्त्या पूर्वतनी दृष्टिर्बाधिताभवतीति दृष्टपूर्वकमेव सृष्टिः । एवञ्च स्वज्ञानव्याप्यत्वं स्वीयाज्ञानाभावव्याप्यत्वं वा दृष्टिसृष्टिरिति पर्यवसन्नम्। अस्यादृष्टे उक्तञ्च-

"तत्त्वविदमानदृष्टिरधमा तत्त्वदातिमध्यमा
तत्त्वप्रच्युतिविभ्रमपातिकरी तत्रान्त्यदृष्टिर्मता ।
जीवैकत्वमुदन्तिदगातितो व्यापिदृष्टिर्द्विधा
भिन्ना तत्र च पूर्वपूर्वमितरस्यादूर्ध्वोर्ध्वकक्षाभवेत् [१]।।" इति।

विशेषस्त्वद्वैतसिद्ध्यादिमदीयनिबन्धेषु विस्तरः ।

---

१ संक्षेपशारीरकम् २।८३ ।

अद्वैतसिद्धान्तस्य जीवातुभूता व्यावर्तिकेयं वादत्रयी वस्तुनिरूपणानुगुणा, अतोऽत्र सा सर्वथोपपादिता अन्यथा ज्ञानोत्पत्तिप्रक्रियायाः प्रतिकूलत्वेन विपर्ययपर्यवसायित्वसंभावनाप्युद्गच्छेदतस्तस्या अंशतोऽप्यग्रहणं ग्रन्थस्य गौरव-भङ्गभयनिबन्धनं न्यूनत्वम् ।

अद्वैतवादप्रक्रियासु अन्या अपि विशिष्टता निरूपयन्ति विपश्चितः, यथा- आकरग्रन्थानुविधायीनि उक्तिप्रत्युक्ती, बिम्बप्रतिबिम्बवादो विवरणा-नुयायिनाम्, अवच्छेदवादो भामत्यनुवर्तिनाम्, आभासवादस्तु वार्तिककृतामिति विवेकः । तत्र तत्र तत्तन्मतनिरूपणपरमहानिबन्धादावुपलभ्यते तत्तन्मतवैशिष्ट्य-मित्यतिरोहितम् । एतस्यार्थस्यात्रानुस्यूतत्वेऽनितरसाधारणत्वशालिनी प्रक्रिया अत असाधारणार्थबोधिनी पटीयसीति विद्वदभिमतिर्भविष्यदिति मे मनीषा ।

ग्रन्थगौरवम्

गुणदोषयोरन्यतमत्वनिश्चयावधारणं दुर्लभं देवेष्वपि-

"न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः"[1] इति भगवद्वचनात्, अतस्तोलनीयौ भवतो गुणदोषौ । तुलाया निम्नत्वमुन्नतत्वञ्च लघुत्वगुरुत्व-निमित्तम्, तौ च निरूपणसापेक्षौ इति । तन्निरूपणं प्रायः समयोनात्यधि-कन्यूनयोस्तथा च कथमत्रातिन्यूनदोषेण गुणस्य तुला संभाव्येत, भविष्योपहा-सास्पदम्, अतो ग्रन्थकृद्गुणानामास्तदोषतिरोधायकतेति निष्प्रत्यूहम् ।

प्रकरणशो विभज्य विवृताः कतिपये विषयास्तद्गताश्च विशेषताः, भवति हि शिष्टं तैरेवातिदिष्टव्यम्, तथापि किञ्चिदेवावधातव्यं ग्रन्थकृद्वै-शिष्ट्यम् -

---

१ गीता १८।४० ।

"अतिविस्तरभारं मानवानांविहीनं
प्रचितबहुविकल्पं प्रक्रियाजालदुस्थम् ।
उदधिसमनन्तं तन्त्रमितिप्रवदन्ति
प्रलयजडधियो ये तेऽनुकम्प्यन्त एते [1] ॥" इत्युक्तिर्वैशेषिक-शास्त्रस्यातिगहनत्वं द्योतयति, गहनेऽप्येवं विधि 'पदैः सुविधिप्सितम्' इति स्वयमभिधानेनातिगभीरया सरल्या मञ्जुलया तच्छास्त्रसिद्धपदार्थानामवबोधनं साधुविधाय -

"द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।
यस्य न स्खलिता बुद्धिस्तं वै वैशेषिकं विदुः ॥" इत्युक्तिं पस्पर्श । प्रमाणादीनां पदार्थानां निरूपणं शास्त्रशैल्या सम्पाद्य हेत्वाभासानां निर्वचनं प्रतिबध्यप्रतिबन्धकभावस्य सौदर्म्यं साधुभावयत् । एवं हि न्याय-वैशेषिकशास्त्रपदार्थानामन्तर्भावविवक्षिणीं श्लोकानां पञ्चदशकमुपनिबन्ध तदनु च मन्दानुग्राहकत्वेन स्वोपज्ञां टीकां 'कल्पलतिका' भिधां वस्तुतः कल्पलतिकामिव, यथा न्यायशास्त्रस्य सर्वांशस्वीकारकत्वे न केऽपि विप्रतिपद्युः प्रतिपत्तार इत्यस्ति भवतां पुनः करबदरनिभम् ।

तथैव धर्ममीमांसाशास्त्रस्य संदीपी पिप्राभाकरभाट्टमतपार्थक्यप्रबीजकरूपनिरूपणमुखेन प्रादर्शि, संदीपीऽप्यत्र केवलं शब्दानामर्थतस्तु तत्र प्रसूतानामुपदेशप्रधानानां वैदिकलौकिकानामर्थानां प्रकृतप्रकरणान्तर्भूतैव । सांख्यस्योत्तरमीमांसायाश्च सिद्धान्तं संदीप्याऽऽत्मबुद्धिः सर्वशास्त्रानुगामित्वं प्रामाणिकत्वम् । रामानुज- मध्व- वल्लभ- निम्बार्काचार्यैः परिष्कृतानां क्रमशो विशिष्टाद्वैत-द्वैत- शुद्धाद्वैत- भेदाभेदवादानां तथान्येषां कतिचनवादानां वेदमूलकत्वेऽपि सिद्धान्तमात्रप्रदर्शनपरेऽल्पकायेऽस्मिन् प्रकरणग्रन्थेऽसमावेशः कृतो भवेदित्यावेदितमधस्तात् । सर्वदर्शनसारावकलनसामर्थ्यसम्पादनीद्भवति निखिलविषय-

निविष्टशास्त्रप्रणयनशक्तिनैपुणतोचित स्ववंशपरिचयवर्णनोपयोगीपूर्वभाग-गतिनान्यत्रापि पदेनान्वयविधया ग्रन्थ कृतैव स्फुटीकृतम् ।

एतावता सर्वप्रक्रियागतविषयविशेषाणां सत्त्वेऽपि तेषां सर्वेषां समालोचनं ग्रन्थकलेवरवर्धिष्णुत्वप्रयोजकमिति तदुपरित्यज्य दिङ्मात्रमिह निदर्शितम् । तावतैव गतार्थताप्रसङ्गो तथाकरणमन्यथासिद्धमपीति ।

प्राच्यार्वाचीनानां दर्शनसङ्ग्रहाणां षड्दर्शनग्रन्थानामस्ति भूयस्त्वम्, प्राचीनेष्वपि सर्वदर्शनसङ्ग्रह षड्दर्शनसमुच्चयादयो ग्रन्था अर्हन्ति प्रथमगणनाकोटिं तथापि ते सर्वेऽपि विषयाणां सङ्ग्रहविधया महत्त्वमासादयन्ता नैतस्य समत्वभाजः सूक्ष्मार्थविवेचनादिविधावस्ति ग्रन्थोऽयं तेभ्यो विलक्षणः ।

एवं लक्षणपरीक्षाप्रमाणादिविवेचनविधौ स्वस्मादितरां नैपुणीमादधन्नन्यन्यायभाषानिबद्धप्रबन्धकारसादृश्यमावहति तं तं सिद्धान्तमाविष्कुर्वन्नपीति प्रस्तुतग्रन्थाध्ययने स्फुटमभिव्यज्यते ग्रन्थकृतो वैदुष्यातिशयः ।

एतादृशमहिमशालिनो विदुषो देशकालादिसनाथितः परिचयः काङ्क्षन्ति पाठकाः, परिपाटीचापत्वे प्रचलिता तथाविधा, तथापि ग्रन्थोपसंहारगतवंशपरिचायकेभ्यः श्लोकेभ्यो नान्यत् तथ्यमुपलभ्यते वृत्यन्तरं वा तत्साधकम्, तत्तु ग्रन्थान्ते स्फुटमेवास्तीति पुनस्तस्यैव निष्टङ्कनमनावश्यकम् ।

उपसंहारः

पुस्तकमिदं राष्ट्रियाभिलेखालये सुरक्षितं देवनागरीलिपिनिबद्धमपि यावदप्रकाशितमुपलभ्याऽभ्यर्थिता संस्कृतविश्वविद्यालयानुसन्धानसमितिः, उपादेयतादृष्ट्योपयुक्तमिति समित्यनुमत्या सम्पादितं ग्रन्थरत्नम्, अस्य श्रेयोभाजः श्री प्रा. विद्यानाथोपाध्यायास्तदानीन्तनशिक्षाध्यक्षाः, एतेषां प्रेरणया

कार्यमिदमारब्धम् ।

एकोनशतपत्रात्मकपुस्तकान्तर्गतानां षोडशाधिकोनविंशत्यन्तानां चतुर्णा-
मष्टाविंशतितमस्य षट्चत्वारिंशकस्य चैकैकस्येत्याहत्य षण्णां पत्राणामभावः,
खण्डितायामपि पत्रसंख्यायामपिदितोचितानुपूर्वी नैव खण्डितेति ग्रन्थस्य सर्वथा-
ऽवैकल्यम्, वैकल्यन्तु प्राभाकरप्रक्रियान्तर्वर्तिषष्टसप्ततिपृष्ठे 'यथार्थत्वे' इत्यतो
'दण्डेनेत्यादि' पर्यन्तस्य पाठस्याऽऽवृत्तिनिमित्तम् । लेखकानवधानजन्यं तमंशं
विहाय यथायोग्यं सम्पादितम्, कुत्रचिदननुगता विकलाश्च पाठा आसादिता
इति तेषां परिमार्जनं यथामति विहितमपिदितिष्वन्यत्रापीत्युभयत्र टिप्पण्यः
समावेशितास्तथैव ग्रन्थसूचीष्वप्युपलब्धानाम् । शब्दार्थसङ्केतग्रहाभावोद्भूतमत्रका-
ठिन्यमिति विभ्रमवतां पिपठिषूणां पाठकानां च सारल्येनात्र प्रवेशः स्या-
दिति विचिन्त्य ग्रन्थादौ विषयसूचिः सङ्केतसूचिश्च निर्दिष्टे । ग्रन्थेष्व-
व्याख्यातानां ग्रन्थघटकानां पारिभाषिकाणां शब्दानामर्थनिर्देशेन विवेचनं
कारिकाणामकाराद्यनुक्रमणिका सन्दर्भग्रन्थविवरणञ्चेति त्रितयं परिशिष्ट-
रूपेणान्ते समावेशितम् । स्वकृताच टिप्पणिः 'टि.' इत्यक्षरेण सङ्केतिता
सर्वत्र, सा दिग्दर्शिका, इतरा तु प्रामाण्योद्बोधिका ।

षड्दर्शनीसङ्ग्रहे प्रकरणशो विभक्तानां श्लोकानां संख्या त्रयस्त्रिंशत्,
प्रायः सर्वेऽविकलाः, वेदान्तप्रक्रियाद्वितीयश्लोकस्यान्तिमोऽशः खण्डितः स
च न लेखकप्रमादजनितः, अपितु कर्त्रभिनिवेशसिद्ध इति टीकादर्शनतोऽवगम्यते,
अतस्तत्र खण्डिताः शब्दा एव नातोऽर्थविकलन्यूनता । अशुद्धि बहुलस्यैकमात्रपु-
स्तकस्याधारेण पाठनिर्धारणं प्रायो विशेषयत्न साध्यमतस्तत्साध्याया
अशुद्धेरैकान्तिकत्वमत्रेति नैव निश्चयः ग्रन्थोपसंहारश्लोकदर्शनोद्भूतमत्र निदर्शनम् ।

परिष्कृतेऽप्येवं मदनवधानजान्युत्पत्त्यपरिपाकजाश्च दोषा भवेयुरिति संभावयामि, तांश्च स्वयं संशोध्य नीरक्षीरविवेकविधया ग्रहीष्यन्ति मनीषिणः। श्रीमतां गुरुवराणां विद्याभिर्भुवनादिगन्तविश्रुतयशसां ब्रह्मसायुज्यभुजानां पद्मप्रसादभट्टराईमहोदयानां सदुपदेशाः प्रेरयन्ति मामनिशं विद्याभ्यासानुशीलनाभ्यां स्वमतिपरिष्करणाय, तथैव मीमांसानदीष्णानां गुरुचरणानां बुद्धिसागरपराजुलिमहोदयानां, विद्यावारिधिपदाधिगतिनिमित्तकशोधनिर्देशकानां सम्पूर्णानन्दसंस्कृतविश्वविद्यालयवेदान्तविभागाध्यक्षाणां गुरुचरणानां श्री डा. देवस्वरूपमिश्रमहोदयानाञ्च। अतोऽन्यत्र कर्तुमनीशस्तेषां पादाम्बुजेषु एतदम्बुजमुपहरामि सप्रश्रयम्। अन्येषां गुरुकल्पानामुपदेशा मन्मतिवैशद्यप्रयोजकास्तेषामुपदेष्टॄणां बिभर्मि शिरसा कृतज्ञताम्।

एवं महेन्द्रसंस्कृतविश्वविद्यालयस्योपप्राध्यापकाः श्री माधवशरणोपाध्यायास्नितरां कृतज्ञताभाजः। मदीयेऽस्मिन् लेखबन्धे व्याकरणाशुद्धिः साधु परिमार्जिता ऽतस्तैरहं बहूपकृतः। चित्राङ्कनयन्त्रस्य वैकृतावस्थायामप्यनुसन्धानकार्यविरोधो माभूदिति धिया राष्ट्रियाभिलेखालयस्य प्रमुखाः श्री बलरामदासडंगोलमहाभागाः स्वप्रयत्नेनान्यविधं चित्राङ्कनमकारयन्, प्रकारान्तरेण चित्रग्रहणप्रक्रियानभिज्ञस्य मम तैरपि कृतस्वोपकारः। तादृशं सौजन्यमनितरसाधारणमतस्तेऽतितरां धन्यवादार्हाः।

उपस्थापितो मननिष्पन्नोऽर्थः। 'श्रोतव्यो मन्तव्यः' इति श्रु., मननस्यश्रवणोत्तरभावित्वं, श्रवणञ्च गुरूपदेशापेक्ष्यमुपदेशो दितार्थपूर्वकं इति तत्र दोषासंभवेन गुणगणागुणां दोषाणाञ्च स्वकतया ते ममैव।

अतः सुमनोमनोमोदाय बोधायचास्तिकानां भूयादियं कृतिरिति प्रार्थये पशुपतिमुमाधवमिति ।

पाशुपतं क्षेत्रम्
महाशिवरात्री
१२-२-१९९१ ई.

विदुषामाश्रवः

(दीर्घराज घिमिरे)

षड्दर्शनसङ्ग्रहे

विषयाः	पृष्ठम्
१) अथ वैशेषिकमतप्रक्रिया	१-५९
कल्पलतिकारम्भः	१
परमात्मनो लक्षणादिकम्	३
पदार्थसामान्यलक्षणम्	६
पदार्थविभागः	८
द्रव्यलक्षणम्	९
गुणलक्षणम्	१०
कर्मलक्षणम्	११
जातिलक्षणम्	११
विशेषलक्षणम्	१२
समवायलक्षणम्	१३
अभावस्यभावनिषेधरूपत्वम्	१३
द्रव्यविभागः	१४
तमो न दशमं द्रव्यम्	१४
पृथिवीलक्षणम्	१५
अपांलक्षणम्	१६
तेजोलक्षणम्	१६
वायुलक्षणम्	१७
शब्दस्य गुणत्वसाधनपुरस्सरमाकाशलक्षणम्	१७
काललक्षणम्	१७
दिग्लक्षणम्	१८
आत्मलक्षणम्	१८

विषयाः	पृष्ठम्
मनोलक्षणम्	२०
पृथिवीभेदाः	२०
परमाणुलक्षणम्	२०
आत्मनिरूपणम्	२२
मनोनिरूपणम्	२३
सामान्यतो गुणविभागः	२४
चइतिशब्दस्य समुच्चयार्थः	२५
रूपलक्षणम्	२६
रसादिस्पर्शान्तानां निरूपणम्	२७
संख्यानिरूपणम्	२७
परिमाणपृथक्त्वयोर्निरूपणम्	२८
संयोगविभागपरत्वापरत्वनिरूपणम्	२८
बुद्धिलक्षणम्	३०
सुखदुःखयोर्लक्षणम्	३०
इच्छाद्वेषयोर्लक्षणम्	३१
प्रयत्नलक्षणम्	३२
गुरुत्वद्रवत्वस्नेहानां लक्षणम्	३२
त्रिविधसंस्कारनिरूपणम्	३३
धर्माधर्मशब्दानां निरूपणम्	३३
रूपभेदाः	३४
चित्ररूपस्य निरूपणीयत्वम्	३४
[illegible]लक्षणम्	३४
गन्धस्पर्शभेदाः	३६
संख्यादिपृथक्त्वान्तानां विभागः	३७

विषया:	पृष्ठम्
संयोगभेदनिरूपणम्	३८
विभागे विशेष:	३८
परत्वापरत्वयोर्भेदनिरूपणम्	३९
बुद्धेर्विस्तार:	४०
सुखादिसंस्कारान्तविभाग:	४१
धर्माधर्मशब्दानां विभाग:	४५
कर्मविभाग:	४७
जातिविभाग:	४८
विशेषत्वनिर्वचनम्	४८
समवायस्यैकत्वम्	४९
उपसंहारोपक्रम:	५०
पादार्थनिरूपणस्य परमं प्रयोजनं कैवल्यम्	५०
२) अथन्यायमतसङ्ग्रह:	५२-७०
पदार्थोद्देश:	५२
संशयस्य न्यायपूर्वाङ्गत्वम्	५२
प्रयोजनादिसिद्धान्तानां पृथगुद्देशप्रयोजनम्	५३
अवयवानां सभेदलक्षणम्	५५
तर्कादिवितण्डान्तानां स्वरूपविवेक:	५८
हेत्वाभासानां प्रस्तार:	६१
छललक्षणादिकम्	६५
जातिस्वरूपविवेचनम्	६६
निग्रहस्थानानां भेदा:	६७

विषया:	पृष्ठम्
वैशेषिकदर्शनेन: किञ्चिद्वैसादृश्येन मोक्षालक्षण-निरूपणोपसंहार:	६९
३) अथभट्टमतप्रक्रिया	७१-९८
तत्त्वमनन्तम्	७१
संसारस्यानादित्वम्	७२
ईश्वरसत्ताभाव:	७३
संसारस्यानादित्वोपसंहार:	७५
प्रमाणसामान्यलक्षणम्	७५
प्रमाणविभाग:	७६
प्रत्यक्षलक्षणम्	७७
अनुमानलक्षणादिविचार:	७९
उपमानलक्षणम्	८०
शाब्दं प्रमाणम्	८०
अर्थापत्ति:	८१
अभावप्रमाणम्	८२
प्रामाण्यं स्वत:	८२
वेदानामपौरुषेयत्वम्	८४
वेदस्य धर्मेव प्रामाण्यम्	८६
धर्मस्वरूपनिरूपणम्	९०
मन्त्रमयी देवता	९३
वर्णात्मकशब्दस्य नित्यत्वम्	९५

विषया:	पृष्ठम्
४) अथप्राभाकरमतप्रक्रिया	९९-१०७
भाट्टमतादस्य वैलक्षण्यम्	९९
भेदो व्यावृत्तात्मकः	१०१
ज्ञानं यथार्थमेव	१०१
प्रमाणपञ्चकम्	१०२
कार्यान्विते शक्तिः	१०३
कार्यलक्षणम्	१०४
५) अथसाङ्ख्यमतप्रक्रिया	१०७-११५
सामान्यतः पदार्थविभागः	१०७
प्रकृतेर्भेदः	१०८
प्रकृतिलक्षणम्	१०८
महदादिसप्तकस्य स्वरूपम्	११०
पुरुषस्वरूपम्	१११
पुरुषस्य दुःखित्वमध्यासनिबन्धनम्	११३
मुक्तिनिरूपणम्	११४
६) अथवेदान्तमतप्रक्रिया	११६-१३३
सिद्धान्तरूपमिदं दर्शनम्	११६
ब्रह्मणोलक्षणादिकम्	११८
निष्कलक्षणस्य प्रामाण्यम्	१२२
अतात्त्विकस्यापि तात्त्विकसाधकत्वम्	१२४
जीवत्वमनाद्यविद्योपाधिनिबन्धनम्	१२८
मिथ्याज्ञानतत्त्वज्ञानयोरयथार्थत्वेपि निवर्त्यनिवर्तकभावोपपत्तिः	१२९

विषयाः	पृष्ठम्
मीदाकारणं ज्ञानमिव	१३१
मीदालक्षणम्	१३१
कल्पलतिकाया उपसंहारः	१३४
परिशिष्टम्(१) पारिभाषिकशब्दार्थविवरणम्	१३६-१४६
परिशिष्टम्(२) कारिकाणामकाराद्यनुक्रमणिका	१४७-१४८
परिशिष्टम(३) सन्दर्भग्रन्थविवरणम्	१४९-१५२

---ooo---

अथ सङ्केतसूचिः

टि.	- टिप्पणी ।
बृ.उ.	- बृहदारण्यकोपनिषद् ।
या.स्मृ.	- याज्ञवल्क्यस्मृतिः ।
प्र.ख.	- प्रत्यक्षखण्डम् ।
त.सं.	- तर्कसङ्ग्रहः ।
प.ध.सं.	- पदार्थधर्मसङ्ग्रहः ।
वै.सू.	- वैशेषिकसूत्रम् ।
न्या.सू.	- न्यायसूत्रम् ।
न्या.द.	- न्यायदर्शनम् ।
मी.सू.	- मीमांसासूत्रम् ।
श्लो.वा.	- श्लोकवार्तिकम् ।
प्र.सू.	- प्रत्यक्षसूत्रम् ।
ब्र.सू.	- ब्रह्मसूत्रम् ।
वे.स्व.वि.	- वेदस्वरूपविमर्शः ।
कु.प्र.	- कुसुमाञ्जलिप्रकाशः ।
शां.भा.	- शाङ्करभाष्यम् ।
गी.	- गीता ।
कु.का.	- कुसुमाञ्जलिकारिका ।
सां.का.	- सांख्यकारिका ।
न्या.लीला.	- न्यायलीलावती ।

मुण्ड.उ.,मु.उ.	- मुण्डकोपनिषत् ।
शु.यजुः सं.	- शुक्लयजुर्वेदसंहिता ।
श्वेता.उ.,श्वे.उ.	- श्वेताश्वतरोपनिषत् ।
ब्र.वि.उ.	- ब्रह्मविन्दूपनिषत् ।
बृ.उ.भा.वा.	- बृहदारण्यकोपनिषद्भाष्यवार्तिकम् ।
अष्टा.	- अष्टाध्यायी ।
चो.प्र.	- चोदनाप्रकरणम् ।
म.स्मृ., मनु.	- मनुस्मृतिः ।
प्र.प्र.	- प्रत्यक्षप्रकरणम् ।
आ.वा.	- आकृतिवादः ।
अनु.	- अनुमानपरिच्छेदः ।
प्रत्यक्त.प्र., त.प्र.	- तत्त्वप्रदीपिका ।
तै.आ.	- तैत्तिरीयारण्यकम् ।
सम्ब.परि.	- सम्बन्धाक्षेपपरिहारः ।
स्फो.	- स्फोटवादः ।
शब्दनि., श.नि.	- शब्दनित्यताप्रकरणम् ।
छा.उ.	- छान्दोग्योपनिषत् ।
योगसू., यो.सू.	- योगसूत्रम् ।
तै.उ.	- तैत्तिरीयोपनिषत् ।
अ.सि.	- अद्वैतसिद्धिः ।

---ooo---

श्रीकविकुलकैरवेन्दुजाणराजप्रणीतः

षड्दर्शनीसङ्ग्रहः

कल्पलतिकाभिधया स्वोपज्ञटीकयोपबृंहितः

कल्पलतिका

श्रीगणेशाय नमः ।

अथ वैशेषिकमतप्रक्रिया

श्रीमन्निर्मलबुद्धिवैभववती वाचा च संवृद्धये
लोकातीतगुणं विभक्तिरहितं नत्वैकवीरं पदम्
क्वापि क्वापि गभीरभावगहनं षड्दर्शनीसङ्ग्रहम्
व्याकर्तुं रचयामि कल्पलतिकां टीकामभीष्टार्थदाम् ।।

तत्र तावद्वैशेषिकादिशास्त्राणां छात्रैरतिविस्तरतयाधिगन्तुमशक्यत्वात्तदनुग्रहाय तच्छास्त्रसङ्ग्रहं चिकीर्षुः[1] रतिस्फुटतया बुद्धिस्थत्वाद्वैशेषिकशास्त्रसारमेव तच्छास्त्रप्रतिपाद्येष्टदेवतानमस्कारलक्षणं पूर्वं प्रतिजानीते -

श्रीशम्भुं भुवनोद्भवस्थितिलये हेतुं परं तत्त्वतः
सर्वज्ञं भवसागरैकतरणिं नत्वा कृपाणां गुरुम् ।
वक्ष्ये सम्यगवेक्ष्य विस्तरयुतं वैशेषिकं दर्शनं
संदीपेन तदीयसारमुचितं पद्यैः सुविधिप्सितम् ।।१।।

अयमर्थः - वैशेषिकदर्शनं विस्तरयुतमवेक्ष्य तदीयसारं पद्यैः संदीपेन वक्ष्ये ।

---

१ आशीर्नमस्क्रियावस्तुनिर्देशानामन्यतमस्य मङ्गलत्वेऽपि नमस्कारात्मकस्यैव तस्याचरणं विशिष्टफलवत्ताबोधनाय, 'यो नमसा स्वध्वरः' इति श्रुतिः, 'यच्छिवे नम इति हि ब्राह्मणं भवती'ति स्मृतिश्च । टि.

ननु विस्तरयुतं शास्त्रमुपदिश्य कथं[१] छात्राणां संक्षेपशास्त्रेण प्रवृत्तिरित्यत आह उचितमिति ।

अतिविस्तरशास्त्राणां छात्रैः प्रथमतः स्वाधिगन्तुमशक्यत्वात्तदनुग्रहाय प्रवृत्तस्य संक्षेपेण वचनं इत्येवोचितमिति भावः ।उचितमितिक्रियाविशेषणम् ।

ननु वैशेषिकशास्त्रस्य सदोषतया विवादात् तदीयसारस्य सारत्वमेव नोपपद्यत इत्यत आह सुविधीप्सितमिति । शिष्टपरिगृहीतमित्यर्थः ।

अयं भावः । यच्छिष्टपरिगृहीतं तन्नसदोषत्वेन शङ्कनीयम्, अतिप्रसङ्गादिति[२] ।

किञ्च वैशेषिकशास्त्रस्य सदोषत्वं वदन्तः प्रष्टव्याः किमिदं सदोषत्वम् ? मूलप्रमाणविकलत्वं वा प्रमाणाभासमूलत्वं[३] वा? नोभयमपि, प्रतिष्ठितप्रामाण्यकणादादिस्मृतिप्रमाणमूलत्वादस्य शास्त्रस्य । ततो युक्तं तदीयशास्त्रस्य सारत्वमिति ।

'श्रेयांसि बहुविघ्नानी'ति[४] स्मृतिसंभावितपरमश्रेयोविघ्ननिरासा-द्वैतात्सिद्धान्तसिद्ध परमात्मकल्याणेष्टदेवतानमस्कारस्य परमश्रेयः प्रतिपादक-

---

१ यथाश्रुतमूले 'ननु विस्तरयुतं शास्त्रमुपदिश्य कथं छात्रैः संक्षेपशास्त्रमुपदिश्य तदुत्पत्ति राह' इत्यानुपूर्वी दृश्यते, तथाविधायाः प्रकृत्यर्थाननुकूलत्वेन लेखकप्रमादादायाता सेति प्रतीयते । तस्मात्र 'छात्राणां संक्षेपशास्त्रेण प्रवृत्ति'रित्यानुपूर्वी सन्निवेशिता । टि.

२ शास्त्रान्तरदोषे शङ्का कर्तव्येति ।

३ हेत्वाभासमूलत्वमिति पाठान्तरम् ।

४ इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वादिष्टज्ञानं मङ्गलमिति किरणावली कन्दलीसित्वादि परिशीलितः पन्थाः विस्तरस्तु तद्ग्रन्थेभ्य एवावगन्तव्य इति । टि.

शास्त्रारम्भात्प्राक्कालीनत्वमाह श्रीशम्भुमित्यादिना । किं कृत्वा वदीयसां वक्ष्ये श्रीशम्भुं नत्वेति ।

परमात्मनो लक्षणादिकम्

शम्भुशब्देन परमात्मोच्यते, स च किं लक्षण इत्यपेक्षायामाह भुवनोद्भवस्थितिलय हेतुं परं तत्त्वतः सर्वज्ञमिति । तत्र भुवनोद्भवस्थितिलय हेतुमित्येवोच्यमाने[1]ऽदृष्टादावति व्याप्तिस्तत इदमुक्तं सर्वज्ञमिति ।

एवमप्युक्ते वेदान्त्यभिमतपरमात्मन्यर्थान्तरता स्यात्तस्यापि भुवनोद्भवस्थितिलय हेतुत्वात्सर्वज्ञत्वाच्च तत इदमुक्तं तत्त्वत इति । वेदान्त्यभिमतस्तु परमात्मा अविद्ययैव सर्वज्ञो न तत्त्वतः । ज्ञातृज्ञेयविहीनानां चिद्रूपत्वाङ्गीकारात् । तस्मात्तत्त्वतः सर्वज्ञं भुवनोद्भवस्थितिलय हेतुमिति युक्तम् । एवमप्युक्ते हिरण्यगर्भादिष्वतिव्याप्तिः, तेषामपि भुवनोद्भवस्थितिलयहेतुत्वात्तत्त्वतः सर्वज्ञत्वाच्च तदिदमुक्तं परमिति । तदनेन सर्वज्ञो जगज्जन्मादिस्थितिलयहेतुः परस्तत्त्वतः सर्वज्ञ इत्येव परमात्मलक्षणमुक्तं भवति ।

ननु भवतु तर्हि जगज्जन्महेतुः परस्तत्त्वतः सर्वज्ञ इत्येव परमात्मलक्षणं स्थितिलयपदप्रक्षेपप्रयोजनं तु नोपलभामहे व्यावृत्त्यभावादिति चेन्नैवम् - लक्षणत्रयस्य विवक्षितत्वात् । तथाहि -

सर्वजगज्जन्महेतुः परस्तत्त्वतः सर्वज्ञ इत्येकं परमात्मलक्षणम् । एतदेव जन्मपदस्थाने स्थितिपदप्रक्षेपेण लक्षणान्तरम्, तथा स्थितिपदस्थाने लयपदप्रक्षेपेणापि लक्षणान्तरं वेदितव्यमिति ।

---

१ कार्यत्वावच्छिन्नकारणताया अदृष्टादौ सत्त्वात् । आदिपदेन चात्र नित्यज्ञानेच्छाप्रयत्नानामाकाशकालदिशां प्रागभावस्य च ग्रहणम्, तथा च सर्वज्ञत्वोपादानान्नात्र तत्रातिव्याप्तिरिति । टि.

नचावाच्यं जगज्जन्मादेरसंभवादसंभवग्रस्तलक्षणमिदमिति, जगज्जन्मादेरनुमानतः प्रसिद्धत्वात् । तथाहि - विमतं जन्मध्वंसवत् सावयवत्वात् मध्यमपरिमाणवत्त्वात् उपलभ्यमानस्पर्शाधिष्ठानत्वात् घटवदित्यन्वयव्यतिरेकि । ततो नेदमसंभविलक्षणम् ।

ननु तथापि जगज्जन्मादि ईतीस्तत्त्वतः सर्वज्ञस्य परस्याप्रामाणिकत्वादसंभवग्रस्तमिवलक्षणमिदमितिचेत् नैवम्, अनुमानागमाभ्यां यथोक्तस्य परमात्मलक्षणस्य सिद्धत्वात् । तथाह्यनुमानम् -

विमतं सर्वप्रमातृपरकर्तृपूर्वकं कार्यत्वात् यत् सर्वप्रमातृपरकर्तृपूर्वकं न भवति न तत्कार्यं यथा आत्मा न च तथेदं कार्यं न भवति तस्मात्सर्वप्रमातृपरकर्तृपूर्वकं न भवतीति [1] ।

नचाप्रसिद्धविशेषणः पक्ष इति वाच्यम्, सामान्यतोऽनुमानात् तत्प्रसिद्धेः[2] । तथा - विमतं सकर्तृकं कार्यत्वात्कुम्भवदिति जगत्कर्तृकत्वं क्वचित्सिद्धम् । कर्तृत्वञ्च कृतिमत्त्वम्, तच्च ज्ञानत्वैकार्यंतीति[3] जगत्कर्तरि ज्ञानवत्त्वं तावत्सिध्यति । तच्च ज्ञानवत्त्वं प्रमाणलक्षणज्ञानवत्त्वमेव तत्रोचितम्, अप्रमाकारणधर्मरागादेस्तत्राशरीरिण्यभावात् ।

नचवाच्यं जगत्कर्तुरपि शरीरित्वादप्रमात्व[4]धर्मादित्वमपि स्यादिति - शरीरित्वे तदेव शरीरं कुर्यादित्यर्थं तत्रानवस्था तेनैव चेत् - आत्माश्रय इति ।

---

१ जन्मादिरिति पाठः ।
२ परमात्मप्रसिद्धिरिति ।
३ जगज्जन्मादिरिति ।
४ अप्रमात्यत्व इति पाठो मन्ये स च प्रमादिक इति भाति । टि.

तदेवं सामान्यतोऽनुमानेन जगत्कर्तरि प्रमावत्त्वसिद्धेनाप्रसिद्धविशेषणः पूर्वोक्ता-नुमानस्य पक्ष इति स्थितम् ।

आगमश्च "यतो[१] वा इमानि भूतानि जायन्ते" इत्यादि "यः[२] सर्वज्ञः स सर्वविदस्य ज्ञानमयं तपः" इत्यादिश्च परमात्मनो यथोक्तलक्षण-माचष्टे, तस्मादेवंलक्षणं श्री शम्भुं नत्वेति युक्तमुक्तम् ।

ननु महारम्भे गुरुनमस्कारेणापि भवितव्यमित्यत आह गुरुणांगुरु-मिति । परमगुरौ परमात्मनि नमस्कृते गुरुनमस्कारलक्षणमपि मङ्गलमाचरि-तमित्यभिप्रायः ।

ननु इह परमात्मैव किमिति नमस्कारगोचरीकृतो यावन्तः सन्ति सर्वेऽपि गुरवो विघ्नौघविघातपटुतरचरणतया नमस्करणीया इत्याशंक्याह भवसागरैक तरणिमिति[३] ।अयं भावः ।

सन्तु नाम गुरवस्तथा तथापि न ते परमश्रेयोविघ्नभूताऽधर्मरागादि-निवृत्तिनिपुणचरणस्मरणाः परमात्मा तु भवति पदापरविघ्नविघातनिपुण-स्मरणतया ततोऽप्यधिक इति परमात्मैव सकलार्थकदर्थनसमर्थः परमपुरुषैरपि नमस्करणीयतयोपक्रान्तः । तथाच श्रुतिः "तमेव[४] विदित्वाऽतिमृत्युमेति, ना-न्यः पन्था विद्यतेऽयनाय" इति स्मृतिरपि "यदा[५] चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तदा शिवमविज्ञाय दुःखस्यान्तो भविष्यती" ति । तदेवमेवंविधं

---

१ तैत्तरीयोपनिषद् ३।१ ।
२ मुण्ड.उ. १।१।६ ।
३ रूप्योमिदाभिप्रायेण मूले ऐकार प्रयोगः। कृपो रीलः, अष्टा.८।२।१८ ।टि.
४ शु.यजु. सं. ३१।८, श्वेता.उ. ६।१५,३।८ ।
५ दृश्यते श्रुतावेव, अस्य स्मृतित्वेनोल्लेखः प्रामादिकः, श्वे.उ.६।२० ।टि.

परमात्मपदापरपर्यायं श्रीशम्भुं नत्वा तदीयसारमिति वैशेषिकशास्त्रस्य सारं संदीपिण वक्ष्य इति श्लोकार्थः ॥१॥

स्यादेतत् वैशेषिकशास्त्रस्य सारतया तज्ज्ञानं मोक्षावेति स स्वात्र वक्तव्यतया प्रतिज्ञात इति द्रव्यादि पदार्थलक्षणनिरूपणं प्रतिज्ञाननुगुण-मापद्यतेत्याशङ्क्य पदार्थलक्षणनिरूपणानुगुण्यं प्रतिज्ञया सङ्गतिमुनिः स्वयमुपपादयति-

तत्राहुः परमप्रयोजनतया मोक्षं जनास्तद्विदो
मोक्षः सोऽपि पदार्थतत्त्वविषयं बोधंविना दुर्लभः ।
तस्मादत्र पदार्थलक्षणमिदं सामान्यतः प्रोच्यते
भावत्वेसति ये प्रमाणविषयास्ते स्युः पदार्था इति ॥२॥

कल्पलतिका

पदार्थसामान्यलक्षणम्

अयमर्थः - तत्र शास्त्रे परमप्रयोजनतया मोक्षं तद्विदो जना आहुः सोऽपि मोक्षः पदार्थतत्त्वविषयं बोधंविना दुर्लभः । तेषां तत्त्वज्ञानं[१] निःश्रेयस-हेतुरितिवचनात् । स च पदार्थबोधस्तत्र लक्षणादि निरूपणमन्तरेण न सङ्गच्छत इति पदार्थलक्षणादिनिरूपणं प्रतिज्ञानुगुणं भवति यस्मात्तस्मा-दितीदं वक्ष्यमाणं सामान्यतः पदार्थलक्षणमत्र शास्त्रे प्रोच्यते, तत्किमित्य-पेक्षायामाह भावत्वेसति ये प्रमाणविषया स्ते स्युः पदार्था इति लक्ष्यम्, भावत्वेसति ये प्रमाणविषया इति लक्षणम् ।

---

१ द्रव्यगुणकर्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसमिति, वै.सू. १।१।४ । टि.

लक्षणं नाम विवादितार्थव्यापकत्वे सति तदेकनिष्ठधर्मवचनं केवलव्यतिरेकि
हेतुवचनं वा । तदत्र विवादितपदार्थव्यापकत्वे सति तदेकनिष्ठधर्मवचनं यत्तदेव
पदार्थलक्षणतया वक्तव्यम् । तच्च भावत्वे सति प्रमाणविषयत्वमिव केवलव्यति-
रेकिहेतुविशेषणवचनमद्भवति । तथाहि - पदार्था इतरेभ्यो भिद्यन्ते भावत्वे सति
प्रमाणविषयत्वात् य इतरेभ्यो न भिद्यते स भावत्वे सति प्रमाणविषयोऽपि
न भवति यथा घटाभावः, न च तथामी तस्मादितरेभ्यो न भिद्यन्त इति ।
तत्र विषयाः पदार्था इत्युक्ते भ्रान्तिविषयेष्वतिव्याप्तिस्तदर्थं प्रमाणविषया
इत्युक्तम् । एवमप्यभावेऽतिप्रसक्तिस्तत इदमुक्तं भावत्वे सतीति । अभावस्य चा-
पदार्थत्वमुत्तरश्लोके वक्ष्यते अतो नाभावव्यावृत्तिरनिष्टा । भावाः पदार्था इ-
त्युक्ते भावत्वेनाऽऽभासमानेषु तमः प्रभृतिष्वभावेष्वतिव्याप्तिस्ततः प्रमाण-
विषया इत्युक्तम् । तमसश्च भावत्वं वक्ष्यामः । तस्माद्भावत्वे सति प्रमाण-
विषयः पदार्था इत्येव पदार्थलक्षणं साधीयः ।

नन्वस्तिप्रत्ययविषयत्वं चेद्भावत्वं तदभावेष्वप्यस्तीति नाभावव्यावृत्तिः ।
नास्तीतिप्रत्ययाविषयत्वं चेत् घटो नास्तीति घटादेरपि नास्तीतिप्रत्ययविष-
यत्वान्नास्तिप्रत्ययाविषयत्वाभावादव्याप्तिः । तस्माद्भावानिरुक्तेरिदं लक्ष-
णं समञ्जसमिति चेत्, मैवम् - न हि वयमस्तिप्रत्ययविषयत्वं नास्ति-
प्रत्ययाविषयत्वं वा भावं ब्रूमः । किन्तर्हि ? नास्तीति प्रत्ययासाधारण-
कारणत्वानधिकरणत्वम् । न च घटो नास्तीत्यत्र घटस्यापि नास्तीतिप्रत्यया-
साधारणकारणत्वात्तदनधिकरणत्वाभावाभावादत्राव्याप्तिर्भावलक्षणमिति
शङ्कनीयम्, न हि घटो नास्तीत्यत्र घटस्य नास्तिप्रत्ययासाधारणकारणत्वम् ।
किन्तर्हि ? घटाभावस्यैव, घटाभावे सत्येव घटो नास्तीति प्रयोगदर्शनात् ।
अन्यथा सत्यपि घटे नास्तिपदप्रयोग प्रसङ्गात् । अतो नास्तीतिप्रत्ययासाधा-
रणकारणत्वानधिकरणत्वं भावत्वमिति भावलक्षणं सिद्धम् । तथाच भावत्वे
सति प्रमाणविषयाः पदार्था इति लक्षणं समञ्जसमिति सिद्धम्[1] ॥२॥

---

१ समीचीनमिति पाठः ।

पदार्थविभागः

इदानीं सामान्यलक्षणलक्षितपदार्थानामनियतत्वादिभ्रमनिरासाय विभागमाह-

द्रव्यं चाथगुणश्च कर्म च तथा जातिर्विशेषाः परे
षष्ठः स्यात्समवाय इत्यभिहिता वैशेषिके स्ते च षट् ।
नाभावस्तु तथाभ्युपेतुमुचितं बाधो हि तेषामतो
नास्तीति प्रतिपाद्यतेऽत उचितं षट्त्वे पदार्था इति ।।३।।

कल्पलतिका

येषां पदार्थानां भावत्वे सति प्रमाणविषयत्वं सामान्यलक्षणमुक्तं ते च पदार्था वैशेषिकैरित्थंसंज्ञकाः षट् अभिहिताः । इतीति=किं संज्ञका इत्यत आह द्रव्यंचेत्यादिना ।

अत्र च द्रव्यगुणकर्मजातीनामनेकत्वेऽपि द्रव्यमित्याद्येकवचनं तन्निष्ठैकधर्मोपाधौ [1] वेदितव्यम् ।

ननु तर्हि विशेषा इति बहुवचनं विहाय विशेषनिष्ठैकधर्मोपाधावेकवचनमिव विशेष इति किमिति न प्रयुक्तमिति चेत्, न विशेषाणामत्यन्तव्यावृत्तत्वप्रदर्शनाभिप्रायेण बहुवचनस्योक्तत्वात् । यथा च विशेषाणामत्यन्तव्यावृत्तत्वं सिद्ध्यति तथोपत्र वक्ष्यामः । परे इति विशेषणं विशेषाणामन्त्यत्वप्रदर्शनार्थम् । परे विशेषाः=अन्त्याविशेषा इत्यर्थः ।

षष्ठः समवायः स्यादित्यत्र समवायस्य द्रव्यादिपञ्चकानन्तरोक्तस्य षष्ठत्वमर्थात्प्राप्तमपि सप्तमपदार्थाभावज्ञापनार्थं शब्देनाभिहितमित्यवगन्तव्यम् ।

---

१ द्रव्यादीनामनेकत्वेऽपि द्रव्यगुणादि सङ्ग्राहकस्य द्रव्यत्वगुणत्वादिपदार्थविभाजकोपाधेरेकत्वादेकवचनोपादानं सङ्गतिरिति । टि.

द्रव्यं चेत्यादिचकारः समुच्चयार्थः । अथशब्दस्तु द्रव्योपदेशानन्तरमेव गुणोपदेशौचित्यमिति प्रतिपादनार्थः । तथाहि-

गुणादिपदार्थानां द्रव्याश्रयत्वेन तदधीनत्वात्[1] द्रव्यस्य च तदनाश्रयत्वेन[2] प्रधानत्वाद् द्रव्योपदेशानन्तरमेव गुणाद्युद्देशो न्याय्यः । अनयैव दिशा गुणादिष्वप्युद्देशक्रमो ज्ञेयः ।

द्रव्यलक्षणम्

तत्र गुणाश्रयो द्रव्यमिति द्रव्यलक्षणम् ।

ननु नैतल्लक्षणं समञ्जसम्, तथाहि -

अव्याप्तेरप्यतिव्याप्तेर्द्रव्यं नैव गुणाश्रयः ।
आद्यक्षणे गुणाभावाद्गुणादावपि वीक्षणात् ।।

उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठतीत्यङ्गीकारादव्याप्तिः, गुणादिष्वपि चतुर्विंशतित्वगुणान्वयदर्शनादतिव्याप्तिः । न च तत्र संख्यावत्त्वप्रतीतिर्विभ्रमः, नवद्रव्याणीत्यादाविव बाधदर्शनादिति, उच्यते गुणाश्रयत्वशब्देन गुणो यदाश्रय एवेति विवक्षितत्वान्नातिव्याप्तिः । न खलु गुणो भवति न भवति चाश्रयपरतन्त्र इति प्रसिद्धमागणितम्[3] । तथा च लक्षणान्तरं सत्तामवलम्बमानो गुणो द्रव्याश्रयापेक्ष एव तामालम्बते इति । द्रव्यसंख्यैकार्थसमवायाद्गुणादिषु संख्याव्यवहारोपपत्तेः पृथक्संख्यागुणाभावान्नातिव्याप्तिः । नवत्वसंख्यायास्तत्राभावेऽपि द्रव्यगतचतुर्विंशत्याद्यवान्तरसंख्याव्यवहारस्य गुणादिषु संभवात् । नैवं द्रव्येषु परार्धसंख्याया अपि संभवाद्गुणादि-

---

१ द्रव्याधीनत्वादिति पा. ।
२ गुणानाश्रयत्वेनेति पा. ।
३ संख्यमित्यर्थः । टि.

ष्वपि तत्प्रसङ्गः । न खलु गंभीरभागीरथीस्रोतः सकलमपि पातुं पातव्यम्, पातव्यं चेदन्यथा न चुलुकमात्रमपि सार्वभौमाभिमतमिति किंवदन्त्यस्ति क्वापि किन्तु यावदुपयुक्तं तावदेव तथात्रापि नियमसंभवात् । नचैवं द्रव्यसदृश गुणकर्मणोरपि सत्ताव्यवहारोपपत्तिः सत्ताकल्पनीयेतिवाच्यम्, यथा द्रव्येष्वेव सत्तायां द्रव्यत्वेन तुल्यव्यक्तित्वं जातिबाधकं तथा जातिबाधकाभावात् । तस्माद्गुणाश्रयो द्रव्यमिति द्रव्यलक्षणं साधीयः ।

तथा द्रव्यत्वजातियोगि द्रव्यमित्यपि द्रव्यलक्षणम् । नच द्रव्यत्वजातिव्यञ्जकाभावादयुक्तमितिवाच्यम्, गुणवत्त्वस्य तद्व्यञ्जकत्वात् । नन्वेवंसति विशेषणभूतस्य गुणस्यापि तद्व्यञ्जकत्वेन द्रव्यत्वापत्तिरिति चेत् नादण्डी निरूप्यतेत्यत्र हि दण्डविशिष्टस्य निरूपकत्वेऽपि न यथा दण्डस्य निरूपकत्वं तथात्र गुणविशिष्टस्य द्रव्यत्वव्यञ्जकत्वेऽपि न गुणस्य द्रव्यत्वव्यञ्जकत्वेन गुणस्यापि द्रव्यत्वापत्तिरित्युच्यते, तस्माद्द्रव्यत्वजातियोगि द्रव्यमित्यपि द्रव्यलक्षणं समञ्जसम् ।

गुणलक्षणम्

गुणलक्षणं कर्मातिरिक्तो जातिमात्राश्रयो गुण इति । नचवाच्यं गुणात्कर्मणि भेदासिद्धौ कर्मव्यावृत्तिरयुक्तेति, 'शुक्लं रूपम्' 'मधुरो रसो' 'निम्नप्रवणागतिर्जलस्ये'ति प्रसिद्धिभेदाद्गुणकर्मणोर्भेदोपपत्तेः । अभ्युपगमसिद्धान्तेन[1] लक्षणस्य विवक्षितत्वात् ।

किञ्च गुणात्कर्मणो भेदाभावमङ्गीकुर्वाणः प्रष्टव्यो भवति, यदि गुणान्नकर्मणो भेदः कस्तर्हि गुणः कर्मशब्देन व्यपदिश्यत इति । ननु संयोगविभागसन्ततिरेव कर्मशब्दार्थः, दृश्यते हि संयोगविभागसन्ततिमति चलतीति चेत्- मैवम्, संयोगविभागसन्ततिमत्त्वेऽप्याकाशादौ चलतीति प्रतीत्यभावात्

---

१ अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षणमभ्युपगमसिद्धान्तः । न्या.सू. १।१।३१ । टि.

मूर्तैकसमवेतसंयोगविभागसन्ततिः कर्मपदार्थ इति चेत्, न पिपीलिकासंयोगसन्ततिमति भूतलादावपि चलतीति प्रतीतिप्रसङ्गात् । तस्माच्चलतीतिप्रत्ययासाधारणकारणस्य कर्मपदार्थस्य गुणपदार्थाद्भेदसिद्धौ पूर्वोक्तगुणलक्षणे कर्मातिरिक्त इति विशेषणेन [1] कर्मव्यावृत्तिर्युक्तेति स्मरणीयम् । द्रव्यस्य च गुणाश्रयत्वेन जातिमात्रानाश्रयत्वान्नातिव्याप्तिस्तत्र । जात्यादेश्च जात्याश्रयत्वाभावान्न तत्राप्यतिव्याप्तिः । ननु गुणेषु द्रव्यवृत्तित्वधर्माश्रयत्वाज्जातिमात्राश्रयत्वाभावादसंभवि गुणलक्षणमिदमिति चेत् । नैवम्, आश्रयशब्देन समवायस्य विवक्षितत्वात् । द्रव्यवृत्तित्वधर्मस्य द्रव्यसमवायापर्यायस्य समवायेनाश्रितत्वेऽनवस्थाप्रसङ्गात् । ततो निर्दुष्टं गुणलक्षणं कर्मातिरिक्तो जातिमात्राश्रयो गुण इति ।

कर्मलक्षणम्

संयोगविभागाजन्यसंयोगविभागासमवायिकारणजातीयं कर्मेति कर्मलक्षणम् । विनश्यदवस्थद्रव्यगतकर्मणि संयोगविभागानारम्भकेऽव्याप्तिर्माभूदिति जातीयग्रहणम् । संयोगविभागयोरतिव्याप्तिपरिहारार्थं संयोगविभागाजन्येति संयोगविभागविशेषणम् । द्रव्येऽतिव्याप्तिनिरासायासमवायिकारणविशेषणम् । ननु संयोगाजन्यसंयोगासमवायिकारणजातीयं कर्मेत्येतावदेवास्तु कर्मलक्षणं विभागपदप्रक्षेपो व्यर्थ इति चेत् - न, लक्षणद्वयस्य विवक्षितत्वात् । तथाहि - संयोगाजन्यसंयोगासमवायिकारणजातीयं कर्म, एवं विभागाजन्यविभागासमवायिकारणजातीयं कर्मेति ।

जातिलक्षणम्

जातिलक्षणं तु नित्यत्वे सत्येकत्वे सत्यनेकसमवेता जातिः । समवेता जातिरित्युक्ते [2] बुद्ध्यादावतिव्याप्तिस्ततोऽनेकपदप्रक्षेपः । तथापि तत्रैव[3]ातिव्याप्ति-

---

१ मूर्तेऽत्र न इत्यधिकः पाठः स च नात्रापेक्षितः । टि.

२ आत्मनः समवेता बुद्धिरिति ।

३ बुद्ध्यादावेवेति । टि.

स्तस्याप्यनेकात्मादिसमवेतत्वात् तत एकत्वेसतीत्युक्तम् । तथापि संयोग-
विभागादावतिव्याप्तिस्तत इदमुक्तं नित्यत्वेसतीति । नित्यत्वेसत्यनेकसम-
वेताजातिरित्युक्ते जलपरमाणुरूपेष्वतिव्याप्तिस्तेषां नित्यत्वादनेकसमवेत-
त्वाच्च तदर्थमेकत्वेसतीत्युक्तम् । ननु तत्रापि[1] प्रत्येकमेकत्वमस्तीति प्रसक्तेर-
वातिव्याप्तिरिति शङ्कनीयम्, एक व्यक्तेनिकव्यक्तिसमवायस्य विवक्षितस्य
तत्राभावात् । तदेवं नित्यत्वेसत्येकत्वेसत्यनेकसमवेता जातिरिति जातिलक्षणं
युक्तम् ।

विशेषलक्षणम्

विशेषलक्षणन्तु नित्येष्वेव वर्तन्त एव ये तेऽन्त्या विशेषा इति ।
द्रव्येष्वेव वर्तन्ते ये तेऽन्त्या इत्युक्ते गुणेष्वतिव्याप्तिस्तदर्थं वर्तन्त एवेत्येव-
कारप्रदीपः । द्रव्येष्वेव सर्वदा वर्तमाना इत्यर्थः । एवमप्युक्ते घटरूपादिषु
यावद् द्रव्यभावितया सर्वदा वर्तमानेषु व्यभिचारः स्यात् तत इदमुक्तं नित्ये-
ष्विति । नित्येषु द्रव्येष्वेव वर्तन्त एव ये तेऽन्त्या विशेषा इत्युक्ते[2] द्रव्य-
त्वादावतिव्याप्तिः स्यात्तत इदमुक्तं नित्येष्विति । नित्येष्वेव द्रव्येषु वर्तन्त
इत्युक्ते नित्यद्रव्यतद्गतगुणयोरपि प्रतियोगिकान्योन्याभावेऽतिव्याप्तिः
स्यात्तत इदमुक्तं नित्येष्वेव द्रव्येष्वेव वर्तन्त इति, नित्यद्रव्य तद्गतगुणनिष्ठा-
न्योन्याभावस्य च नित्येष्वेव वर्तमानत्वाभावात् । तस्य नित्येष्वेव द्रव्येषु
वर्तमानत्वेसति गुणनिष्ठत्वस्यापि भावादिति युक्ता तद्व्यावृत्तिकारणा।
नित्येष्वेव द्रव्येष्वेव वर्तन्ते ये तेऽन्त्या विशेषा इत्युक्ते द्व्यणुकादावति-
व्याप्ति स्यात्ततो नित्येष्वेव द्रव्येष्वेव वर्तन्त एव ये तेऽन्त्या विशेष इत्यु-
क्तम् । आत्मत्वमनस्त्वयोश्च सर्वनित्यद्रव्यवृत्तित्वाभावान्नातिव्याप्तिस्तत्र।
एक व्यक्तावेव नित्य एव द्रव्य एव वर्तते एव यः स विशेष इति प्रत्येकस्य
लक्षणस्य विवक्षितत्वाच्च नातिव्याप्तिः । ततो नित्येष्वेव द्रव्येष्वेव

---

१ जलपरमाणुष्वपीति । टि.

२ द्रव्यत्वं सामान्यमस्तत्रातिव्याप्तिरिति । टि.

वर्तन्त एव ये तेऽन्त्या विशेष इति विशेषलक्षणं सुस्थितम् ।

समवायलक्षणम्

अयुतसिद्धानामाधार्याधारभूतानामिह प्रत्ययहेतुः सम्बन्धः सः [1]समवाय इति समवायलक्षणम् । सुखधर्मयोः कार्यकारणभावसम्बन्धव्यवच्छेदार्थमाधार्याधारभूतानामित्युक्तम् । आकाश-तद्वाचक-शब्दयोः सम्बन्धायोगार्थमिहप्रत्ययहेतुरित्युक्तम् । कुण्डबदरयोराधाराधेयभावसम्बन्धव्यवच्छेदार्थमयुतसिद्धानामित्युक्तम् । नचेह भूतले घटो नास्तीति विशेषणविशेष्यभावसम्बन्धेऽतिव्याप्तिः, मुख्यसम्बन्धस्योभयनिष्ठत्वेन प्रसिद्धस्य विवक्षितत्वात् । अथवा अयुतसिद्धानां सम्बन्धः समवाय इत्येतावदेव लक्षणम्, अवशिष्टन्तु तदुपकरणार्थत्वेन व्याख्येयम् । तदेवं वैशेषिकसम्मतसिद्धलक्षणलक्षिताद्रव्यादिपदार्था ये ते च षट् इति द्रव्यंचाथगुणश्चेत्यादिना प्रत्यपादि ।

अभावस्य भावनिषेधरूपत्वम्

नन्वभावस्य सप्तमपदार्थत्वात्कथं षट् पदार्था इत्यभिहितमित्याशङ्क्याह नाभावस्तु तथाभ्युपगन्तुमुचितमिति । तथेति पदार्थत्वेनेत्यर्थः । कुत इत्यत आह बाधो हि तेषामसौ नास्तीति प्रतिपाद्यते इति, हि यस्मात् कारणात्, असौ अभावो नास्तीति तेषां पदार्थानां बाधः प्रतिपाद्यते ज्ञायते ।

अयंभावः ।

अभावस्य पदार्थनिषेधरूपतया न पदार्थत्वेनाङ्गीकारः तदुक्तम् - 'अभावस्तु पदार्थनिषेधरूपत्वान्न पदार्थत्वेनाश्रीयते' इति उक्तमर्थमुपसंहरति अत उचितं षट्ति पदार्थ इतीति ।। ३ ।।

---

१ स इतिपाठस्त्रुटितो मूले, तथापि पदार्थसंसङ्ग्रहानुरोधात्स्थापितः । टि.

द्रव्यविभागः

इदानीं द्रव्यादिपदार्थानां प्रत्येकं विभागमभिधित्सुः प्रथमोपक्रान्त-द्रव्यपदार्थविभागं तावदाह-

पृथ्व्यापोज्वलनोऽनिलश्चगगनं कालो दिगात्मा मनो
द्रव्याणीति नवैव तत्र पृथिवी नित्याप्यनित्यापि च ।
तत्राद्या परमाणुमूर्तिरपरा कार्यस्वरूपा पुनः
सापिस्यात्तनुरिन्द्रियञ्च विषयश्चेतिप्रसिद्धास्त्रिधा ।।४।।

कल्पलतिका

अत्रैवमन्वयः, इति नवैव द्रव्याणि । नवैवेत्येवकारेणान्ययोगशङ्का[1] व्यावृत्तिर्विधीयते, न दश नाप्यष्टौ द्रव्याणीत्यर्थः ।

तमो न दशमं द्रव्यम्

ननु तमसो दशमद्रव्यस्य सद्भावात्कथमन्ययोगशङ्काव्यावृत्तिः, नैतद्द्रव्यमेव न भवतीति शङ्कनीयम्, गुणवत्त्वेन द्रव्यत्वानुमानादितिचेन्नैवम् - तमसो गुणवत्त्वासिद्धेर्द्रव्यत्वस्य साधयितुमशक्यत्वात् । नच तमालमालाश्यामलं तम इति प्रतीतेर्गुणवत्त्वसिद्धिस्तस्या भ्रान्तित्वात् । तथाहि- यदि नीलगुणवत्त्वं तत्र प्रामाणिकं स्यात्तर्हि तद्व्यापकेन गन्धवत्त्वेनापि तत्र भवितव्यम्। नच तथेति व्यापकाभावे व्याप्याभाव इति न्यायेन[2] तमसि गन्धवत्त्वविनोपलभ्यमानं नीलगुणवत्त्वमप्रामाणिकं भवितुमर्हतीति निश्चिनुमः ।

---

१ अस्यैवविवरणं नदशेत्यादिना । टि.
२ व्यापकंगन्धवत्त्वं व्याप्यं नीलरूपं श्यामरूपादिकम् । टि.

किञ्च यदि तमो द्रव्यं तर्हि मूर्तममूर्तं वेति वाच्यम् । न तावन्मूर्तं तमः, विकल्पासहत्वात् । तथाहि - तत्किं मूर्तं तमो नित्यमनित्यं वा, न तावन्नित्यम्, अस्मदाद्यप्रत्यक्षत्वप्रसङ्गात् परमाणुवत् । नाप्यनित्यम्, क्वचिदिन्द्रियारम्भकत्वप्रसङ्गात्, अनित्यपृथिव्यादिवत् । एवमप्यङ्गीकारे षष्ठमिन्द्रियं वाह्य) निष्प्रयोजनं लोकशास्त्रविरुद्धं प्रसज्येत । अथामूर्तं तमः तर्हि तमसो(ऽमूर्तद्रव्यतया विभुत्वप्रसङ्गात्, तथाचास्मदादिबाह्येन्द्रियागोचरत्वं व्योमादिवत्तमसोऽपि प्रसज्येत । नच व्योमादिरस्मदादिप्रत्यक्षत्वादविषमो- दृष्टान्त इति वाच्यम्, व्योमादिरूपस्पर्शरहितत्वेन चक्षुः स्पर्शनाभ्यां प्रत्य- क्षीकर्तुमशक्यत्वात्, अन्येषां चान्येन्द्रियाणां द्रव्याग्राहकत्वात् । तस्मादेवमादि- दोषग्रस्तत्वान्न तमो द्रव्यं । न सुतरां दशमद्रव्यं किन्तर्हि, आलोकाभाव एवा- रोपितनीलरूपस्तमः शब्देनाभिधीयते । तथाचोक्तम् "द्रव्यगुणकर्मनिष्पत्ति- वैधर्म्याद्भावाभावस्तमः" इति । तस्मान्नवद्रव्याणीत्यत्रैवकारेणान्ययोग- व्यावृत्तिर्युक्तिमतीति सिद्धम् ।

पृथिवीलक्षणम्

कानि तानि द्रव्याणीत्यपेक्षायामाह पृथ्वीत्यादिना । तत्र गन्धव- तीपृथिवीतिपृथिवीलक्षणम् । ननु गन्धवत्त्वस्य गन्धहरादावपि भावादति- व्यापकं लक्षणमिदमितिचेन्न गन्धवत्त्वशब्देन गन्धसमवायस्य विवक्षितत्वात्। गन्धहरादौ गन्धसमवायाभावेऽपि कुसुमादिसन्निकर्षोपाधिवशाद्गन्धवत्त्वप्रतीतिः संभवात् । गन्धहरादावपि गन्धसमवायाभ्युपगमे गन्धस्य सामान्यगुणत्वप्रसक्त्या जात्युपाधौ संख्यादिवन्नियतैकेन्द्रियग्राह्यत्वं न स्यात् । तस्माद्गन्धसमवायस्य गन्धहरादावभावान्नातिव्याप्तिर्गन्धवतीपृथिवी तिलक्षणस्येतिस्थितम् ।ननु क्वचित्प्रस्तरादौ पृथ्वीत्वेसत्यपि गन्धानुपलब्धेरव्यापकं लक्षणमिदमितिचेन्न तत्र गन्धवत्त्वस्यानुमानतोऽधिगन्तुं शक्यत्वात् । तद्यथा विमतं गन्धवत् अतो- जिद्विद्रव्यत्वेसति गुरुत्वात्[1] संमतवदिति । तस्माद् गन्धवती पृथिवीति

---

१ तेजसि गुरुत्वाभावात् । टि.

पृथिवीलक्षणं साधीयः ।

अपांलक्षणम्

शीतस्पर्शा आप इत्यपां लक्षणम् । पृथिव्यादौ क्वचिदुपलभ्यमानस्यापि शीतस्पर्शस्याम्भःसम्बन्धोपाधिकतया संभवेन विवक्षितस्य शीतस्पर्शसमवायस्याभावान्नातिव्याप्तिः । उष्णोदकादौ शीतस्पर्शोद्भावविरुद्धोष्णस्पर्शवद्द्रव्यसम्बन्धप्रतिबद्धत्वान्नोपलभ्यते शीतस्पर्शः प्रतिबन्धापगमे तु सर्वैरुपलभ्यत इति नाव्याप्तिः । ततः शीतस्पर्शा आप इत्यपां लक्षणं साधु ।

तेजोलक्षणम्

उष्णस्पर्शं तेज इति तेजोलक्षणम् । न च वाच्यमपामुद्देशानन्तरं ज्वलनोद्देशात् लक्षणानन्तरं ज्वलनलक्षणं वक्तव्ये किमिति तेजसोऽनुद्दिष्टस्य लक्षणमिति ज्वलनशब्देन तेजस एव विवक्षितत्वात् । ननु पृथिव्यादावुष्णस्पर्शस्य क्वचिदुपलब्धेरतिव्याप्तिरिति चेन्न उष्णस्पर्शवद्द्रव्यसंसर्गेण तत्रोष्णत्वप्रान्तिविवक्षितोष्णस्पर्शसमवायस्याभावात् । ननु चेन्द्रे चामीकरादावुष्णस्पर्शाभावे तैजसत्वाभ्युपगमाच्चाव्यापकं लक्षणमिति शङ्कनीयम्, चन्द्रचामीकरादौ तैजसत्वलिङ्गेनोष्णस्पर्शवत्त्वानुमानात् । तैजसत्वमेव चन्द्रचामीकरादौ कुत इति चेत्, उच्यते - चन्द्रादेस्तावद्भास्वररूपवत्त्वात्तैजसत्वमनुमेयम् । चामीकरादेस्तु परिशेषात्तैजसत्वम् । तथाहि - रूपवत्त्वाच्चामीकरादिना पृथिव्यप्तेजोऽन्यतमेन भवितव्यम् असांसिद्धिकद्रवत्ववत्त्वादबन्त्वेन नास्थीयते । चामीकरादिना नापि पृथिवीत्वेन तथास्थेयम् । तथाहि - चामीकरादिर्न पार्थिवजात्यप्राधि[1]रैकविधरूपत्वाज्जलवदिति । कथं तर्हि पतनक्रियागम्यं गुरुत्वं तेजोरूपे चामीकरादौ तैजसे गुरुत्वाभावादिति चेत्पार्थिवावयवोपष्टम्भादिति ब्रूमः तस्मादुष्णस्पर्शं तेज इत्येव तेजोलक्षणम् ।

---

१ यथाश्री- जात्युपाधिकविधेत्यादि दृश्यते आनुपूर्वी सा प्रकृतासङ्गतेति परित्यक्ता । टि.

वायुलक्षणम्

वायुलक्षणन्तु स्पर्शवान् विरूपी वायुरिति । यत्तु जलाकलितज्वलने स्पर्शवत्त्वोपलम्भेऽपि रूपवत्त्वं नोपलभ्यते, तदनभिव्यक्तत्वसत्त्वात्, ततो न तत्रातिव्यापकं वायुलक्षणम् । दूषणान्तरविरहस्त्वतिरोहितः ।

शब्दस्यगुणत्वसाधनपुरस्सरमाकाशलक्षणम्

शब्दगुणं गगनम् । ननु शब्दस्य द्रव्यत्वेन गुणत्वाभावादसंभविलक्षणमिदमितिचेत् न, शब्दस्य द्रव्यत्वासिद्धेः तथाहि - शब्दो न द्रव्यं श्रोत्रग्राह्यत्वाच्छब्दत्ववत् । नच शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धग्राह्यत्वादिति प्रत्यनुमानम्, अस्याभावत्वात्, तथाहि - किं साक्षादिन्द्रियसम्बन्धशब्देन संयोगी वा समवायी वा विवक्ष्यते । नाद्यः, गुणवादिनं प्रत्यसिद्धत्वात्, न द्वितियः, साधकं प्रत्यसिद्धत्वात्, न खलु परैः समवायोभ्युपेयते 'विशेषणसमवायौ द्वौ नाङ्गीचक्रुः कुमारिलाः' इति वचनात् । अथ साक्षादिन्द्रियग्राह्यत्वादित्युच्येत तथापि योगिप्रत्यक्षवादिनं प्रत्यात्ममनः संयोगादौ व्यभिचारः, तस्माद्द्रव्यत्वसाधकानुमानस्याभासत्वान्न शब्दो द्रव्यमिति स्थितम् ।

ननु तथापि शब्दस्य गुणत्वे किं प्रमाणमितिचेदुच्यते शब्दोगुणो जातिमत्त्वेसति मूर्ताग्राह्यकबाह्येन्द्रियग्राह्यत्वाद् गन्धवदिति, ततो गुणत्वे शब्दस्य सिद्धे शब्दगुणं गगनमितिगगनलक्षणं नासंभावि ।

काललक्षणम्

काललक्षणन्तु सौरपरिवर्तनोत्पाद्य परत्वापरत्वासमवायिकारणाधारत्वेसत्यमूर्तः काल इति । अयमर्थः । सौराणि यानि परिवर्तनानि तदुत्पाद्ये ये परत्वापरत्वे, यथा बहुतरसौरपरिवर्तनान्तरित जन्मनोर्द्रव्ययोः

परत्वापरत्वे, तयोरसमवायिकारणेन तावत्केनचिद्भवितव्यम्, तच्च गुणकर्मणोरन्यतरद्भवितुमर्हति । असमवायिकारणत्वं गुणकर्मणोरेवेति वचनात्। तत्र न तावत्कर्म तयोः परत्वापरत्वयोरसमवायिकारणमादिपश्चाद्भाविनोरुत्पन्नप्रासादयोः परत्वापरत्वसमवायिकारणयोः कर्माभावेऽपि परत्वापरत्वोत्पत्तेः । तस्माद्गुणविशेष एव तयोः परत्वापरत्वयोरसमवायिकारणम्, [1]'समवायिकारणप्रत्यासन्नं कारणमसमवायिकारण'मित्युक्तत्वात् । विवक्षितद्रव्याधारनिष्ठगुणस्य विवक्षितसमवायिकारणप्रत्यासन्नत्वेऽपि तथा सामर्थ्याभावात् । स च परत्वापरत्व समवायिकारणद्रव्यनिष्ठो गुणविशेषः संयोगविशेष एव तयोरसमवायिकारणम् । अन्यगुणस्य तथा सामर्थ्याभावात्। तस्य संयोगस्याधारत्वेसत्यमूर्तः काल इति । अमूर्तत्वग्रहणं परत्वापरत्वसमवायिकारणाधारद्रव्यव्यावृत्त्यर्थम् । ततश्चैवमर्थः सम्पद्यते - विवक्षितपरत्वापरत्व समवायिकारणद्रव्यस्य येन सह संयोगस्तादृक् परत्वापरत्वयोरसमवायिकारणं सह काल इति ।

दिग्लक्षणम्

सौरपरिवर्तनानुत्पाद्यपरत्वापरत्वासमवायिकारणाधारत्वे सत्यमूर्ता दिगिति दिशो लक्षणम् । अत्रापि व्याख्यानं पूर्ववत्प्रायोऽवगन्तव्यम् । बह्वल्पसौरपरिवर्तनान्तरितजन्मनोरित्यादिस्थाने सन्निकृष्टविप्रकृष्टयोरित्यादिज्ञेयमित्यभिप्रायेण प्राय इत्युक्तम् । तदेवं दिग्लक्षणमपि परीक्षणीयम् ।

आत्मलक्षणम्

आत्मलक्षणन्तु बुद्धिगुण आत्मेति । बुद्धेरिन्द्रियादिसंघाते प्रकाशमानत्वदर्शनात्कस्य गुणो बुद्धिरिति निर्णेतुमशक्यत्वाद्विवक्षितार्थप्रतिपादकत्वायोगान्न लक्षणमिति चेन्नैवमवोचः । बुद्धेरिन्द्रियादिसंघातातिरिक्तद्रव्यविशेषस्य गुणत्वेन निरूपयितुं शक्यत्वात्, तथाहि- न तावद् देहगुणो बुद्धिः

१ कारिकावली प्र.स. १८ ।

बाह्येन्द्रियग्राह्यत्वप्रसङ्गात्, तद्गतरूपादिवत्, नापीन्द्रियगुणो बुद्धिः, सर्वथाप्रत्यक्षत्वप्रसङ्गात्, अतएव न प्राणगुणः। तस्माद् देहादिसंघातगुणत्वे बुद्धेरेवमादिदोषग्रस्तत्वात्तदतिरिक्तद्रव्यविशेषनिष्ठगुणत्वमेवास्थेयम् ।सच द्रव्यविशेष आत्मेति ।

ननु बुद्धेरेवात्मत्वात्कथं बुद्धिगुण आत्मेति चेत्, न बुद्धेरेवात्मत्वेऽहं जानामीति ज्ञानाश्रयत्वेनात्मप्रतीति र्न स्यात् । ज्ञानस्यैवात्मत्वाभ्युपगमात्। बुद्धिरुपलब्धिर्ज्ञानमित्यादिशब्दानां पर्यायत्वात्[१] । बुद्धिस्थज्ञानपदप्रयोगः । किञ्च बुद्धेरात्मत्वमङ्गीकरिष्यसि किंवात्मनो बुद्धित्वमिति । आद्ये बुद्धेर्नित्यत्व प्रसङ्गः, तथाच चक्षुरादीनां साक्षात्कारलक्षणज्ञानजनकत्वाभावादनिन्द्रियत्वंलोकशास्त्रविरुद्धमभ्युपगतं स्यात्, साक्षात्कारजनकस्यैव करणस्येन्द्रियत्वात् यदिचात्मनोबुद्धित्वमित्युत्तरः पक्षः । तथासत्यनित्यत्वमथात्मनः प्रसज्येत । तथाचनित्यपुरुषेच्छया मुमुक्षूणां प्रवृत्त्यनुपपत्तेर्मोक्षशास्त्राप्रामाण्यप्रसङ्गो दुर्वारः । अथ बुद्धेर्नित्यत्वाद्द्रूपस्यात्मनो नानित्यत्वप्रसक्तिरिति । नच तथासति पूर्वोक्तं चक्षुरादीनामनिन्द्रियत्वम्, नित्यबुद्धेरभिव्यञ्जकमनोवृत्तिविशेषजनकत्वेनापि तत्संभवादिति तन्न बुद्धेर्नित्यत्वे सुषुप्त्याद्यभावप्रसङ्गात्[२] । नचानभिव्यक्तेस्तत्सिद्धिः, प्रकाशात्मकबुद्धेरनभिव्यक्त्यसंभवात्। एतेनाभिव्यञ्जकमनोवृत्तिविशेषजनकत्वेनेन्द्रियाणामिन्द्रियत्वसमर्थनमपि कदर्थनीयम् । तस्मादात्मनोभिन्ना बुद्धिरवश्यमभ्युपेया गुणत्वेन । अथ कथमस्या गुणत्वमिति चेत् - उच्यते बुद्धिर्गुणः आत्मातिरिक्तत्वे सत्यस्पर्शवदिन्द्रियग्राह्यजातिमत्वाच्छब्दवदित्यनुमानाद्गुणत्वसिद्धिः । तदेवं बुद्धिगुण आत्मेत्यात्मलक्षणं समञ्जसम् ।

---

१ न्या.सू. १।१।१५ ।

२ सुषुप्त्यादीनाम् ।टि.

मनोलक्षणम्

मनोलक्षणन्तु स्पर्शरहितं मूर्तं मनः । नन्वेवं विधद्रव्यस्याप्रामाणिकत्वादसंभविलक्षणमिदमिति चेत् - न, परिशेषानुमानसिद्धत्वादेवं विधद्रव्यस्य। तथाहि - अस्मदादीनां सुखादिज्ञानं तावत्कारणजन्यमनित्यज्ञानत्वात्, । तच्च न बाह्येन्द्रियजन्यम्, सुखादेर्बाह्येन्द्रियाविषयत्वात्, ततः सुखादिग्राहकमान्तरमिन्द्रियमङ्गीकार्यम् । तच्चान्तरमिन्द्रियं न तावदमूर्तम्, तथासति तस्यामूर्तद्रव्यतया विभुत्वेन युगपद्रूपरसादिग्राहकेन्द्रियसम्बन्धत्वेन युगपदेव तत्तदिन्द्रियैस्तत्तद्विषयग्रहणप्रसङ्गात् । ततो मूर्तमान्तरमिन्द्रियमङ्गीकार्यम्। तच्च न स्पर्शवत् । तथाहि- सुखादिग्राहकमिन्द्रियं न स्पर्शवत् अमूर्तद्रव्यविशेषगुणग्राहकत्वाच्छ्रोत्रवदिति । ततः स्पर्शरहितं मूर्तं मन इति मनोलक्षणं साधु।

पृथिवीभेदाः

अथ पृथिव्यादीनां प्रत्येकं विभागमभिधित्सुः पृथिव्यास्तावद् विभागमाह तत्र पृथिवी नित्याप्यनित्यापीति । ननु सैव पृथिवी नित्या सैवचानित्येति विप्रतिषिद्धमित्यत आह तत्राद्या परमाणुमूर्तिरपराकार्यस्वरूपेति । परमाणुरूपा पृथ्वी । तत्रेति तयोर्नित्यानित्ययोर्मध्ये आद्या नित्या परमाणुरूपा पृथिवी नित्येत्यर्थः । कार्यस्वरूपा, अपरेत्यनित्येत्यर्थः ।

नित्यत्वं प्रध्वंसरहितत्वम् । न च वर्तमान घटादौ प्रध्वंसरहितत्वेन नित्यत्वप्रसक्तिः, प्रध्वंसप्रतियोगित्वात्यन्ताभावाधिकरणत्वस्य विवक्षितत्वात् ।तद्विपरीतत्वमनित्यत्वम्, स्पष्टमेतत् ।

परमाणुलक्षणम्

परमाणुलक्षणन्तु नित्यः क्रियावान् परमाणुरिति ।नहि खस्तुन

एवाभावादसंभविलक्षणमिदमिति वाच्यम्, सामान्यतोऽनुमानेन तत्प्रसिद्धेः। तद्यथा - अल्पपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वादन-ल्पपरिमाणतारतम्यवदिति । किञ्च पृथिवीत्वं नित्यवृत्ति घटपटजातित्वात् सत्तावत् एवमप्त्वादिकमपि पक्षीकृत्य प्रयोक्तव्यम् । तेन पृथिव्यादिकं नित्य-मपि किञ्चित् सिध्यति । तच्च परमाणुशब्देनाभिधीयते, अन्वर्थयोगात्, अतो नासंभवि परमाणुलक्षणम् ।

अथ कार्यरूपं पृथिव्या विभागमाह पुनः सापि स्यात्तनुरिन्द्रियरूपा च वि-षयश्चेति प्रसिद्धेस्त्रिधेति । सा पुनः कार्यरूपा पृथिवी शरीरेन्द्रियविषय-भेदप्रसिद्धेस्त्रिप्रकारापीत्यर्थः । तत्र भोगायतनमन्त्यावयविशरीरम् । स्वसमवेतसुख-दुःखान्यतरसाक्षात्कारो भोगः । यदवच्छिन्ने आत्मनि भोगस्तद्भोगायतनम्। एतावत्येव शरीरलक्षणे शरीरावयवेष्वतिव्याप्तिस्तेषामपि भोगायतनत्वात्तत इदमुक्तमन्त्यावयवीति । अन्त्यावयविनामद्रव्यानारम्भकंकार्यद्रव्यमिति ।शरी-रावयवास्तु शरीरारम्भका इति तेन तद्व्यावृत्तिर्युक्तैव । नच शरीरस्यापि शरीरान्तरारम्भकत्वदर्शनादव्याप्तिरुक्तशरीरलक्षणस्येति वाच्यम्, शरीरस्य शरीरारम्भकत्वेऽपि तत्समवायिकारणत्वाभावात् । द्रव्यानारम्भकशब्देनास्य-वार्थस्य विवक्षितत्वात् । इन्द्रियलक्षणन्तु साक्षात्काकरणमिन्द्रियमिति, ज्ञानेन्द्रियाणामिव लक्षणस्य विवक्षितत्वात् न कर्मेन्द्रियेष्वव्याप्तिरुक्ते-न्द्रियलक्षणस्य । विषयलक्षणन्तु शरीरेन्द्रियातिरिक्तद्रव्यत्वेसति प्रतीय-मानतया भोगसाधनंविषय इति । भोगसाधनं विषय इत्युक्तेऽदृष्टादिष्व-तिव्याप्तिरतत इदमुक्तं प्रतीयमानतयेति । नन्वेवमपि प्रतीयमानतया भोग-साधनत्वस्य शरीरादिष्वपिभावादतिव्यापकं विषयलक्षणमित्यत उक्तं शरीरेन्द्रियातिरिक्तत्वे सतीति । तदेवं विषयलक्षणं सिद्धम् ।।४।।

---

१ घटपटवृत्तिजातित्वादित्यर्थः ।।टि.

इदानीमप्तेजोमरुतां पृथ्वीवदेव विभाग इत्यादिकमाह-

अप्तेजोमरुतो द्विधा क्षितिरिव त्रेधा च कार्यं पुनः
खं कालो दिगिदं तु तात्त्विकतया चैकैकमेव त्रयम् ।
द्वेधात्मा तु परो परश्च कथितस्त्वेकः परात्मेश्वरो
नानात्मात्वपरस्तथैव च मनः प्रत्यात्मनिष्ठत्वतः ।।५।।

कल्पलतिका

अप्तेज इत्यारभ्य पुनरित्यतः प्राक्तनः स्पष्टोऽर्थः । पृथिव्यादिवदाकाशादेः विभागो नास्तीत्याह खमित्यादिना त्रय मित्यन्तेन । औपाधिकविभागसद्भावाद्विभागो नास्तीत्ययुक्तमित्याशङ्क्य तात्त्विकतयेत्युक्तम् ।

आत्मनिरूपणम्

क्रमप्राप्तस्यात्मनो विभागमाह द्वेधात्मा तु परो परश्चेति । स्पष्टोऽर्थः । न "इन्द्रो मायाभिः पुरुरूप ईयते "[1] इति श्रुतिः, "एक एव तु भूतात्मा भूते भूते व्यवस्थितः[2] एकधा बहुधा चैव दृश्यते जलचन्द्रवत् " इति स्मृतिश्च न द्वेधात्मा तत्त्वत इति चेत्, न "द्वे ब्रह्मणी[3] वेदितव्ये परं चापरमेव च "। "द्वा[4] सुपर्णा सयुजा सखाया " इति चात्मद्वैध प्रतिपादकश्रुतिस्तदविरोधितदनुकूलन्यायानुमान सत्त्वात्तया विरोधिन्द्रोमायाभिरेक एव तु भूतात्मेतिश्रुतिस्मृत्योः द्वैतात्मप्रतिपादने सामर्थ्याभावात्, परमात्मैकत्वप्रतिपादन परत्वेनापि

---

१ बृ.उ. २।५।१९ ।
२ ब्र.बि.उ. १२ ।
३ [illegible]ऋग्वेदभा.भू. ।
४ मुण्ड.उ. ३।१।१ ।

गतिसंभवाच्च । एकएव परमात्मा नानेके परमात्मानः सन्तीति। ननु परमात्मन्यनेकत्वमेव न प्रसक्तमिति कुतो(स्य निषेधेन तदेकत्वं प्रतिपादयति श्रुतिरिति चेत्, न, विकल्पासहत्वात्, तथाहि- कस्तावदेवमाचष्टेति परमात्मन्यनेकत्वमेव न प्रसक्तमिति न तन्निषेधेन तदेकत्वं प्रतिपादयति श्रुतिरिति। किं वेदान्ती उत वैशेषिकनैयायिकपक्षपाती सयूथ्यः किं वान्यदृष्टिः[1] कश्चित्? न तावदाद्यः, ''नेह[2] नानास्ति'' त्यत्र परमात्मन्येव नानात्व प्रसक्तेस्तेनाङ्गीकारात् । ''अद्वामा[3] भवतः कथं साधकत्व प्रकल्पने ।किं न पश्यसि संसारं तत्रैवाज्ञानकल्पितम्'' । इति स्वयमुक्तत्वाच्च । नापि सयूथ्य इत्थं समर्थयते - आत्मैकत्वप्रतिपादकश्रुतिस्मृत्योरुक्तगतिप्रकारस्य तेनावश्यमभ्युपगमात्, अन्यस्य वा(नीश्वरवादिन इत्थं वक्तुमेवानुचितत्वात् परमात्मनि नानेकत्वं प्रसक्तमिति । धर्मिणः परमात्मन एवानङ्गीकारात्। ईश्वर वादिनस्त्वन्यस्योक्तयुक्त्यवश्याङ्गीकार्यत्वात् । तस्माद् द्वे ब्रह्मणी वेदितव्ये इत्यादि श्रुत्यनुसारिणात्मा द्वेधा परश्चापरश्चेति स्थितम् ।

कः परः कश्चापर इति विशदयति कथितस्त्वेकः परात्मेश्वरो नानात्मात्वपर इति । प्रथम श्लोके कथित ईश्वरः परमात्मा सचैक उक्तरीत्या, अपर आत्मा तु नाना अनेके अपरात्मान इत्यर्थः । नानात्मानो व्यवस्थात इति स्मृतिः ।

मनोनिरूपणम्

मनोसोप्य परात्मवन्नानात्वमाह तथैव च मन इति । मनश्च तथैवेत्यपरात्मवदेव नानेत्यर्थः । मनसो नानात्वे हेतुमाह प्रत्यात्मनिष्ठत्वत इति। प्रत्यात्म समवेतधर्माधर्मोपगृहीतत्वं प्रत्यात्मनिष्ठत्वम् । अयं भावः।यत्समवेत-

---

१ अन्यदृष्टिमानित्यर्थः । टि.
२ बृ.उ. भा. ४।४।१९ ।
३ बृ.उ.भा. वार्तिकम् १।४।१२१९ ।

धर्माधर्मवशीकृतं मनस्तस्यैव तत्सम्भवति सुखादिज्ञानहेतुरिन्दुमण्डलादिवदितिवाच्यम्, यतो यतः सम्भवति धर्माधर्मवशीकृतं तेनैव स्वकर्मोपार्जितं चन्दनाद्यादिप्रदेशविशिष्टेन संयोगिता इति तत्सम्भवति सुखादिज्ञानहेतुः । यदि च मनः सर्वधर्माधर्मवशीकृतं बहिस्तत्तत्कर्मोपार्जितचन्दनादिप्रदेशविशिष्टैस्तैः संयोगिता इति तत्तत्सम्भवति सुखादिज्ञानहेतुरितिवाच्यम् । तथाच युगपदनेकेषां सुखादिज्ञानवतां तत्तदिन्द्रियप्रदेशविशिष्टानां मनसा संयोगे महतो व्यापकत्वं प्रसज्येत, तच्चानिष्टमित्यवादिष्म । ततो मन एकस्यैव यस्य धर्माधर्मवशीकृतं तस्यैव तत्सम्भवति सुखादिज्ञानहेतुः । अन्यस्यान्यदेव तादृशं सुखादिज्ञानहेतुरिति प्रत्यात्मनिष्ठत्वं मनसः सिद्धम् ।।५।।

सामान्यतो गुणविभागः

एवं द्रव्याणां सामान्यतो विशेषतश्च विभागमभिधायेदानीं गुणानामपि तथैव विभागं विवक्षुः श्लोकद्वयेन गुणानां सामान्यतो विभागं विशेषतो रूपरसादि गुणविभागं प्रतिज्ञापूर्वकं रूपरसयोर्विभागञ्चाह-

रूपं चापि रसश्च गन्धसहितः स्पर्शश्च संख्या परी-
माणं चाथ पृथक्त्वयोगसहितस्तद्वद्विभागोऽपि च ।
स्यादेवं च परापरत्वयुगलं धीश्चेम[1] दुःखस्पृहाः
द्वेषो गुरुता द्रवत्वसहितः स्नेहः ससंस्कारकः ।। ६ ।।

धर्माधर्मयुता गुणा इति मताः सर्वे चतुर्विंशतिः
प्रत्येकं तु गुणा अमी कति कतीत्येतद्वदामोऽधुना ।
रूपं स्यात्सितपिङ्गलेतरहरित्श्यामारुणं षड्विधं
स्वादुक्षारकषायतिक्तकटवश्चाम्लश्च षोढा रसः ।।७।।

---

१ क्रोधोद्रोहोमन्युक्षमाऽमर्षं जाति द्वेषभिदा इति पदार्थधर्मसङ्ग्रहः । टि.

अत्र च रूपचेत्यादिना चतुर्विंशतिरित्युक्तम् । गणतः क्रमेणैव चतुर्विंशतित्वे सिद्धे शब्देन पुनर्ग्रहणमन्ययोगव्यावृत्त्यर्थम् । न पञ्चविंशत्यादिनापि त्रयोविंशत्यादिः किन्तु चतुर्विंशतिरेव गुणा इत्यर्थः । तत्रैवमन्वयः सर्वे गुणा इति, अनेनप्रकारेण चतुर्विंशतिरितीति किंतदाह रूपञ्चेत्यादिना ।

सहितशब्दस्य समुच्चयोऽर्थः

तत्र रसश्च गन्धसहित इत्ययं सहित शब्दो न गन्धरसयोर्धर्मधर्मिभावेन रूपसहितोघटइतिवत् । नापि सदेशत्वेन गन्धसहितं पृथिवीत्वमितिवत्, किन्तु समुच्चयाभिप्रायेण, दृश्यते हि समुच्चयेपि सहितशब्दप्रयोगः । तद्यथा- रोहिणीसहितमुत्तरात्रयमिति । श्रीयतिवचने उत्तरात्रयस्य रोहिणीनक्षत्रस्य च न धर्मधर्मिभावेन, नापि सदेशत्वेन साहित्यं किन्तु रोहिणीचोत्तरात्रयञ्चेतिसमुच्चयाभिप्रायेण । तथा[1] "यस्मिन् द्यौः पृथिवीचान्तरिक्षमोतं मनः सहप्राणैश्च" इत्यत्रापि प्राणैः सहमनश्चेति सहशब्दः समुच्चयाभिप्रायेण, तथैवात्र[2] सहितपदप्रयोग इति सन्तोष्टव्यम् ।

परिमाणञ्चेत्यत्र दीर्घत्वं नाप्रसिद्धमिति शङ्कनीयम् शिष्टप्रयोगदर्शनात्, तथाह्यद्वैतकौमुद्यां प्रयोगः -

निश्चलं यदि देहेन समानत्वं चिदात्मनः ।

न्यूनाधिकपरीमाणे देहे तन्मानता कथम् ? ।। इति पृथक्त्वयोगसहितस्तद्वत् विभागोऽपीत्यत्र सहितशब्दः पूर्ववदेवावगन्तव्यः । योगपदं

---

१ मु.उ. २।२।५ ।

२ तथैवात्रापीति यथाश्रुते नास्ति तदभावे दार्ष्टान्तिकासङ्गतिरिति निवेशितम् । टि.

संयोगवचनम्, पृथक्त्वञ्च संयोगश्चविभागश्चेति । अस्यार्थः, तद्वदिति संयोगवत्कर्मासमवायिकारणजन्यजातीयः । ततश्च गुण इत्यर्थः । अयं भावः, संयोगनाश एव विभाग इति केचित्प्रालभन्ते, तत्र संयोगवद्विभागस्यापि कर्मासमवायिकारणजन्यजातीयत्वदर्शनात् शब्दादिकारणत्वाच्च, संयोगनाशस्य च तथात्वाभावादिति । स्यादेवञ्च परापरत्वयुगलमित्यस्यायमर्थः । यथा रूपादयः स्वरूपभेदेन गुणा एवं परापरत्वे अपि स्वरूपभेदेन गुणौ न क्वचिदन्तर्भूताविति यावत् । अयमाशयः, बहुत्वविवक्षितसंयोगसन्ततिरेव परत्वापरत्वशब्दार्थौ न पुनः पृथग्गुणत्वमनयोरिति केचिदूचिरे, तन्न, बहुत्वप्रतिपादितसंयोगसन्ततिर्द्विष्ठत्वेऽप्यभावात्परत्वापरत्वप्रत्ययाभावाच्च । ततोऽस्ति तदतिरिक्तः परत्वापरत्वशब्दार्थ इति ।

धीशर्मद्वेषस्पृहा इति यावत्, गुर्विणः, द्रवत्वसहितः स्नेहः ससंस्कारक इत्यत्रापि पूर्ववदेव सहित शब्दो व्याख्येयः । ससंस्कारः संस्कारसहित इति । स्पष्टमन्यत् । खः शब्दः, शेषमतिरोहितार्थम् । एतदुक्तं भवति । रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नगुरुत्वद्रवत्वस्नेहसंस्कारधर्माधर्मशब्दाश्चतुर्विंशति गुणा इति ।

रूपलक्षणम्

तत्र चक्षुर्मात्रग्राह्यजातिमान् गुणो रूपम् । संख्यादिष्वतिव्याप्तिपरिहाराय मात्रपदम् । चक्षुर्मात्रग्राह्यो गुणो रूपमित्युक्ते प्रभासंयोगेऽतिव्याप्तिस्तदिदमुक्तं चक्षुर्मात्रग्राह्यजातिमानिति । चक्षुर्मात्रग्राह्यजातिमत्त्वात् गुणो रूपमिति । प्रभाद्रव्येऽपि व्याप्तिपरिहारार्थं गुणपदम् । नचवाच्यो रूपस्य मनः सत्त्वेऽपि चक्षुर्ग्राह्यजातिमद्गुणत्वेन तन्मात्रग्राह्यजातिमद्गुणत्वाभावादसम्भवि लक्षणमिति मात्रशब्देन करणान्तरव्यावृत्तिर्विवक्षितत्वात् । मनसश्च बाह्यग्रहणे करणत्वाभावात् । तस्माच्चक्षुर्मात्रग्राह्यजातिमान्गुणो रूपमिति रूपलक्षणं साधु ।

रसादिस्पर्शान्तानां निरूपणम्

रसनग्राह्यो गुणो रसः । घ्राणग्राह्यो गुणो गन्धः । अत्र लक्षणद्वये गुणपदं क्रमेण रसत्वगन्धत्व व्यावृत्त्यर्थम् । स्पष्टमन्यत् । स्पर्शनमात्रग्राह्यो-गुणः स्पर्शः । अत्र च गुणपदं स्पर्शत्वजातिव्यवच्छेदार्थम् । मात्रपदं संख्यादि-व्यावृत्त्यर्थम्[1] । न च वायुसंयोगे स्पर्शनमात्रग्राह्येऽतिव्याप्तिरिति वाच्यम्, वायुसंयोगस्याप्रत्यक्षत्वादुक्तलक्षणव्यावृत्तेः । कथमप्रत्यक्षो वायुसंयोग इति चेत्, अप्रत्यक्षवायुनिष्ठसंयोगत्वादिति ब्रूमः । यो ह्यप्रत्यक्षनिष्ठ-संयोगः सोऽप्रत्यक्ष इति व्याप्तेर्नभःस्तम्भसंयोगे प्रसिद्धत्वात् । ननु वायुः प्रत्यक्षोऽस्मदादिग्राह्यस्पर्शाधिष्ठानत्वात्तोयवत् । ततोऽप्रत्यक्षवायुनिष्ठ-त्वाभावस्तत्संयोगः प्रत्यक्ष इति भवत्येवोक्तलक्षणस्य तत्रातिव्याप्तिरिति चेत्, न, अस्मदादिग्राह्यस्पर्शाधिष्ठानत्वस्य तोयगतजातवेदस अप्रत्यक्षेऽपि भावेनानैकान्तिकत्वात् । ततो वायुरप्रत्यक्षः अरूपत्वे सति मूर्तत्वाच्च मनोवद-प्रत्यक्षो वायुः । तस्मादप्रत्यक्ष वायुनिष्ठत्वात्तत्संयोगस्याप्यप्रत्यक्षत्वा-न्नोक्तस्पर्शलक्षणस्य तत्रातिव्याप्तिः । ततः स्पर्शनमात्रग्राह्यो गुणः स्पर्श इति स्पर्शलक्षणं रमणीयम् ।

संख्यानिरूपणम्

गणनासाधारणकारणं संख्या । एको द्वौ त्रय इत्यादिः शाब्दो बौद्धो वा व्यवहारो गणना, तस्या यद् साधारणं कारणं सा संख्येति लक्षणार्थः । 'एको घटः' इत्यादि व्यवहारस्तावद्दण्डी देवदत्त इतिवद्विशि-ष्टविषयतया विशेषणविशेष्यतत्सम्बन्धज्ञानपूर्वकोऽभ्युपेयः ।

विशेषणं विशेष्यञ्च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा संकलय्यैतत्तथा प्रत्येति नान्यथा ॥

---

१ अनुपदमेव स्फुटं विवरणम् । टि.

इति वचनात् । तत्र विशेषणविशेष्यतत्सम्बन्धज्ञानेषु यस्य ज्ञानं व्यवहारान्तरसाधारणं न भवति तदेव तस्मिन् व्यवहारे असाधारणं कारणम् । विशेष्यांशज्ञानस्य च व्यवहारान्तरसाधारण्याद्विशेषणांशज्ञानस्यचातथात्वाद्विशेषणांशस्यैव विशिष्टव्यवहारासाधारणकारणत्वम् । नच सम्बन्धस्यापि ज्ञानं व्यवहारान्तरसाधारणं न भवतीति वाच्यम्, विशेष्यांशवदव्यवहारान्तरेऽपि साधारण्यात् । तस्माद्विशेषणस्यैव ज्ञानं व्यवहारान्तरसाधारणं न भवतीति तदेव विशिष्टव्यवहारासाधारणकारणम् । तथाचैको द्वौ इत्यादि गणनाव्यवहारेऽपि विशेषणीभूतस्यैकत्वादेरदृष्टत्वादेकत्वादिकमेव संख्येति स्थितम् । ततो गणनासाधारणकारणं संख्येति संख्यालक्षणं समञ्जसम् । दूषणान्तरविरहस्त्वतिरोहितः ।

परिमाणपृथक्त्वयोर्निरूपणम्

मानव्यवहारासाधारणकारणं परिमाणम् । अण्विदं महदिदमित्यादि व्यवहारो मानव्यवहारस्तस्यासाधारणंकारणं परिमाणमित्यर्थः ।उपपत्तिस्तु पूर्ववत् ।

पृथग्व्यवहारासाधारणकारणं पृथक्त्वम् । नचान्योन्याभावेऽतिव्याप्तिः, इदमस्मात्पृथगिति पृथग्व्यवहारासाधारणकारणत्वाभावात्तस्य। अयमयं न भवतीति हि तद्व्यवहारः । ततो व्यवहारभेदान्नान्योन्याभावे पृथक्त्वलक्षणस्यातिव्याप्तिः । उपपादनप्रकारः पूर्ववदवगन्तव्यः ।

संयोगविभागपरत्वापरत्वनिरूपणम्

अनित्यः सम्बन्धः संयोग इति संयोगलक्षणम् । समवायव्यवच्छेदार्थमनित्य

---

१ व्यवहारान्तरसाधारण्याभावादिति पाठः ।

इत्युक्तम् । नचानित्यः समवाय इति समवायपरीक्षायां वक्ष्याम इति न तत्रातिव्याप्तिः । नचाप्यजसंयोगोऽस्ति येन तत्राव्याप्तिराशङ्क्येत । नन्वाकाशमात्मना संयुज्यते भूतत्वाद् घटवदित्यनुमानादात्माकाशसंयोगः सिद्धः, तस्य च न कर्मजत्वम्, आत्माकाशरूपस्याश्रयस्यामूर्ततया कर्मानाश्रयत्वादन्यगतकर्मणश्च संयोगाकारणत्वात् । नचात्माकाशसंयोगः संयोगजः तथा-सत्यात्माकाशयोरन्यतरस्य कार्यत्वापत्तिः । कारणाकारणसंयोगपूर्वको हि कार्याकार्यसंयोगः संयोगजः, तथा सत्यात्माकाशयोरन्यतरस्य कार्यत्वापत्तिः । कारणाकारणसंयोगपूर्वको हि कार्याकार्यसंयोगः संयोगजः । तत आत्माकाशसंयोगस्याजत्वसिद्धेरव्यापकमुक्तलक्षणमिति ।

अत्र समाधिः । आकाशात्मसंयोगसाधनस्य भूतत्वस्य सोपाधिकतया व्याप्यत्वासिद्धेराकाशस्यात्मसंयोगोऽप्रामाणिक एव, यस्याजत्वमुच्यते । उपाधिश्चात्मसंयोगि मूर्तत्वम् । यत्तु सत्वात्मनासंयुज्यते तन्मूर्तमिति व्याप्तेः प्रसिद्धत्वात् । सति चैवं तस्य कर्मजत्वसंयोगजत्वादिवृत्तिकथनमवस्थाने तस्य संयोगत्वस्यैवाभावात् । तस्मादजः संयोगस्यासिद्धेर्नोक्तसंयोगलक्षणं तत्राव्यापकमिति सिद्धम् ।

विभक्तप्रत्ययासाधारणकारणं विभाग इति विभागलक्षणम् । नच संयोगविनाश एव विभक्तप्रत्ययासाधारणकारणमिति वाच्यम्, आश्रयनाशसंयोगनाशदर्शनेऽपि विभक्तप्रतीत्यभावात् । वर्तमानयोः सतथेति चेत्, न, वर्तमानयोः संयोगनाशे चिरन्तने सत्यपि व्यवहारयोग्ये विभक्तिप्रतीत्यभावस्य तादवस्थ्यात् । वर्तमानयोस्तात्कालिकः सस्तथेति चेत् न, विभक्तिप्रतीतिसाधारणकारणतया तादृक्संयोगनाशस्वीकारे पञ्चमी[2]

---

१ नास्त्यजः संयोग इति पदार्थधर्मसङ्ग्रहः संयोगप्रकरणम् ।
२ अवयवप्रकरणे पञ्चम विषयतायाम् स्फुटम् ।

व्यवहाराभावप्रसङ्गात् । तस्मात्संयोगनाशादन्यदेव यद्विभक्तप्रतीतिर-साधारणकारणं स विभाग इति । दूषणान्तरविरहः स्पष्टः ।

परव्यवहारासाधारणकारणं परत्वम्, अपरव्यवहारासाधारणकारणमपरत्वम् । स्तल्लक्षणद्वयपरीक्षा प्रागेव प्रत्यपादीति नेह प्रपञ्च्यते ।

बुद्धिलक्षणम्

बुद्धिलक्षणन्तु बाह्येन्द्रियाविषयः प्रकाशो बुद्धिः । आलोकव्यावृत्त्यर्थं बाह्येन्द्रियाविषय इत्यभिहितम् । नचात्मनो बाह्येन्द्रियाविषयस्य प्रकाशत्वादत्रांऽतिव्याप्तिरिति वाच्यम् आत्मनः प्रकाशरूपताभावात् । प्रकाशरूपत्वेसतीन्द्रियाद्यनपेक्षत्वप्रसङ्गाददोषस्योक्तत्वात् । घटप्रकाशवानहमित्यादिव्यवहारेष्वात्मनः प्रकाशाश्रयत्वेन प्रतीयमानस्य प्रकाशत्वानुपपत्तिश्च, स्वाश्रयवृत्तिविरोधात् । तस्माद्बाह्येन्द्रियाविषयः प्रकाशोबुद्धिरिति बुद्धिलक्षणं साधीयः ।

सुखदुःखयोर्लक्षणम्

निरुपाध्यनुकूलमनित्यं सुखमिति सुखलक्षणम् । दुःखव्यावृत्त्यर्थमनुकूलपदम् । सुखसाधनव्यावृत्त्यर्थं निरुपाधीति । अनन्यशेषमित्यर्थः । निरुपाध्यनुकूलं सुखमित्युक्ते दुःखाभावरूपे मोक्षेऽनन्यशेषेऽनुकूलेऽतिव्याप्तिस्तदर्थमनित्यमित्युक्तम् । दुःखाभावरूपस्तु मोक्षो नित्योऽनन्यशेषश्चेति मोक्षलक्षणपरीक्षायां वक्ष्यामः ।

निरुपाधिप्रतिकूलं दुःखमिति दुःखलक्षणम् । दुःखसाधनव्यावृत्त्यर्थं निरुपाधीतिपदम् । अनन्यशेषतया प्रतिकूलं दुःखमिति दुःखलक्षणार्थः ।

इच्छाद्वेषयोर्लक्षणम्

प्रवृत्त्यसाधारणनिमित्तजातीया इच्छा । श्रेयः साधनज्ञाने व्यभिचारो माभूदिति असाधारणनिमित्तपदम् । न च श्रेयः साधनज्ञानं प्रवृत्त्यसाधारणनिमित्तमिति मन्तव्यम्, अतीतश्रेयः साधनज्ञाने प्रवृत्त्यजनके व्यभिचारात् । वर्तमानश्रेयः साधनज्ञानं तथेति चेत्, न वर्तमान श्रेयः साधनस्य सुधामरीचिमण्डलोदयादिज्ञानेऽपि प्रवृत्त्यभावात् । अथ कृतिसाध्येष्टसाधनज्ञानं प्रवृत्तिबीजम्, तन्न, कृतिसाध्यस्य स्वर्गादीष्टसाधनस्यापि ज्योतिष्टोमादेर्ज्ञानेऽपि स्वर्गाद्यनिच्छतां प्रवृत्त्यभावात् । अथ स्वर्गाद्यनिच्छतां स्वर्गादीष्टमेव न भवतीति कुतस्तत्साधनस्य ज्योतिष्टोमादेरिष्टसाधनत्वं, कुतस्तरां च तज्ज्ञाने प्रवृत्त्यभावात्कृतिसाध्येष्टज्ञानं प्रवृत्तिबीजम् ?, नेत्युच्यते इति चेत्, तत्किमिदानीमिष्यमाणस्वर्गादिसाधनस्य ज्योतिष्टोमादेरिष्टसाधनत्वम्, अस्तीति चेत् तर्हि- अन्वयव्यतिरेकाभ्यां तदिच्छाया एव प्रवृत्तिहेतुत्वमुक्तं भवति । ततः प्रवृत्त्यसाधारणं निमित्तमिच्छैव । प्रवृत्त्यसाधारणं निमित्तमिच्छेत्येतावत्युच्यमाने सत्यामपीच्छायामालस्यादिप्रतिबन्धवशात्प्रवृत्त्यनुत्पत्तावव्याप्तिः स्यात्तदर्थं जातीयपदग्रहणम् । तदेवं प्रवृत्त्यसाधारणनिमित्तजातीयेच्छेतीच्छालक्षणं युक्तम् ।

जिहासाया असाधारणं निमित्तं द्वेष इति द्वेषलक्षणम् । परित्यक्तुमिच्छा जिहासा, सा च दुःखे तत्साधने च प्राणिमात्रस्यापि चकास्ति, तस्या यदसाधारणं निमित्तं स द्वेष इति लक्षणार्थः । न च दुःखज्ञानं वा तत्साधनज्ञानं वा जिहासाया असाधारणं निमित्तमिति वाच्यम्, तपस्विनामाध्यात्मिकादिदुःखतत्साधनज्ञानवतामपि तत्र जिहासाया अभावात् । अथ तेषामापातादाध्यात्मिकादिदुःखतत्साधनेषु तथाऽपि तत्त्वतो भाविस्वर्गादिसुखसाधनत्वावगमान्नतत्र जिहासा, तत्किमिदानीं तत्त्वतो भाविसुखहेतुदुःखतत्साधनज्ञानात्तत्र जिहासा । अस्तीति चेत्, न, तत्त्वतो भाविसुखहेतावभिचारकर्मविशेषे केनाञ्चिदाध्यात्मिकादिदुःखतत्साधनज्ञानेऽपि तत्र जिहासानुदयात् । ततो न

दुःखतत्साधनज्ञानं जिज्ञासाया असाधारणं निमित्तम् । ततो येन विषयीकृते दुःखे वा तत्साधने वा जिज्ञासा स्यात् स द्वेष इति जिज्ञासाया असाधारणं निमित्तं द्वेष इति द्वेषलक्षणार्थः सिद्धः ।

प्रयत्नलक्षणम्

आत्मनिष्ठ कृतीत्यर्थः प्रयत्नः । कृतिधातोरर्थः करणमिति यावत् । कृतीत्यर्थः प्रयत्न इत्युक्ते अग्निर्दहतीत्यत्र दाहकरणलक्षणेऽग्निनिष्ठे कृतीत्यर्थेऽतिव्याप्तिस्तत इदमुक्तमात्मनिष्ठ इति । तस्मादात्मनिष्ठः कृतीत्यर्थः प्रयत्न इत्येव प्रयत्नलक्षणं साधु ।

गुरुत्वद्रवत्वस्नेहानांलक्षणम्

एकवृत्तिपतनासमवायिकारणंगुरुत्वमितिगुरुत्वलक्षणम् । संयोगाद्व्यवृत्त्यर्थमेकवृत्तीतिविशेषणम् । स्पष्टमेतत् ।

एकवृत्तिस्यन्दनासमवायिकारणं द्रवत्वम् । स्यन्दनं प्रस्रवणं जलादौ प्रसिद्धम् । तदसमवायिकारणं द्रवत्वमित्युक्ते संयोगादावतिव्याप्तिस्तदर्थमेकवृत्तीति पदम् ।

द्रवत्वान्यत्वेसति सङ्ग्रहासाधारणंकारणंस्नेह इति स्नेहलक्षणम् । सङ्ग्रहः संयोगविशेषो यथाम्भसोः सम्भेदः । स हि सम्बन्धिनौ संगृह्णाति-एकतामिवापादयति - इति सङ्ग्रहः । न हि घटपटादिसंयोगवदयं विविक्ताश्रयतया प्रतीयते । ततोऽस्य संयोगस्य यदसाधारणंकारणं स स्नेहः । एतावत्युच्यमाने द्रवत्वेऽतिप्रसक्तिस्तदर्थं द्रवत्वान्यत्वेसतीत्युक्तम् ।

त्रिविधसंस्कारनिरूपणम्

स्वोत्पत्त्यवस्थापादकजातीयोगुणः संस्कार इति संस्कारलक्षणम्। स्वस्योत्पत्त्यवस्था = स्वोत्पत्त्यवस्था - तामापादयतीति स्वोत्पत्त्यवस्था-पादको यो गुणः सः संस्कारः । अयं भावः । स्वोत्पत्तौ यादृगवस्था द्रव्यस्य तामवस्थां स्थितिकालेऽपि सम्पादयति तद्यथा - वेगाख्यसंस्कारोत्पत्तौ द्रव्यस्याश्रयभूतस्य शरादेः प्रचलनावस्था भवति, तामेवावस्थां वेगाख्यः संस्कारः स्वस्थितावपि सम्पादयति ।

स्थितिस्थापकोऽपि स्वस्योत्पत्तौ यादृगवस्थापन्नद्रव्यसमवेतस्तामेवावस्थां स्थितावप्याश्रयस्यापादयति ।

एवं भावनापि स्वोत्पत्तौ यद्विषयज्ञानावस्थापन्नआत्मनिसमवेता तद्विषयज्ञानावस्थां स्थितिकालेप्याश्रयस्य सम्पादयति । ततः स्वोत्पत्त्य-वस्थापादकत्वस्य वेगादौ दृष्टत्वादुक्तमेवसंस्कारलक्षणं युक्तम् । कर्मणि व्यभिचारो माभूदिति गुणपदम् । कर्मणोऽपि स्वोत्पत्तौ संयोगादिमत्त्वा-वस्थापन्नद्रव्यसमवेतस्य स्वस्थितावपि[1] स्वाश्रयस्य तादृगवस्थापादकत्वात्, अतो युक्तं गुणपदेन तद्व्यावृत्तिः । चरमादिसंस्कारे विवक्षितलक्षणाभावादव्या-प्तिमाभूदिति जातीयपदम् । तदेवं संस्कारलक्षणं निरवद्यम् ।

धर्माधर्मशब्दानां निरूपणम्

सुखासाधारणकारणं धर्मः । दुःखासाधारणकारणमधर्मः ।अत्र च लक्षणद्वयेऽपि कालादिविषयव्यावृत्त्यर्थमसाधारणपदम् ।

श्रोत्रग्राह्योगुणः शब्दः । शब्दत्वव्यावृत्त्यर्थं गुणपदम् ।शब्दस्य च

---

१ चरमसंस्कारस्य स्वोत्पत्त्यवस्थापादकत्वाभावादिति । टि.

गुणत्वमनुमानादवादिष्म । [१] 'तस्य शब्दो गुणोक्त,' इत्यागमादपि शब्दस्य गुणत्वसिद्धिः । दूषणान्तराविरहः स्पष्टः ।

रूपभिदा:

तदेवमेवंलक्षणरूपादिगुणानां सामान्यतो विभागमुक्त्वा प्रत्येकं विभागं प्रतिजानीते प्रत्येकंत्वित्यादिनाऽधुनेत्यन्तेन । नाऽत्रतिरोहितोऽर्थः । तत्रप्रथमोपक्रान्तरूपस्य विभागमाह रूपं स्यादित्यादिना षड्विधमित्यन्तेन। रूपमिति जात्येकवचनम् । सितापिङ्गपीतरक्तश्यामा रुणामितिद्वन्द्वसमासादि-ववद्भावेनैकवचनम् । [२] "सर्वो द्वन्द्वो विभाषयैकवत्स्यात्, ' इति वचनात् । षड्विधमितिपदमन्ययोगव्यावृत्यर्थम् ।

चित्ररूपस्यनिरूपणीयत्वम्

न च चित्ररूपस्य सदात्वादन्ययोगव्यावृत्तिरयुक्तेति वक्तव्यम्, चित्ररूपस्य सितादिसमुदायत्वात्, समुदायस्य च वास्तवान्तरानभ्युपगमात्, ततः षड्विध-मेवरूपं सितादिभेदेन, तत्र सितत्वादीनि सितादीनां लक्षणानि सितत्वजा-तिमत्सितमित्यादिप्रकारेण निरूपणीयानि ।

शुक्लरूपस्यसस्यचलक्षणम्

सितत्वादि: किं लक्षणमिति चेत्, उच्यते इन्दीवरवृत्त्यवृत्तिस्तीय-रूपवृत्तिजातिः सितत्वम् । रूपवृत्तिजातिः सितत्वमित्युक्ते पीतत्वादिषु स्पष्टो व्यभिचारस्ततस्तीय रूपवृत्तिजातिः सितत्वमित्युक्तम् । तथापि रूपत्व-गुणत्वसत्ताख्यातिव्याप्तिस्तासामापितीयरूपवृत्तिजातित्वात्तदमुक्तमिन्दी-

---

१ शब्दस्य गुणत्वेऽनुमानमात्रस्य प्रमाणत्वे विप्रतिपद्यमाने प्रत्यागमस्यापि तत्त्वं दर्शयति । टि.

२ अष्टा. २।४।१२ ।

वरवृत्त्यवृत्तिरिति । इन्दीवरवृत्तयो ये गुणादयस्तेषु न वर्तत इति भावः। इन्दीवरवृत्तिवृत्तयश्च रूपत्वादिजातयः तस्मादिन्दीवरवृत्त्यवृत्तिरितिपदेन युक्तैव तद्व्यावृत्तिः ।

तीयवृत्त्यवृत्तिर्नूतनदलपल्लवरूपवृत्तिजातिः पिङ्गत्वम्, व्यावृत्तिकथनं पूर्वरीत्यैव । अनयैव रीत्या पीतत्वादीनां लक्षणमुन्नेयम् ।

एवं सितादिभेदेन रूपविभागमभिधाय क्रमप्राप्तस्य रसस्य विभागमाह स्वादिन्त्यादिना रस इत्यन्तेन । अत्रापि स्वादुत्वादीनि स्वादुप्रभृतिरसानां लक्षणानि ज्ञेयानि । स्वादुत्वादिलक्षणं तु लवणवृत्त्यवृत्तिस्तीयरसवृत्तिर्जातिः स्वादुत्वम् । तीयवृत्त्यवृत्तिर्लवणरसवृत्तिजातिः क्षारत्वम् । एतद्दिगवलम्बनेन कषायत्वादीनामपिलक्षणमुन्नेयम् ।।६।।, ।।७।।

तदेवं रूपरसेत्यादिना श्लोकद्वयेन रूपादिगुणानां सामान्यतो विभागमुक्त्वा विशेषतो विभागप्रतिज्ञापूर्वकं रूपरसयोश्चविभागमभिधायेदानीं क्रमेण गन्धादीनां विशेषविभागमभिधित्सुः प्रथमतस्तावदेकश्लोकेन गन्धादि चतुष्कस्यविशेषवि-भागमाह-

गन्धस्तु द्विविधः सुरभ्यसुरभिभेदेन शीतोष्णता-
ऽनुष्णाशीतविभेदतस्तु भवति स्पर्शस्त्रिधैव स्थितः ।
संख्येकद्विबहुत्वरूपभिदया त्रेधा चतुर्धा पुन-
र्मानं स्थूलमथाणुदीर्घमथ च ह्रस्वं प्रभेदैरिति ।।८।।

कल्पलतिका

अयमर्थः । गन्धस्तु द्विविधः, तु शब्दो रूपरसवत् बहुविधत्वं गन्धस्य

निषेधति।

गन्धस्पर्शभेदाः

माभूद्गन्धस्य रूपरसवच्छट्प्रकारत्वेन बहुविधत्वं तथापि स्पर्शादिवत्त्रिविधत्वं चतुर्विधत्वं वा भविष्यतीत्याशङ्क्याह द्विविध इति, हेतुमाह सुरभ्यसुरभिभेदेनेति । सुरभिश्चासुरभिश्च सुरभ्यसुरभी तयोर्द्वैधं भेदः तेन गन्धो द्विविध इत्यर्थः । सुरभिस्तावच्चन्दनमृगमदकर्पूरचम्पकबकुलकमलमुकुलादीनां गन्धः । सुरभित्वजातिमान्सुरभिरिति सुरभिगन्धलक्षणम् । असुरभित्वजातिमानसुरभिरिति असुरभि गन्धलक्षणम् । सुरभित्वं तु कुत्सितकर्दमादिवृत्तिगन्धावृत्तिर्मृगमदगन्धवृत्तिर्जातिः । वैपरीत्येनासुरभित्वं ज्ञेयम् ।घ्राणतर्पणोगन्धः सुरभिः । तद्विपरीतोऽसुरभिरिति च तयोर्लक्षणम् ।

एवं गन्धं विभज्य स्पर्शं विभजते शीतोष्णेत्यादिना त्रिधा इत्यन्तेन। शीतश्चोष्णश्च अनुष्णाशीतश्च शीतोष्णानुष्णाशीतास्तैश्च ते विभेदाश्च तेभ्यः शीतोष्णानुष्णाशीतविभेदतः स्पर्शस्त्रेधैव त्रिधा निश्चितो भवतीत्यर्थः । तत्र जलमात्रवृत्तिः स्पर्शः शीतः तेजोमात्रवृत्तिः स्पर्शः उष्णः । तेजोजलेतरवृत्तिः स्पर्शोऽनुष्णाशीतः । उष्णादन्योऽनुष्णः, शीतादन्योऽशीतः, अनुष्णश्चासावशीतश्च अनुष्णाशीतशब्दार्थः । ननूष्णशीताभ्यामन्योऽनुष्णाशीत इत्यपि व्युत्पत्तौ विवक्षितार्थलाभात्कथमनुष्णश्चासावशीतश्चेति व्युत्पत्त्याऽनुष्णाशीतइतिपदप्रयोग इति चेत्, न, उष्णशीताभ्यामन्योऽनुष्णाशीत इति व्युत्पत्तिः प्रत्येकमुष्णशीतेच संभवेन विवक्षितार्थलाभाभावात् । यद्यपि केवल उष्णशीतो वा स्पर्श उष्णाद् शीताद् वा न्यो न भवति तथाप्युष्णशीताभ्यां ताभ्यामन्यो भवत्येव, अन्यथा द्व्यक्रुपत्वापत्तिः । तस्मादनुष्णश्चासावशीतश्चेत्यनुष्णाशीत इत्येव समञ्जसः पदप्रयोगः ।

संख्यादिपृथक्त्वान्तानां विभागः

क्रमप्राप्तं संख्यागुणं विभजते संख्येत्यादिना । स्पष्टोऽर्थः । एकत्वादिलक्षणानि तु तत्तद्व्यवहारासाधारणकारणत्व रूपाणि ज्ञेयानि ।

संख्यानन्तरोक्त परिमाणविभागंदर्शयति चतुर्धा पुनर्मानमिति । कथं चतुर्विध्यमित्याकांक्षायामाह स्थूलमित्यादि । अत्र चाणुपरिमाणस्य यद्यपि स्थूलपरिमाणानन्तर्यं न देशतः कालतो वा संगच्छते तथापि स्थूलपरिमाणस्य प्रसिद्धतरत्वात्तदपेक्षयाऽणु परिमाणस्याप्रसिद्धत्वादुपपद्यते एवानन्तर्यं मणुपरिमाणस्य, एवं दीर्घानन्तर्यं ह्रस्वस्यापि ज्ञेयम् । अतो न ऽनर्थोऽथपदप्रयोगः । तत्र दीर्घान्यत्वेसति परमाणु तत्कार्यासमवेतं मानं स्थूलमिति तल्लक्षणम्, ह्रस्वान्यत्वेसतिपरमाणु तत्कार्यसमवेतं मानमण्वित्यणुपरिमाणलक्षणम् । दीर्घह्रस्वत्वयोश्च तत्तत्प्रत्ययासाधारणकारणत्वेन लक्षणं निरूपणीयम् ॥ ८॥

अथ पृथक्त्वादीनां सुखान्तानां विभागमेकश्लोकेनाह-

एकानेकगतं पृथक्त्वमिति च द्वेधाथयोगो द्विधा
कर्मोत्थोऽपि च योगजोऽपि च तथा द्वेधा विभागो भवेत् ।
कर्मोत्थोऽपि विभागजोऽथ समयादेशात्परत्वादिकं
द्वेधा धीः स्मरणानुभूत्य सुखं स्वर्गश्च सांसारिकम् ॥९॥

कल्पलतिका

पृथक्त्वमेकानेकगतमिति द्वेधा च चकारोऽवधारणार्थः । एकगतञ्चानेकगतञ्च = एकानेकगतम् । "द्वन्द्वान्ते श्रूयमाणं प्रत्येकमभिसम्बध्यते" इति न्यायादेकानेकगतमित्यत्रानेकपदात्परमपठितपदं पूर्वेणैकपदेनापि सम्बध्यते

---

१ अथशब्दस्य न ऽनर्थकत्वमदृष्टचरं क्वचित् तथापि प्रकृतग्रन्थानुरोधादेव तथोद्दङ्कितम् । टि.

एकस्मिन्नेव वर्तमानं पृथक्त्वम्, एकान्तं पृथक्त्वम्, तद्विपरीतमनेकान्तंपृथक्त्व-मिति तत्लक्षणं ज्ञेयम् ।

संयोगभेद निरूपणम्

क्रमप्राप्तं संयोगं विभजते अथयोगो द्विधेति । द्विधात्वं विशदयति कर्मोत्थोऽपि च योगजोऽपिचेति । कर्मजःसंयोगजश्चेति द्विविधःसंयोग इत्यर्थः । लक्षणं तु स्पष्टमेव । तत्र कर्मजःसंयोगो यथा - स्थाणोः श्येनादिनामल्ल-योश्च परस्परं संयोगः । संयोगजस्तु यथा- कारणाकारणसंयोगजन्यः कार्या-कार्यसंयोगः, तथाहि केशसंयुक्तन्तुना तन्त्वन्तरसंयोगसति द्वितन्तुकद्रव्यमार-भ्यते, तच्च द्वितन्तुकं केशेनापि संयुक्तमुपलभ्यते । नच द्वितन्तुककेशसंयोगोनित्यः, विनाशदर्शनात् । नापि कर्मजन्यः, आश्रयभूतयोर्द्वितन्तुककेशयोः कर्माभावेऽपि तस्योपलम्भात्, नहि तदानीं द्वितन्तुके वा केशेवा उभयोर्वा परस्परमप्राप्तयोः कर्मोत्पाद्य संयोगमुत्पादयतीति प्रतीतिमार्गमालम्बते, तस्मात् द्वितन्तुककेशनिष्ठ संयोगस्यासमवायिकारणान्वेषणायामन्यस्यासंभवात् द्वितन्तुकप्रतिकारणा-कारणयोस्तुन्तुकेशयोर्यःसंयोगः स एवासमवायिकारणभवितुमर्हतीति सन्तोष्ट-व्यम् ।

विभागविशेषः

संयोगवद्विभागस्यापिद्वैविध्यमाह तथा द्वेधा विभाग इत्यादिना । कर्मजविभागजविभागयोर्लक्षणंस्पष्टम् । उदाहरणन्तु कर्मजविभागस्य स्थाणोः श्येनस्य च विभागो मल्लयोर्वा विभागः । विभागजविभागोदाहरणन्तु-कारणाविभागजन्यः कार्याकार्यविभागः, कारणमात्रविभागजन्यः कारणा-कारणविभागश्च । तथाहि - क्वचित्तन्तुकेशविभागद्द्वितन्तुककेशविभागः । अयं भावः । द्वितन्तुकस्यकारणंतन्तुरकारणञ्च केशः तयोः संयुक्तयोरन्य-

तत्कर्मजोयोभयकर्मजो वा यो विभागः सः कारणाकारणविभागः । तस्मादेव विभागात्कार्याकार्ययोर्कित्तन्तुकदेशयोः पूर्वोक्तरीत्या संयुक्तयोर्विभाग उत्पद्यते यः सः कार्याकार्यविभागः । न च कार्याकार्ययोर्कित्तन्तुकदेशयोरपि विभागः कारणाकारणतन्तुदेशविभागवत्तत्व, मंजन्यो भवत्विति शङ्कनीयम्, तथाहि - कारणाकारणविभागारम्भकंकर्म कार्याकार्यविभागारम्भकं न भवति कारणनिष्ठविभागारम्भककर्मत्वात् द्रव्यारम्भकसंयोगविरोधिविभागारम्भककर्मवत् । तस्माद्र्कित्तन्तुकदेशयोः कार्याकार्ययो विभागः कारणाकारणतन्तुदेशविभागजन्यो न तु तत्कर्मजन्य इति स्थितम् ।

तथा क्वितन्तुकस्य कारणातन्तोः कारणस्यैव तन्त्वन्तरस्यान्यतरकर्मजोवोभय कर्मजो वा यो विभागः सः कारणमात्रविभागः ।तस्मादेवविभात्कारणाकारणयोर्विवदिततन्त्वरम्भः प्रदेशयोर्विभाग उत्पद्यते यः सः कारणाकारणविभागः । न च सोऽपि कर्मज एवेतिवाच्यम्, तथाहि-द्रव्यारम्भकसंयोगविरोधिविभागजनकंकर्म द्रव्यानारम्भकसंयोगविरोधिविभागजनकं न भवति द्रव्यारम्भकसंयोगविरोधविभागजनकत्वात् यन्नैवम् न तदेवम् यथा कमलमुकुलविकासकर्मेति केवल व्यतिरेकानुमानप्रयोगात् क्वितन्तुकारम्भकसंयोगविरोधिविभागारम्भकस्य विवदिततन्तुकर्मणो विवदिततन्तु म्भः प्रदेशविभागे द्रव्यानारम्भकसंयोगविरोधिनं प्रत्यनारम्भकत्वा न्न तन्तुम्भः प्रदेशविभागस्य कर्मजत्वमुपपद्यते ।

परत्वापरत्वयोर्भेदनिरूपणम्

एवं कर्मजविभागजत्वभेदेन विभागमभिधाय परत्वापरत्वयोः प्रत्येकं क्रमेण भेदमाह अथ समयादिशात्परत्वादिकं द्वेधेति । परत्वं कालकृत दिक्कृतञ्च । आदिशब्दादपरत्वञ्च तथा द्विधेति तात्पर्यार्थः ।आदित्यपरिवर्तनीत्पाद्य परत्व कालकृतम्, तद्विपरीतं दिक्कृतम् । एवमपरत्वमपि ज्ञेयम् ।

बुद्धिविस्तारः

बुद्धिविभागमाह धीः स्मरणानुभूरिति । स्मरणसहितानुभूः स्मरणानुभूः, शाकपार्थिवन्यायेन सहितपदलोपः, धीः स्मरणंचानुभवश्चेति द्विधेत्यर्थः। तत्र यथार्थमप्रमाज्ञानं स्मरणम्, संशयविपर्ययौ व्यभिचारी माभूदिति यथार्थमित्युक्तम्। स्पष्टमन्यत्। अस्मरणरूपं ज्ञानमनुभवः। सचानुभवोयथार्थोऽयथार्थश्चेति द्विविधः। तत्राद्यावः संशयो विपर्ययश्चेति द्वेधा। तत्र संशयस्य लक्षणं न्यायमत सङ्ग्रहे वक्ष्यति। विपर्ययस्य तु लक्षणं मिथ्याध्यवसायो विपर्यय इति। नात्र तिरोहितं किञ्चित्।

यथार्थोऽनुभवः पुनः प्रत्यक्षानुमितिभेदेन द्वेधा। तत्र ज्ञायमानकरणजन्यान्यो यथार्थानुभवः प्रत्यक्षानुभवः। अनुमितिव्यावृत्त्यर्थं ज्ञायमानकरणजन्यान्य इत्युक्तम्। संशयादिव्यावृत्त्यर्थं यथार्थानुभव इत्युक्तम्। स च प्रत्यक्षानुभवो द्वेधा नित्योनित्यश्चेति। तत्रेश्वरानुभवो नित्यः। अनित्यः पुनः प्रत्यक्षानुभवो घ्राण- रसन- चक्षुः - स्पर्शन - श्रोत- मनोरूप करणभेदात्षोढा।

अनुमित्यनुभवस्य तु लक्षणं ज्ञायमानकरणजन्यो यथार्थोऽनुभवोनुमितिरूपोनुभव इति। प्रत्यक्षानुभव व्यावृत्त्यर्थं ज्ञायमानकरणजन्य इत्युक्तम्। संशयादिव्यावृत्त्यर्थं यथार्थानुभव इत्युक्तम्। नचाप्तवाक्यादिरूप ज्ञायमानकरणजन्य यथार्थवाक्यार्थानुभवेऽनुमितिरूपेऽतिव्याप्तिरिति शङ्कनीयम्, आप्तवाक्यादेरनुमानान्तर्गतत्वाङ्गीकारात् तज्जन्यानुभवस्यानुमितिरूपत्वेन तत्रोक्तलक्षणवृत्तेरभीष्टतमत्वात्।

सोऽयमनुमितिरूपोनुभवः केवलान्वयिकेवलव्यतिरेक्यन्वयव्यतिरेकिरूपलिङ्गापरपर्यायकरणभेदात् त्रेधा। तत्र पक्षव्यापकसपक्षावृत्तिविपक्षशून्यमबाधिताविनयमसत्प्रतिपक्षं लिङ्गं केवलान्वयि। यथोक्तोपपन्नं सपक्षशून्यं

विपक्षाद्व्यावृत्तं केवलव्यतिरेकि । यथोक्तोपपन्नञ्च सपक्षावृत्ति विपक्षाद्व्यावृत्तमन्वयव्यतिरेकि । अत्र चासिद्धिव्यावृत्त्यर्थं पक्षव्यापकपदम् । केवलान्वयिलक्षणे तु सपक्षावृत्तिपदमनध्यवसितव्यावृत्त्यर्थम् । तत्रैव विपक्षासत्त्वपदमन्वयव्यतिरेक्यनैकान्तिकयोरपोहार्थम् । अबाधितविषयपदमसत्प्रतिपक्षपदञ्च कालातीतप्रकरणसमयोरुक्तक्रमेणापोहार्थं सर्वत्र । केवलव्यतिरेकिलक्षणे तु सपक्षशून्यपदमनध्यवसितान्वयव्यतिरेकिणोरपोहार्थम् । विपक्षाद्व्यावृत्तमिति च पदं विरुद्धानध्यवसितयोरपोहार्थम् । अन्वयव्यतिरेकिलक्षणे तु सपक्षावृत्तिपदं केवलव्यतिरेक्यनध्यवसितयोरपोहार्थम् । विपक्षाद्व्यावृत्तमितिचानैकान्तिककेवलान्वयिनोरपोहार्थम् । तदेतत् त्रिविधमपि लिङ्गं स्वार्थं परार्थञ्चेति द्वेधा । तत्रप्रतिज्ञाहेतूदाहरणोपनयनिगमनानपेक्षं स्वार्थम्, तदपेक्षं परार्थमिति। अत्र च प्रतिज्ञालक्षणं पक्षादिलक्षणमासिद्धादिलक्षणञ्च सोदाहरणं केवलान्वयाद्युदाहरणञ्च न्यायमतसङ्ग्रहे वक्ष्यति । तदेवं संशयविपर्ययौ, नित्यानुभवौ, घ्राणादिजन्यषट्प्रकारः, केवलान्वय्यादिलिङ्गत्रयजन्यास्त्रिप्रकारोऽनुभवोऽनुमितिरूपः, सोऽपि स्वार्थपरार्थलिङ्गजन्यतया प्रत्येकं द्विविध इति पञ्चदशधा सम्पद्यतेऽनुभवरूपा बुद्धिः । तदेतत्पञ्चदशधात्वं ग्रन्थान्तरप्रसिद्धत्वादतिविस्तरभयाच्च नेह प्रत्यपादीति सन्तोष्टव्यम् ।

सुखादिसंस्कारान्तविभागः

बुद्ध्यनन्तरोद्दिष्टस्य सुखस्येदानीं विभागमाह- अथ सुखं स्वर्गश्च सांसारिकमिति । अथ शब्दः सुखस्य बुद्धिभिन्नत्वं बोधयति । केचिदाहुः- बुद्धिभेदः सुखं न तु बुद्धेर्विलक्षणं सुखमिति, तथाहि -

तदतद्रूपिणोभावास्तदतद्रूपहेतुजाः

तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् । इति तन्न, अतद्रूपिणोऽपि तद्रूपहेतुजत्वदर्शनेन विज्ञानाभिन्नहेतुजत्वेऽपि सुखस्य विज्ञानविलक्षणत्वसंभवात्।

दृश्यते हि संयोगविलक्षणस्यापि विभागस्य संयोगाभिन्नहेतुजत्वम्, धर्मात्सुखं-
ज्ञानञ्चेत्यभियुक्तवचनादपि ज्ञानसुखयोः पार्थक्यमास्थेयमिति । तदेतत्सुखं
स्वर्गश्चसांसारिकञ्चेति द्विविधमित्यर्थः । इच्छामात्राधीनं साधनसाध्यं सुखं
स्वर्ग इति तल्लक्षणम् । अस्वर्ग्यसुखापोहार्थमिच्छामात्राधीनमित्युक्तम् ।
असंभवपरिहारार्थं साधनसाध्यमित्युक्तम् । स्वर्गानुभवव्यावृत्त्यर्थं सुखमित्यु-
क्तम् । अस्वर्गसुखं सांसारिकम् । स्पष्टमेतत् । ननु स्वर्गस्यापि संसारदशाया-
मुत्पद्यमानत्वेन सांसारिकत्वे[1] कथं स्वर्गश्चसांसारिकञ्चेति द्विविधमिति भेदव्यप-
देश इति चेन्न, ब्राह्मणपरिव्राजकन्यायेन सालक्षण्येऽप्यपि भेदव्यपदेशोपपत्तेः ॥९॥

इदानीं क्रमप्राप्तस्य दुःखादेः संस्कारान्तस्य प्रत्येकं विभागमेकश्लोके-
नाह-

दुःखंकमथार्थसाधनपरं कामक्रुधौ च द्विधो-
दासीनं प्रतिषेधविधिविषयौ यत्नस्त्रिधा गौरवम् ।
नित्यं चान्यदिति द्रवत्वमपि च स्वाभाविकं हेतुजम्
स्नेहोऽप्येवमथोत्तरोऽपि च स्वोभावस्थितिस्थापकः ॥१०॥

कल्पलतिका

दुःखमेकमितिरूपादिवन्नियतप्रकारं न भवतीत्यर्थः । इच्छाद्वेषयोः
प्रत्येकं विभागमाह अथार्थसाधनपरं कामक्रुधौ च द्विधेति । अथ शब्दो
दुःखवदनेकत्वं वारयति अर्थसाधनपरं इति । साध्यसाधनविषये[2] कामक्रुधा-
विच्छाद्वेषौ । इच्छा साध्यविषया साधनविषया चेति द्विधा, द्वेषोऽपि

---

१ परिव्राजकस्य सत्यपि ब्राह्मणत्वे यथा पृथग्ग्रहणं तद्वदत्रापीति । टि.

२ कामक्रुधाविच्छाद्वेषौ च फलविषयौ साधनविषयौ चेत्यग्रे
स्फुटीभविष्यति । टि.

साध्यविषय साधनविषयश्चेति द्विविधेत्यर्थः । तत्र स्वर्गादीच्छासाध्यविषयेच्छा, ज्योतिष्टोमादीच्छासाधनविषया, दुःखादि द्वेषः साध्यविषयद्वेषः, सर्पादिद्वेषः साधनविषयद्वेषः ।

नन्वर्थसाधनपरकामक्रुधाविव्यत्रार्थशब्देन स्वर्गादेव पुमर्थतयाभिधेयत्वाद्दुःखादेश्चातथात्वात्तत्र द्वेषः कथमर्थपरपदापर्यायसाध्यविषयशब्देनोच्यत इतिचेत्, न अर्थशब्देन फलपदार्थाभिधानाद्दुःखादेश्च दुःखसाधनसाध्यफलत्वात्तद्विषयद्वेषस्यार्थपरपदापर्यायेणसाध्यविषयशब्देनाभिधाने दोषाभावात् । नन्वसमीहितस्यैव फलपदवाच्यत्वं येन दुःखादेर्दुःखसाधनसाध्यत्वेऽपि फलपदाभिधेयत्वं नास्तीत्यच्यते, "आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोष प्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्[1]" इति सूत्रे फलपदेनाधर्मजन्यस्य दुःखसंवेदनादेरप्यभिधानादसमीहितेऽपि फलपदप्रयोगसंभवात्, तस्मात्फलपर्यायेणार्थशब्देन दुःखस्याप्यभिधातुमुचितत्वात्साध्यत्वाच्च द्वेषस्य साध्यविषयत्ववर्णनं रमणीयमिति स्थितम् ।

द्वेषानन्तरोक्त प्रयत्नस्य विभागमाचष्टे उदासीनप्रतिषिद्धविधविषयी यत्नस्त्रेधेति । उदासीनविषयी यथेश्वरादिप्रयत्नः । प्रतिषिद्धविषयी यथाभिचारादिसाधनश्येनादि प्रयत्नः स्नानादिप्रयत्नो वा, विहितविषयीप्रयत्नो यथा सन्ध्यादिप्रयत्नः ।

नन्वभिचारादिसाधनश्येनादिप्रयत्नस्य न प्रतिषिद्धविषयत्वं श्येनाभिचरन् यजेतेत्यादिना[2] श्येनादेर्विहितत्वात् । नच मा हिंस्यात् सर्वाभूतानी-[3]त्यत्र भूतहिंसाया निषिद्धत्वाच्छ्येनादिश्च हिंसासाधनत्वेन प्रतिषिद्धत्वाद्वि-

१ न्या. सू. १।१।९ ।
२ सामता. म. ब्रा.
३ कृष्णयजुतैत्तिरीयब्रा. ।

षयप्रयत्नस्य कथं न प्रतिषिद्धविषयत्वमिति मन्तव्यम्, तथासति तद्वदेव अग्नीषोमीयं पशुमालभेत[1] इत्यत्र पश्वालम्भस्य विहितस्य न हिंस्यादित्यनेन प्रतिषिद्धत्वापत्तेः । ततः श्येनादिप्रयत्नस्य न प्रतिषिद्धविषयत्वमिति ।

अत्रोच्यते - श्येनादीनां फलद्वारेण प्रतिषिद्धमभिप्रेत्य तद्विषयप्रयत्नस्य प्रतिषिद्धविषयत्वमुदाहरति, तदाहुर्भट्टपादाः -

"श्येनादीनां विधेयत्वादिष्टस्यापि च साधनात् ।
उपचारादनर्थत्वं फलद्वारेण वर्ण्यते इति[2] ॥"

तदेवं प्रयत्नं विभज्य गुरुत्वं विभजते गौरवं नित्यं चान्यदिति । परमाणुवृत्तिनित्यगुरुत्वं कार्यवृत्त्यनित्यमित्यर्थः । स्पष्टमन्यत् ।

द्रवत्वं विभजते द्रवत्वमपि च स्वाभाविकं हेतुजमिति । स्वाभाविकमिति विजातीयादसमवायिकारणाजन्यं न भवतीत्यर्थः, यथा जलगतद्रवत्वम् । हेतुजमिति विजातीयादसमवायिकारणजन्यमिति यावत्, यथा घृतादिद्रवत्वम् । अत्र च स्वाभाविकमितिपदं लक्षणविवक्षितार्थपरम्, हेतुजमित्यत्र हेतुशब्दः सङ्कुचितवृत्त्या विजातीयादसमवायिकारणमाह, सङ्कोचे किं कारणमिति चेत् ?, हेतुजमित्यत्र हेतुशब्दप्रयोगस्य वैयर्थ्यप्रसङ्गोऽन्यथेति ब्रूमः । तथाहि - हेतुजमित्यत्र हेतुजन्यत्वप्रतिपादके जपदे हेतुशब्दो व्यावर्त्याभावादनर्थकः स्यात्, न खलु जन्यत्वं हेतुं विना क्वापि दृष्टचरम्, तदयं हेतुशब्दोऽनर्थकत्वमन्यथा प्रतिपाद्यमानः सङ्कुचितवृत्त्यैव सार्थक्यमश्नुते । यथा खलु मयूराणां केका इत्यत्र केकापदेनैव मयूराणां सम्बन्धिनां प्राप्तौ पुनर्मयूरग्रहणं घनाघनोन्नति-

---

१ तै. सं. ६।१।११ तत्र हि हिंस्यादिति पाठः । टि.

२ श्लोकवार्तिकम्, चो.प्र.श्लो. २१६-१७ ।

सञ्जातानन्दप्रमदमावन्मयूरविशेषप्रदर्शनार्थं मयूराणामितिपदं सङ्कुचितवृत्त्या नीयतेति, हन्ति तु हैतजमित्यत्र हेतु पदमपीतियुक्तमनुपश्यामः ।

द्रवत्वं द्वेधप्रकारं तदुत्तरस्मैऽप्यतिदिशति स्नेहोऽप्येवमिति । द्रवत्ववत्स्वाभाविको हेतुजश्च स्नेह इत्यर्थः, उदाहरणादि पूर्ववत् ।

संस्कारं विभजते अथोवरीपित्यादिना । अथ शब्दः स्नेहसंस्कारस्य द्वैविध्यं प्रतिषेधति । उत्तरशब्दः संस्कारस्य स्नेहानन्तरीकत्वात्संस्कारमाह त्रयोभावस्थितिस्थापक इति । वेगोभावना स्थितिस्थापकश्चेति त्रिविधः संस्कार इत्यर्थः । तत्र कर्मजः संस्कारोवेग इति वेगलक्षणम् । इतर संस्कारव्यावृत्त्यर्थं कर्मजपदम् । संयोगादिव्यावृत्त्यर्थं संस्कारपदम् । ज्ञानजः संस्कारोभावना । स्पष्टोऽर्थः । उभयान्यः संस्कारः स्थितिस्थापकः । एषामुदाहरणादिस्तत्सामान्यलक्षणपरीक्षायामेव प्रत्यपादीति नेदानीं प्रतिपाद्यते ॥१०॥

अथ धर्माधर्मशब्दानां प्रत्येकं विभागाभिधानपुरस्सरं क्रमप्राप्तकर्मजातिविशेषाणां प्रत्येकं विभागमभिधत्ते-

[illegible]स्याद्धर्मोऽपि विधानवारणतया द्वेधोतरोऽपि द्विधा
भोग्यः पुण्यमितरत् एवं च तथा वर्णोऽप्यवर्णो स्वः ।
सङ्कोचः फलं प्रसारणमथोत्क्षेपो गतिः पञ्चधा
कर्मेवं परापरभिदाविधा जातिर्विशेषो बहु. ॥११॥

कल्पलतिका

धर्माधर्मशब्दानां विभागः

अत्र च प्रथमार्धेन धर्माधर्मशब्दानां प्रत्येकं विभागमाह तथाहि- विधानवारणतया द्वेधा धर्मः । विधानशब्देन प्रवर्तकोधर्मो गृह्यते, वारणशब्देन च

निवर्तकोधर्मो गृह्यते, तेन प्रवर्तको निवर्तकश्चेति द्वेधा धर्म इत्यर्थः ।

अयमाशयः - सुखासाधारणकारणंधर्म इति धर्मलक्षणम्, कश्चिद्धर्मः सुखमुत्पादयिष्यन्पुरुषमिष्टसाधने प्रवर्तयत्यनिष्टसाधनाद् वा निवर्तयति । कश्चिद्धर्मस्ततो यत्सुखमिष्टसाधने प्रवृत्तस्य भवति तस्य सुखस्यासाधारणकारणं धर्मः प्रवर्तक इत्युच्यते । यत्तु सुखमनिष्टसाधनान्निवृत्त्या भवति, यथा पान्थस्य मध्याह्नप्रचण्डमार्तण्डकिरणैर्दह्यमानमार्गान्निवृत्त्या तज्जनितदुःखविलय-पूर्वकं सुखं तस्य सुखस्यासाधारणो धर्मोऽनिष्टसाधनान्निवृत्तिमुत्पाद्य सुखं जनयन्नि-वर्तक इत्युच्यते । न चानिष्टसाधनान्निवृत्त्या तज्जनितदुःखविलय एवास्तु सुखमपीति वाच्यम्, प्रतीतिविरोधात् । भवति हि पान्थस्यैवं प्रतीतिरध्व-निवृत्तस्येदानीमध्वजनितदुःखं मे विनष्टं सुखेन तिष्ठामीति ।

अथवा विधानवारणतयेत्यस्यायमर्थः, यजेतेत्यादिनाऽवगतो धर्मो[1] विधानम्, नेक्षेतोद्यन्तमादित्यम्[2] इत्यादिनावगतो धर्मो वारणमिति । एवं धर्मं द्वैधमभिधायाधर्मद्वैधमभिधत्ते - उभयोऽपि द्विधेति । तदेवाह भोग्यः पुण्यनिवर्त्य एवेति । आवश्यकफलोऽधर्मो भोग्यो- यथाकामकृतब्रह्महत्या-दिजनितोऽधर्मः, तन्निवर्तकप्रायश्चित्तानुपदेशात् । यत्तु ब्रह्महत्यादीनां द्वादशाब्दादिव्रतविधानं तदकामकृतविषयम्, पुण्यनिवर्त्यस्त्वधर्मो यथा साधारणस्त्रीगमनादिजनितः, तन्निवर्तकप्रायश्चित्तविधानात् ।

एवमधर्मं विभज्य शब्दं विभजते तथा वर्णोऽप्यवर्णो एव इति । एवं शब्दः सोऽपि वर्णोऽप्यवर्णश्चेति तथा द्विधेत्यर्थः । धात्ववयवजातीयो वर्णो-भ्वादिधातूनामवयवो भकारादिः स एव वर्ण इत्युच्यमाने नामावयवभकारा-

---

१ स्वर्गकामो यजेत इत्यादि वाक्यघटितम् । टि.

२ मनुस्मृ. ४।३७ ।

दिष्वव्याप्तिस्ततो जातिग्रहणम् । धात्वादिलक्षणं स्वयमूह्यम् शास्त्रान्त-
राद्वावगन्तव्यं विस्तरभयान्नाभिधीयते । वर्णादन्यो ऽवर्णः शब्दो यथा
भेरीशङ्खमृदङ्गडिण्डिमाडम्बरादिः । न च वाच्यं, पदवाक्यादिशब्दानां
धात्ववयवजातीयत्वाभावाद्वर्णादन्यत्वेनावर्णरूपत्वात्तत्रातिव्याप्तिरवर्ण-
लक्षणस्येति । पदवाक्यादिशब्दानां वर्णसमुदायरूपत्वात्समुदायस्य च तत्त्व-
न्तरत्वानभ्युपगमाद्वर्णान्यत्वासिद्धेः ।

कर्मविभागः

तदेवं धर्माधर्मशब्दानां स्यादर्थं इत्यादिना प्रथमार्थेन प्रत्येकं विभागमभि-
धाय सर्वगुणविभागनिरूपणानन्तरोक्त विभागनिरूपणस्य कर्मणो विभागमाह
सङ्कोच इत्यादिना कर्मैव चेत्यन्तेन । स्पष्टोऽन्वयः । तत्र दीर्घस्य ह्रस्वत्वा-
भासापादक जातीयं कर्म सङ्कोचः । दीर्घस्य ह्रस्वत्वापादकजातीयं कर्म सङ्कोच
इत्युक्ते ऽसंभवः स्यात्, नहि दशहस्तपटस्य सङ्कुचितस्यापि वास्तवं ह्रस्वत्वं
भवति - तत इदमुक्तं दीर्घस्य ह्रस्वत्वाभासापादकजातीयं कर्म सङ्कोच इति।
स्पष्टमन्यत् ।

आत्मापेक्षयोर्ध्वदेश संयोगयोग्यस्याधोदेशसंयोगहेतुजातीयं कर्म पतनम्।
उत्क्षेपणकर्मणोऽपि कस्यचिदपेक्षयाधोदेशसंयोगहेतुत्वादतिव्याप्तिस्तत्र माभू-
दिति- आत्मापेक्षयेत्यवादि । गमनान्तर्भूतरेचनादिष्वतिव्याप्तिमाभूदित्यू-
र्ध्वदेशसंयोगस्येत्युक्तम् । सुगममन्यत् ।

सङ्कुचितस्यायतत्वापादकजातीयंकर्म प्रसारणम् नात्र विशेषितं
किञ्चित् ।

आत्मापेक्षयाधोदेशसंयोगयोग्यस्योर्ध्वदेश संयोगजातीयंकर्मोत्क्षेपः ।
अत्राप्यात्मापेक्षयेत्यादि सार्थक्यं पूर्ववदवगन्तव्यम् ।

उक्तकर्मविलक्षणं कर्म गतिः । न चैवं भ्रमणादिष्वतिव्याप्तिर्लक्षण-मुक्तगतिलक्षणस्येति वाच्यम्, भ्रमणादीनामपि गमनकोटिनिविष्टत्वात्, तदाहुः-भ्रमणरेचनोर्ध्वज्वलनतिर्यग्गमननमनोन्नमनानि तु गमनविशेष इति ।

जातिविभागः

इदानीं जातिविभागमाह परापरभेदाद्द्विधा जातिरिति । घटशब्दवृत्ति-जातिः परा, तदितरजातिरपरा । अत्र च परजातिलक्षणे जातिग्रहणं घटशब्दनिष्ठान्योन्याभावस्यावृत्त्यर्थम्, सा च परा जातिर्द्रव्यगुणकर्मस्वेव वर्तते । जात्यादिष्वपि तदभ्युपगमेऽनवस्थादोषप्रसङ्गः । तदितरजातिर्द्र-व्यत्वादिः ।

विशेषत्वनिर्वचनम्

विशेषस्य नियतविभागत्वं नास्तीत्याह विशेषा बहुरिति । ननु द्रव्यादीनामिव बहुत्वेऽपि केनचिदवच्छेदेन नियतविभागत्वं विशेषाणामप्य-स्त्विति चेन्न विशेषाणां द्रव्यादीनामिवावच्छेदकस्यानुपपत्तेः । अत्यन्तव्या-वृत्तरूपत्वाद्विशेषाणाम् । कथमत्यन्तव्यावृत्तत्वं विशेषाणामिति चेत्, अनुगतप्रत्यय-कारणाभावादिति ब्रूमः । विशेषत्वस्य विशेषपदप्रवृत्तिनिमित्तस्यानुगतप्र-त्ययहेतुत्वमस्तीति चेत्, न विकल्पासहत्वात्, तथाहि- किमिदं विशेषत्वं जातिरुत धर्ममात्रमिति ।[१] नाद्यः, रूपहानिलक्षणजातिबाधकप्रसङ्गात्, द्रव्यादित्रयान्यतमत्वप्रसङ्गाच्च विशेषाणाम्, जातिमत्त्वस्य तन्नियमात् । अथ धर्ममात्रमित्युत्तरः कल्पः, तथापि स धर्मो विशेषेभ्योऽन्योऽनन्यो वा ?।

---

१ अन्धकारत्वस्य पदार्थव्यवृत्तित्वेनात्रान्यतमत्वं स्थापितम्, यथाऽलोकत्वन्धकारत्व-मस्तीति तदत्रासङ्गत्या परित्यक्तम् । भेदत्वावच्छिन्नप्रतियोगिताकभेद-वत्त्वमन्धकारत्वमन्यतमत्वन्तु भेदकूटावच्छिन्नप्रतियोगिताकभेदवत्त्वमित्यादि-परिष्कारचिन्ताऽऽकरेषु स्फुटेतिदिक् । टि.

यद्यन्यः, तर्हि द्रव्यादिष्वन्यतमो वा समवायो वा स्यात्, जातित्वस्याधुनैव निरुक्तत्वात् । तत्र द्रव्यादिष्वन्यतमत्वे विशेषत्वधर्मस्य विशेषनिष्ठत्वायोगात् । समवायस्य च सम्बन्ध्यधीनत्वात् । विशेषत्वस्य सम्बन्ध्यधीनस्यानुपपत्तिप्रामाणिकत्वाच्च ।

अथ विशेषत्वं धर्मविशेषाभ्यो(ऽ)न्यस्तर्हि तस्यानुगतप्रत्ययहेतुत्वाभावात्सिद्धं नः समीहितमनुगतप्रत्ययकारणाभावादत्यन्तव्यावृत्तत्वं विशेषाणामिति । विशेषपदप्रवृत्तिनिमित्तन्तु प्रत्येकं विवक्षितलक्षणसम्बन्ध इति न कोऽपि दोष इति ।।११।।

अथ क्रमप्राप्तस्य समवायस्य प्रकारनिरूपणपूर्वकमुक्तद्रव्यादिप्रकारनिरूपणमभिधाय तत्प्रयोजनाभिधानप्रतिज्ञानान्तरं तत्प्रयोजनलक्षणमाचष्टे -

इत्यादितः समवाय एव षडमी व्युत्पादिता भागशो
भावा द्रव्यपुरस्सरा अथ पुनस्तेषां फलं प्रोच्यते ।
तेषां तत्त्वमतिर्निदानमनघा मोक्षस्य संसारिणां
मोक्षश्चाजडसनातनचितेः कैवल्यमित्युच्यते ।।१२।।

कल्पलतिका

समवायस्यैकत्वम्

समवाय एक एव स्यादित्यस्यायमभिप्रायः । यदि समवायो(ऽ)नेकः स्यात्तर्हि अनित्योऽपि स्यात्, यत्र हि सम्बन्धत्वे सत्यनेकत्वं तत्रानित्यत्वं यथा संयोग इति व्याप्तेरनवद्यत्वात्, न चानित्यत्वं समवायस्य सम्भवत्यनुपपत्तेः, तथाहि - यद्यनित्यः समवायः स्यात्तर्हि भावत्वे सत्यनित्यत्वात्समवेतोऽपि स्यात् संयोगवत्, तथा चानवस्थादोषस्य प्रतीकारं नोपलभामहे । किञ्च

समवायस्यानित्यत्वे संयोगस्येव सम्बन्धिसमवायिकारणकता वक्तव्या । तथाच घटरूपयोः सम्बन्धिनोः समवायात्प्रागपि सत्ता वक्तव्या साचायुक्ता, न हि घटासमवेतरूपं सत्तामालम्बते, तथात्वे गुणत्वव्याघातात्, तस्मात्समवायस्यानित्यत्वानुपपत्तेः नित्यत्वमपि नोपपद्यते । कथं तर्हि रूपसमवायो समवाय इत्यादिप्रकारेण समवायानेकत्वं प्रतीयते? आकाशवदौपाधिकमिति ब्रूमः, यथाहि - घटाद्युपाधिभेदादाकाशस्यात्र तत्त्वतस्त्वेकत्वमिति सर्वं सुन्दरम्।

उपसंहारोपक्रमः

एवमुक्तं द्रव्यादिसमवायान्तविभागमुपसंहरति षडमी व्युत्पादिता भागशो भावा द्रव्यपुरःसरा इति ।

स्यादेतत् - यदि द्रव्यादिपदार्थविभागाभिधानस्य साफल्यं युक्तिपदवीमध्यासीत, नैतदस्ति, नहि तावतस्य मोक्षः फलमालम्बते, तस्य धर्मसमुच्चितज्ञानैकफलत्वादित्याशङ्क्याह - अथ पुनस्तेषां फलं प्रोच्यते इति ।

पदार्थनिरूपणस्य परमं प्रयोजनं कैवल्यम्

तेषां फलं निरूप्यन्नाह तेषां तत्त्वमतिर्मोक्षजननीति ।

स्पष्टोऽन्वयः । अयं भावः ।

यद्यपि द्रव्यादिपदार्थविभागाभिधानस्य साक्षान्मोक्षफलत्वं न सममस्ति तथापि तत्त्वज्ञानजनकतया पारम्पर्येण तत्फलत्वोपपत्तिरिति ।मोक्षः किंलक्षण इत्यत आह मोक्षस्तु संसारिणां मोहध्वंसजः समात्रविलयो कैवल्यमित्युच्यत इति। संसारिणामिति जीवानां कैवल्यमेव मोक्ष इतिशब्देनोच्यते । ननु केवलं नामान्यासंसृष्टस्वरूपत्वं तच्च जीवानां न जातु संभवति, तेषां सर्वदैव संख्यादि-

संसृष्टत्वेनासंसृष्टस्वरूपत्वाभावादसंभवि मोक्षलक्षणमितिचेन्न, एवमाशङ्‌क्य किन्न खलु वयमन्यासंसृष्टस्वरूपत्वं कैवल्यमङ्‌गीकुर्मः, किन्तु विवक्षितासंसृष्टस्वरूपत्वमेव कैवल्यमिति । तदत्र विवक्षितदुःखमात्रासंसृष्टत्वं जीवानां कैवल्यं मोक्ष इत्युच्यते, कस्मिन् सति जीवानां तादृक् कैवल्यमित्यपेक्षायां मोहध्वंसज दुःखमात्रविलय इत्युक्तम् । मोहोनाम देहादावात्मादिबुद्धिः सवासना, तद्ध्वंसाज्जातो यो दुःखमात्रविलयस्तस्मिन्सतीत्यर्थः । इदमनुक्तम्-पदार्थतत्त्वज्ञाननिरस्ते समस्तदुःखहेतौ मोहे तत्कार्यं दुःखमात्रविलयाज्जीवानामुक्तलक्षणं कैवल्यं मोक्षमित्याचक्षते इति सकलमकलङ्‌कमिति ।।१२।।

इति श्रीकविकैरवेन्दुश्रीजाणराजविरचितायां
कल्पलतिकायां वैशेषिकशास्त्र-
संग्रहप्रक्रिया ।

अथ न्यायमतसङ्ग्रहः

पदार्थोद्देशः

अथेदानीं मादृशास्त्रस्त्राधिकाया न्यायशास्त्रस्य वैशेषिकशास्त्रेण बहुषु तत्त्वेषु साम्येन बुद्ध्या तैरादवैशेषिकशास्त्रसंग्रहानन्तरं न्यायशास्त्रमपि संजिघृक्षुस्तत्प्रतिज्ञाय तत्प्रतिपाद्य प्रमाणादिपदार्थांस्तत्प्रयोजनञ्चाह-

ब्रूमो न्यायमतं तदर्थमितये मानं प्रमेयं तथा

सन्देहश्च फलं निदर्शनमथो तन्त्रं तथांशोऽपि च ।

तर्को निर्णयवादजल्पवचनान्येवं वितण्डा भवेः

दाभासछलजातिनिग्रहपदान्येषां विमोशो मतः ।।१।।

कल्पलतिका

अयमत्रार्थसङ्ग्रहः । न्यायमतं ब्रूम इति प्रतिज्ञा । अत्र ब्रूम इति बहुवचनेन स्वस्य प्रतिपदाप्रतिदीपपटुतामाचष्टे, तेन निरूपयिष्यतस्य निरस्तसमस्ताशङ्कतया निरूपणं क्रियत इति भावः । तन्निरूपण प्रयोजनमाह तदर्थमितय इति । तत्प्रतिपाद्यार्थपरिज्ञानायेति यावत् । एवं न्यायमतं प्रतिज्ञाय तत्प्रतिपाद्यमर्थं सूत्रक्रमानुसारेणानुक्रामति मानमित्यादिनानिग्रहपदानीत्यन्तेन । सूत्रञ्च "प्रमाणप्रमेय संशय प्रयोजनदृष्टान्तसिद्धान्तावयवतर्क निर्णयवादजल्पवितण्डा- हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्व ज्ञानान्निःश्रेयसाधिगम[१]" इति प्रमाणमारभ्य निग्रहस्थानपर्यन्तं षोडशपदार्थानुद्दिशति । त एवात्रापि ताव- न्त एव तेनैव क्रमेणोद्दिष्टा इत्यस्ति सूत्रक्रमानुसारः ।

संशयस्यन्यायपूर्वाङ्गत्वम्

नवार्च्यं सन्त्यनेकधर्मशब्दाः, तादृग्धर्मवतस्तस्योपलम्भाद्, विशेषस्मृ-

---

१ न्या.सू. १।१।१ ।

त्यपेदात् द्रव्यत्वादिसाधकबाधकप्रमाणाभावसाचिव्यात् संशयो भवति, किमयं शब्दो द्रव्यं गुणः कर्म वा ? न हि तादृग्धर्मवद्द्रव्यगुणकर्मणां मन्यतमदिति सम्प्रतिपन्नं तथा विप्रतिपत्तिरिति विप्रतिपत्तिमूलवादिप्रवादात्संशयो भवति, यथा- कश्चिदाहात्मास्तीति नास्तीति कश्चित् ततो मध्यस्थस्य विशेषस्मृत्यपेक्षात्वादास्तित्वनास्तित्वसाधकबाधकप्रमाणाभावसचिवाद् विप्रतिपत्तिमूलप्रवादात्संशयो भवति किमस्त्यात्मा नवेति । तदिदं समानधर्मानेकधर्मविप्रतिपत्तिरूपकारणभेदात् त्रिविधः संशयः ।

तथाच सूत्रम् "समानानेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशय[१]" इति । अस्यार्थः, विमर्श इति विरोधिनानार्थविमर्शः संशय इति संशयसामान्यलक्षणम् । समानत्वादि तु तत्प्रतिपादकभेदप्रतिपादनार्थम् । समानधर्मोपपत्तेरनेकधर्मोपपत्तेश्च संशयो भवतीति त्रैविध्यावधि । उपलब्ध्यनुपलब्ध्यव्यवस्थातश्चेति साधकबाधक प्रमाणाभावलक्षणं साधारणकारणसंशयत्रयस्योक्तम् । विशेषापेक्ष इत्यनेन स्थाणुत्वादिविशेषस्मृतेरपि साधारणकारणत्वं सूचितमिति । नच संशयस्य प्रमेयान्तर्भावात्कथं प्रमेयात्पृथगुद्देशपूर्वकं लक्षणमिति शङ्कनीयम्, न्यायाङ्गतया पृथगुद्देशापपत्तेः । तथाचोक्तम् -"तत्र[२] नानुपलब्धे न निर्णीते प्रवर्तते, किन्तु संशयिते" न्यायस्तदङ्गं तेन संशय इति ।

प्रयोजनादिसिद्धान्तानां पृथगुद्देशप्रयोजनम्

इदानीं क्रमप्राप्तस्य प्रयोजनापरपर्यायस्य फलस्य लक्षणमाह कृत्युद्देश्यपदं फलमिति । कृतिः प्रयत्नः प्रवृत्तिनिवृत्त्यात्मकः । उद्देश्यपदं विषय

---

१ न्या.सू. १।१।२३ ।

२ न्या.भा. १।१।१ ।

उद्देशपदम् = उद्देश्यमिति यावत् । कृतः उद्देशपदं कृत्युद्देश्यम्, क्रियादि यत तत् फलं प्रयोजनमित्यर्थः । तथा च सूत्रम्[1], अयमर्थः - यदधिकृत्य प्रवर्तते तत्प्रयोजनमिति प्रमेयान्तर्भूतमपि प्रयोजनं न्यायाङ्गत्वात्संक्षेपतः पृथक् प्रत्यपादि। तदुक्तम् -

प्रयोजनमनुद्दिश्य न च न्यायं प्रयुञ्जते ।
प्रमेयान्तर्गतं तस्माद्भेदेनोक्तं प्रयोजनमिति ।।

निदर्शनशब्देनोद्दिष्टस्य दृष्टान्तस्य लक्षणमाह समतया प्रोक्तस्य दृष्टान्तेति । वादिप्रतिवादिनोर्बुद्धिसमतया सम्प्रतिपन्नतया प्रोक्तो यः सो दृष्टान्त इत्यर्थः । तथाच सूत्रम् - "लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः" इति । अस्यार्थः - लौकिकाः प्रतिपाद्याः परीक्षकाः प्रतिपादकाः, वादिप्रतिपादिन इत्यर्थः । तेषां यत्रार्थे साध्यसाधर्म्यात्तद्धर्मभाविनि, साध्यवैधर्म्यादतद्धर्मभाविनि वा बुद्धिसाम्यं सो दृष्टान्त इति । अस्यापि प्रमेयान्तर्भूतस्य न्यायाङ्गत्वात्पृथगुपन्यासः, तदुक्तम् -

एष भेदो बहिर्भूतो दृष्टान्तः पृथगुच्यते ।
न्यायसम्बन्धविज्ञानस्थानीयत्वाद्गुणा विनेति ।।

तन्त्रशब्दोद्दिष्टस्य सिद्धान्तस्य लक्षणमाह सिद्धान्तस्तु मतमिति । मतमिति प्रामाणिकार्थाङ्गीकरणं सिद्धान्त इत्यर्थः । तथाच सूत्रम् - "तन्त्राधिकरणा[illegible] सिद्धान्तः" इति । अस्यार्थः तन्त्र्यन्ते व्युत्पाद्यन्ते प्रमेयाणि अनेनेति तन्त्रं प्रमाणं तदेवाधिकरणमाश्रयो येषामर्थानां

---

१ न्या.सू. १।१।२४ ।
२ न्या.सू. १।१।२५ ।
३ न्या.सू. १।१।२६ ।

ते तन्त्राधिकरणाख्यानामभ्युपगमसंस्थिति रङ्गीकरणं सिद्धान्त इति ।

स च सिद्धान्तश्चतुर्विध:, सर्वतन्त्रसिद्धान्त:, प्रतितन्त्रसिद्धान्तोऽधिकरणसिद्धान्तोऽभ्युपगमसिद्धान्तश्चेति । तत्र सर्वशास्त्राविरुद्धसिद्धान्त: सर्वतन्त्रसिद्धान्त:, यथा मानाधीनामेयसिद्धिरिति । समानतन्त्रसिद्धोऽपरतन्त्रासिद्ध: प्रतितन्त्रसिद्धान्त:, यथा पौरुषेया वेदा इत्यभ्युपगमो वैशेषिकाणां नैयायिकानां च । यत्सिद्धावन्यप्रकरणसिद्धिस्तदभ्युपगमोऽधिकरणसिद्धान्त:, यथा विवादपदं बुद्धिमत्कर्तृपूर्वकमिति सिद्धौ सर्वज्ञत्वादयोऽप्यर्था अप्रकृता: सिद्ध्यन्ति, अपरीक्षिताभ्युपगमात्तद्विशेषपरीक्षाभ्युपगमोऽभ्युपगमसिद्धान्त:[१], अपरीक्षितं साक्षान्सूत्रेणानुक्तम्, यथा मनस इन्द्रियत्वम्, तस्याभ्युपगम आत्ममनोऽपीन्द्रियसंयोगादात्मन: प्रत्यक्षत्वाभ्युपगम इति । अस्यापि प्रमेयान्तर्भूतस्य प्रयोजनवशात्पृथक्परीक्षा, तदप्युक्तम् -

धर्मिणि प्रायशो नैव आश्रयासिद्धिवारक: ।
वादजल्पवितण्डानां हेतुरित्युच्यते पृथगिति ।।

अवयवानां समिलक्षणम्

जिज्ञासादीनां नामावयवानां लक्षणसूत्रात्पूर्वं विभागमाह प्रत्यास्त्ववयवा: पञ्च प्रतिज्ञादय इति अवयवा इत्यनेन साधनवाक्यैकदेशत्वं सामान्यलक्षणमवयवानां सूचितम् । प्रतिज्ञादय इति प्रतिज्ञा हेतूदाहरणोपनयनिगमनानीत्यर्थ: ।

तत्र पक्षवचनं प्रतिज्ञा, पक्षो नाम सिषाधयिषितधर्माधर्मी, तस्य वचनं अङ्गीकारेणाभिधानं प्रतिज्ञेत्यर्थ: । यथानित्य: शब्द इति ।साधनत्वव्यापकं लिङ्गवचनं हेतु:, साधनत्व व्यापकमिति सिषाधयिषितार्थसिद्धौ

---

१ न्या.सू. १।१।३१ ।

हेतुत्वबोधकं यल्लिङ्गवचनं तद्धेतुशब्देनोच्यत इत्यर्थः । यथा कृतकत्वादिति पञ्चम्यन्तं कृतकत्वस्य धर्मस्य सिसाधयिषितानित्यत्वसिद्धौ हेतुत्वबोधकम् । लिङ्गवचनं हेतुरित्येवोच्यमाने कृतकत्वमिति प्रथमान्तमपि लिङ्गवचनं हेतुः स्यात् अत इदमुक्तं साधनत्वव्यापकमिति । साधनत्वव्यापकं वचनं हेतुरित्येव हेतुलक्षणे वेमादिना पटो भवतीत्यत्र वेमादिनेतिवचने वेमादीनां पटं प्रति साधनत्वव्यापकं भवति प्रसक्तिः स्यात् लिङ्गवचनमित्युक्तम्, तस्मात् साधनत्वव्यापकं लिङ्गवचनं हेतुरिति हेतुलक्षणं युक्तम् ।

लिङ्गं नाम व्याप्तिपक्षधर्मतावद्वस्तु । पक्षधर्मतावल्लिङ्गमित्युक्ते पक्षमात्रनिष्ठे शब्दत्वादौ भवति प्रसक्तिः स्यात् व्याप्तिपद प्रदीपः । व्याप्तिमल्लिङ्गमित्येवोच्यमाने आत्माऽनित्यः कृतकत्वादित्यत्र कृतकत्वधर्मस्यानित्यत्वेन व्याप्तौ सत्यामपि पक्षधर्मत्वाभावेनासाधकत्वादलिङ्गस्य लिङ्गत्वप्रसङ्गः स्यात् अत इदमुक्तं व्याप्तिपक्षधर्मतावदिति, वस्तुपदं स्पष्टार्थम् ।

व्याप्तिलक्षणं तु अव्यभिचारी सम्बन्धो व्याप्तिरिति । हिंसात्वाधर्मसाधनत्वयोरिव सोपाधिक उन्नीतव्यभिचारी दृष्टव्यभिचारी वा सम्बन्धो व्याप्तिर्माभूदिति अव्यभिचारादीत्युक्तम् ।

उपाधिस्तु साधनाव्यापकत्वे सति साध्यसमव्याप्तिधर्मः, साध्यसमव्याप्तिधर्म उपाधिरित्युक्ते वह्निमत्वादिसाध्यसमव्याप्तौ ज्वलदिन्धनवत्त्वादिधर्मेऽति व्याप्तिस्तदर्थं साधनाव्यापकत्वे सतीत्युक्तम्, ज्वलदिन्धनवत्त्वादिधर्मस्तु साधनव्यापकः पक्षेऽपि वर्तमानत्वात् । साधनाव्यापक उपाधिरित्युक्ते प्रकृतपक्षान्यत्वादिधर्मेऽतिव्याप्तिः, तस्य साधनवत्पक्षावृत्तित्वेन साधनाव्यापकत्वात् अत इदमुक्तं साध्यसमव्याप्तिरिति । प्रकृतपक्षान्यत्वं तु साध्याभाववद्-

विपक्षेऽपि वृत्तेर्न साध्यसमव्यापकम्, सुरभिधूमवत्वादिधर्मे वन्हिमत्वादि साध्यव्यापकेधूमवत्वादिसाधनाव्यापकेऽतिव्याप्तिमाभूदिति समपदम्, प्रकृत-पदात्येऽतिव्याप्तिमाभूदित्यनतिप्रसङ्गित्वेसतीति ज्ञेयम्, तदेवं साधनाव्याप-कत्वेसति साध्यसमव्याप्तिरित्युपाधिलक्षणं युक्तम् । तथाचोक्तम् - 'साधना-व्यापकाः साध्यसमव्याप्ता उपाधयः' इति, यथा- विमता हिंसाअधर्मसाधनं हिंसात्वात् प्राक्प्रयुक्त हिंसावदित्यत्र निषिद्धत्वमुपाधिरिति, तदाह;-

निषिद्धत्वेन हिंसाया नाधर्मत्वं प्रयुज्यते ।[१]
तदभावे न तत्सिद्धिर्हिंसात्वादप्रयोजकादिति ॥

दृष्टान्तवचनमुदाहरणम्, स्पष्टोऽर्थः । तद्द्विधा- साधर्म्योदाहरणं वैधर्म्योदाहरण ञ्चेति ।तत्रान्वयमुखेनोदाहरणं साधर्म्योदाहरणम्, यथा यत्कृतकं तदनित्यम् यथा घट इति । व्यतिरेकमुखेनोदाहरणं वैधर्म्योदाहरणम्, यथा यदनित्य न भवति न तत्कृतकं यथाकाशमिति । अन्वयव्यतिरेकौ तु व्याप्तिविशेषौ, तथाहि साध्यसाधनयोर्व्याप्तिरन्वयः, साधनाभावसाध्या-भावयोर्व्याप्तिर्व्यतिरेकः इति ।

पक्षस्य दृष्टान्तसिद्धव्याप्तिहेतुमत्त्ववचनमुपनयः । स्पष्टोऽर्थः । सोऽपि द्विविधः, साधर्म्योपनयो वैधर्म्योपनयश्चेति । अन्वयमुखेनोपनयः साधर्म्योपनयो यथा तथाच कृतकः शब्द इति । व्यतिरेकमुखेनोपनयोः वैधर्म्यो-पनयो यथा न च तथा न कृतकः शब्द इति ।

उपनयानन्तरं सहेतुकं प्रतिज्ञावचनं निगमनम्, यथा तस्मात्कृतकत्वादनित्यः शब्द इति । अनित्यः शब्दः कृतकत्वादित्यत्र सहेतुके प्रतिज्ञावचनेऽतिव्याप्ति-

---

१ श्लो.वा.अनु. परि.श्लो.१७-१८ ।

मा भूदित्युपनयानन्तरमित्युक्तम् । सुगममन्यत् । यथा तस्मात्कृतकत्वादनित्यः शब्द इति ।

एतेषामपि प्रतिज्ञाद्यवयवानां प्रमेयान्तर्भूतानामपि प्रयोजनवशेन पृथगभिधानम् । तदुक्तम् -

वादजल्पवितण्डानां प्रवृत्तौ हेतवो यतः ।

तत्त्वव्यवस्थितेः स्थानं मतो भेदेन भाषिता ।। इति । अवयवा इति शेषः ।।१।।

अथ तर्कादीनां छलान्तानां क्रमप्राप्तानां अनुक्रमेणलक्षणान्येकश्लोकेनाह-

तर्कोऽनिष्टविभावनं स्वपरतो निर्द्धारणं निर्णयो
वादस्तत्त्वविनिश्चये कथायुग्ग्राहो यदासौ जयः ।
जल्पः स्यात्तु तदा स पक्षवचनैर्हीनो वितण्डा भवे
दाभासो विकलाङ्गता विभतितो वाक्ये विघातश्छलम् ।।२।।

कल्पलतिका

तर्कादिवितण्डान्तानां स्वरूपविवेकः

तर्कोऽनिष्टविभावनमित्यस्यायमर्थः । अनिष्टं विभावयतीत्य निष्टविभावनम्, विपर्ययाशङ्कायामनिष्टापादकं यज्ज्ञानं सस्तर्क इति । यथा पुरुषेणानेन भवितव्यमिति ज्ञानं विपर्ययाशङ्कायामनिष्टापादकम्, तथाहि-यद्ययं पुरुषो न स्यात्तर्हि अन्यस्यासंभवादृश्यमानस्याकस्मिकत्वप्रसङ्गः, ततोऽनेन पुरुषेण भवितव्यमिति प्रत्ययो यः सस्तर्क इति । अस्यापि प्रयोजनवशादेव प्रमेयान्तर्भूतस्यापि पृथगुपादानम्, उदुक्तम् -

इति कर्त्तव्यतारूपो विषयस्य विवेचनात् ।
प्रमाणस्य च यस्तर्कस्तेनायं भाणितः पृथगिति ।।

तर्कानन्तरोद्दिष्टस्य निर्णयस्य लक्षणमाह स्वपक्षेतिधारणं निर्णय इति । स्वशब्देन पक्षः परशब्देन च प्रतिपक्ष उच्यते । तेन स्वपक्ष इति पक्षप्रतिपक्षाभ्यामिति लक्षणया तद्विषयसाधनदूषणाभ्यां निर्धारणं व्यवस्थापनं निर्णय इति लक्षणार्थः ।

निर्णयं फलमुद्दिश्य वीतरागकथा यतः ।
नैवं जल्पवितण्डे तन्निर्णयः पृथगुच्यते ।।

क्रमप्राप्तं वादलक्षणमाह वादस्तत्त्वविनिश्चये मत्युग्राह इति । तत्त्वविनिश्चये तत्त्वनिर्णये निमित्तभूते यो मत्युग्राहः पक्षप्रतिपक्ष-साधनदूषणप्रयोगसन्दर्भाङ्गीकारः सो वाद इति तात्पर्यार्थः । जल्पवितण्ड-योर्व्यभिचारोमा भूदिति तत्त्वनिर्णये इत्युक्तम्, तथाहि तात्पर्यशुद्धिः-तत्त्वनिर्णयमभिसन्धाय विवदमानयोः प्रमाणतर्काभ्यां स्वसिद्धान्तानुरूपसाधन-दूषणप्रयोगसन्दर्भो वाद इति । अस्यापि प्रयोजनवशेन पार्थक्यमुक्तम्, तथाहि -

प्रयोगोऽपि पृथग्वाद उपलक्षयितुमुच्यते ।
तादृशो व्यवहारश्च तत्त्वज्ञानाय जायते । इति ।

एवं वादलक्षणमभिधाय जल्पलक्षणमभिधत्ते यदासौ जये जल्पः स्यात् तदेति । असौ मत्युग्राहो यदा जये निमित्तभूते प्रवर्तते तदा तु जल्पः स्या-दिति यावत् । तु शब्देन वितण्डातो जल्पविलक्षणतोक्ता । शङ्क्यते हि केनचिज्जल्पस्यापि वितण्डात्वम्, तथा-

अथ वितण्डाद्वयमेकितन्न पृथक्, तथा वितण्डा हि परपदादूषणपुरस्कारेणैव प्रवर्तते, जल्पकथाप्येवम्।

यथाहि- कश्चित्साधयति तदा कश्चिद्दूषयत्येव न तु स्वपक्षमपि तदानीं समर्थयते, असंभवात्। एवञ्च सति जल्पकथया विवदमानयोर्वैतण्डिकस्यापि संभवाज्जल्पोनाम वितण्डाकथेवेत्यवगम्यत इति, तामिमामाशङ्कामपाकर्तुं तुशब्दः प्रयुक्त इति युज्यते।

कथमाशङ्कापराक्रियत इति चेत्, उच्यते एतावज्जल्पस्य वितण्डात्वमुक्तनीत्या सङ्गच्छते, वादस्यापि वितण्डात्वप्रसङ्गात्। अथ जल्पवितण्डयोः फलभेदाद्भेदः, तर्हि- अत्रापि फलभेदाद्भेद इति सन्तोष्टव्यमायुष्मता। न खलु जल्प इव वितण्डा विजयफला, तस्यापरिशिष्टांलभ्यस्वपक्षासिद्धिफलाभ्युपगमात्, अतो जल्पोवितण्डायाः पृथगेव कथाविशेष इति।

वितण्डां लक्षयति स प्रतिपक्षस्थापनाहीनो वितण्डा भवेदिति। स इति मतयुग्ग्राहः, प्रतिपक्षोरिति परिगृहीतपक्षसाधनप्रयोगैर्हीनोवितण्डा भवेदिति लक्षणार्थः। अयं भावः, प्रतिपक्षप्रतिदीपिकृत पक्षः सोस्त्येवेत्याशयेन प्रवर्तमानस्य पक्षसाध्यप्रयोगैरनुपयोगाद्धीनोमतयुग्ग्राहो वितण्डेति त्वया समर्थनीयम् मया खण्डनीयमित्येवं समयबन्धात्परिशिष्टन्यायेन स्वपक्षासिद्धिमभिप्रेत्य यत्रान्यतरः प्रवर्तते कथायां सा वितण्डेत्यर्थः। जल्प वितण्डयोरपि प्रयोजनवशेनैव प्रभेदात्पृथगुपदेशः, तदुक्तम् -

तत्त्वाध्यवसंरक्षणार्थं जल्पवितण्डे उभे अपि।

कण्टकावृतितुल्यत्वादतो भेदेन भाषिते। इति।

हेत्वाभासानां प्रस्तारः

वितण्डानन्तरोद्दिष्टस्याभावस्य लक्षणमाह आभासो विकलाङ्गतेति । अङ्गानि- पक्षधर्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वं असत्प्रतिपक्षत्वञ्चेति, विकलानि= न्यूनानि, अङ्गानि - यस्येति विकलाङ्गस्तस्य भावो विकलाङ्गता । आभास इति हेत्वाभासत्वमित्यर्थः, आभासनमाभास इति भावव्युत्पत्तिः, सचाभासः असिद्धविरुद्धानैकान्तिकानध्यसितकालातीतप्रकरणसमास्य भेदात्षोढा ।

तत्र पक्षधर्मत्वविकलोऽसिद्धः । पक्षः पूर्वोक्तलक्षणस्तद् व्यापकत्वं पक्षधर्मत्वं तेन विकलः पक्षधर्मत्वविकल इत्यसिद्धलक्षणार्थः ।सचासिद्धः स्वरूपासिद्धो व्यधिकरणासिद्ध- भागासिद्धा-श्रयासिद्धा- श्रयैकदेशासिद्धविशेषणासिद्धव्यर्थविशेषणासिद्धव्यर्थविशेष्यासिद्धसन्दिग्धासिद्धसन्दिग्धविशेषणासिद्धसन्दिग्धविशेष्यासिद्धभेदादेकादशधा । एतेषां लक्षणान्युदाहरणेरुन्नेयानि। तथाह्युदाहरणानि -

१- शब्दो नित्यश्चाक्षुषत्वादिति प्रथमः।

२- शब्दोनित्यो घटस्य कृतकत्वादिति द्वितीयः[१]

३- शब्दोनित्य संयोगजन्यत्वादिति तृतीयः

४- अस्ति प्रधानमभिधेयत्वादिति चतुर्थः

५- स्वः प्रधानपुरुषावभिधेयत्वादिति पञ्चमः

६- शब्दोऽनित्योमूर्तत्वेसति अयोगिप्रत्यक्षत्वादिति षष्ठः

७ शब्दोऽनित्यो गुणत्वेसति कार्यत्वादिति सप्तमः

८- शब्दोऽनित्य कार्यत्वेसतिगुणत्वादित्यष्टमः

९- आप्तोऽयं तथापुरुषोऽसत्यवादित्वादिति नवमः

---

१ घटस्येत्यत्र सम्बन्धार्थो षष्ठी, तथाच घटविशेषणीभूतं कृतकत्वमित्यर्थः, तदेवात्र हेतुः, स च पक्षेशब्दे नास्तीति व्यधिकरणासिद्धोहेतुरिति । टि.

१०- आप्तोऽयं रथापुरुष अस्त्यवादित्वेसति वक्तृत्वादिति दशमः

११- आप्तोऽयं रथापुरुषो वक्तृत्वेसत्यसत्यवादित्वादिति एकादशमः। इति।

अयमेकादशधाप्यसिद्धोऽन्यतरोभयासिद्धभेदात्प्रत्येकं द्वेधा, तद्यथा- मीमांसकप्रति अनित्योवर्णः कृतकत्वादित्यन्यतरस्वरूपासिद्धः, सजातिरिक्ता रूपत्वजातिः शब्दनिष्ठा शब्दस्य जातित्वादित्यन्यतर व्यधिकरणासिद्धः । शब्दोऽनित्यः संयोगजन्यत्वादित्यन्यतरभागासिद्धः ईश्वरो यत्नवा ज्ञानवत्वादित्यन्यतराश्रयासिद्धः । जीवेश्वरौनित्यौ विभुत्वादित्यन्यतराश्रैकदेशासिद्धम् ।परमाणुरनित्यः समवेतत्वेसति द्रव्यत्वादित्यन्यतरविशेषणासिद्धः । अयोगिप्रत्यक्षत्वेसति मूर्तत्वादित्यन्यतर व्यर्थविशेषणासिद्धः ।मूर्तत्वेसति अयोगिप्रत्यक्षत्वादिति - अन्यतरव्यर्थविशेष्यासिद्धः । अन्यतरसन्दिग्धासिद्धान्यतरसन्दिग्ध विशेषणासिद्धान्यतरसन्दिग्धविशेष्यासिद्धानामुदाहरणानि पूर्वाण्येवान्यतर निश्चयेसति ज्ञेयानि ।

उभयासिद्धोदाहरणान्युच्यन्ते । तत्र प्रथमयोरनयोः पूर्वं विवृतोदाहरणे । तादृशतृतीयोदाहरणं स्वयूथ्यं प्रति पूर्वमेव । तादृश चतुर्थोदाहरण न्तु नराविषाणंतीक्ष्णं विषाणत्वादिति । वन्ध्यापुत्रोवदतो प्रयत्नवन्तो चेष्टावत्त्वादिति पञ्चमोदाहरणम् । षष्ठोदाहरणं पूर्वमेव स्वयूथ्यं प्रति । सप्तमाष्टमोदाहरणद्वयं पूर्वमेव । उत्तरेषां त्रयाणामुदाहरणानि पूर्वाण्येव सन्त्युभयोस्तत्सन्देहे वेदितव्यानि । अनयैव रीत्यान्येप्यसिद्धभेदाः स्वयमूहनीयाः ।

यथा स्वरूपासिद्धभेदो व्याप्यत्वासिद्धः । तथाहि - उपाधिप्रयुक्तव्याप्तिको व्याप्यत्वासिद्धः । यागे हिंसाऽधर्म साधनो हिंसात्वादिति । अत्र हि निषिद्धत्वोपाधिना हिंसात्वस्याधर्मसाधनत्वे प्रत्यसाधकत्वेन व्याप्यत्वा भावाद्धेतु स्वरूपत्वमेवासिद्धम्, ततोऽयं व्याप्यत्वासिद्धः स्वरूपासिद्धभेद

एव । तथा सिद्धसाधनरूप आश्रयासिद्धिभेदः, तथाहि- प्रसिद्धानित्यत्वधर्माद् घटो यदा नित्यतया साध्यते - घटो नित्यः कार्यत्वादिति तदा घट अनित्यः कार्यत्वादिति, तदा घटस्यानित्यतासिद्धेः संदिग्धसाध्यत्वाभावेन पक्षत्वाभावाद्विवादितहेतोराश्रयस्य पक्षस्यासिद्धेराश्रयासिद्धिभेदोऽयं सिद्धसाधनरूपो हेतुरिति ।

पक्षविपक्षमात्रवृत्तिर्हेतुर्विरुद्धः । मात्रशब्देन सपक्षो व्यावर्त्यते । केवलं पक्षविपक्षयोर्वर्तते यो हेतुः स विरुद्धः । पक्षो लक्षितः प्राक् । विपक्षस्तु साध्यानधिकरणपदार्थः । नच सपक्षस्य साध्यसमानधर्मतया साध्याधिकरणत्वादतिव्याप्तिर्लक्षणस्येति वाच्यम् साध्यशब्देन विवादितव्यापकाभिधानात् । सपक्षस्य च तद्वत्वादुक्तलक्षणस्य तत्रावृत्तिः । सपक्षं तु पक्षान्यत्वे सति साध्याधिकरणं, स्पष्टमेतत् ।

स च विरुद्धश्चतुर्धा, पक्षविपक्षव्यापकः, पक्षविपक्षैकदेशवृत्तिः पक्षव्यापको विपक्षैकदेशवृत्तिः, विपक्षव्यापकः पक्षैकदेशवृत्तिरिति । उदाहरणानि यथा-

नित्यः शब्दः कार्यत्वादिति प्रथमः
नित्यः शब्दः संयोगजन्यत्वादिति द्वितीयः
नित्यः शब्दो महाभूतगुणत्वादिति तृतीयः
शब्दमनसी द्रव्ये निर्गुणत्वादिति चतुर्थः ।

सोऽयं चतुर्धापि विरुद्धोऽसत्सपक्षः सत्सपक्षश्चेति द्विधा । तत्रासत्सपक्षस्य विरुद्धस्योदाहरणानि - शब्द आकाशविशेषगुणः प्रमेयत्वात्संयोगजन्यत्वादगुणत्वादवर्णात्मकत्वादिति । सत्सपक्षस्योदाहरणानि पूर्वाण्येव ।

पक्षत्रयवृत्तिरनैकान्तिकः । स्पष्टोऽर्थः । स चायमनैकान्तिकः पक्षत्रय-

व्यापकः पक्षत्रयैकदेशवृत्तिः पक्षैकव्यापकः सपक्षैकव्यापको विपक्षैकव्यापकः पक्षसपक्षैकव्यापकः पक्षविपक्षैकव्यापकः सपक्षविपक्षैकव्यापकश्चेत्यष्टधा, तथाह्युदाहरणानि-

शब्दोऽनित्यः प्रमेयत्वात्, कणादसमवेतत्वात्, गुणत्वात्, सामान्यवत्त्वे सत्यवर्णात्मकत्वात्, घटान्यत्वे सत्यवर्णात्मकत्वात्, सामान्यवत्त्वात्, घटान्यत्वे सति प्रमेयत्वात्, अवर्णात्मकत्वादिति ।

पक्षैकवृत्तिरनध्यवसितः । एकपदेनानैकान्तादिव्यावृत्तिः । शेषं स्पष्टम् । सचानध्यवसितः सत्सपक्षविपक्षोऽसत्सपक्षविपक्षः सदेकसपक्षः सदेकविपक्षश्चेति चतुर्विधः । तत्रोदाहरणानि -

अनित्यः शब्दः शब्दत्वात्,
सर्वमनित्यं सत्त्वात्,
प्रमेयः शब्दः शब्दत्वात्,
अप्रमेयः शब्दः शब्दत्वादिति ।

प्रमाणविरुद्धपक्षेवर्तमानः कालातीतः । स्पष्टोऽर्थः । स च प्रत्यक्षादिविरुद्धभेदाच्चतुर्धा, तथाहि-

अरूपः पटः तन्तुसमवेतत्वादिति प्रत्यक्षविरुद्धः ।
गुरुत्वरहितः पटस्तन्तुसमवेतत्वादित्यनुमान विरुद्धः ।
ज्योतिष्टोमादिकं स्वर्गसाधनं न भवति क्रियात्वात्सम्मतवदित्यागम विरुद्धः ।
नागरिकासिद्धगोसदृशो गवय इत्याप्तवचनमाकर्ण्य वनंगतस्य तादृगसत्पिण्डे गवयशब्दवाच्य इति प्रमितौ सत्यां नायंगवयशब्दवाच्यो दृश्यमानत्वादितिस्तुरुपमानविरुद्ध इति ।

सत्प्रतिपक्षः प्रकरणसमः, प्रतिपक्षो नाम समानयोगक्षेमप्रकृतविरुद्ध-साध्यविषयो हेतुः सोऽस्ति प्रतिपक्षो यस्येति सत्प्रतिपक्षः प्रकरणसम इति यावत् । यथा मूर्तं मनः क्रियावत्त्वात्, अमूर्तं मन अस्पर्शवत्त्वादिति । अत्र च पुरुषविशेषापेक्षयाभासत्वं वेदितव्यम् ।एतेषां वाऽसिद्धादीनामु-दाहृतानां पक्षधर्मत्वाद्यङ्गवैकल्यं सामान्यलक्षणं यथासंभवं योज्यम् ।

छललक्षणादिकम्

आभासानन्तरोद्दिष्टस्य छलस्य लक्षणमाह विमतितो वाक्ये विघात-च्छलमिति । विमतित इति विवक्षितार्थेतर प्रतिपत्तिसंभवात् वाक्ये विघातः प्रतिषेधः छलमित्यर्थः । वाक्ये इति सप्तमी विषये, वाक्यविषयो विघात इति यावत्, तच्छलं त्रेधा वाक्छलं सामान्यछलमुपचारछलञ्चेति ।नानार्थशब्द-नीकेऽर्थेति शब्दस्य नानार्थत्वाद् विवक्षितार्थेतरप्रतिपत्तिसंभवात् वाक्ये विघातो वाक्छलम्, यथा- नवकम्बलोऽयमिति वाक्ये कुतोऽस्य नवकम्बला इति विघातः । संभावनीके व्यभिचारप्रदर्शनाद्विघातः सामान्यछलम् । निर्णयाभि-प्रायोक्ते शब्दानित्यत्वसाधनत्वेन प्रमेयत्वादौ सव्यभिचारलक्षणं माभूदिति संभावनीके इत्युक्तम् । यथा चतुर्वेदाभिज्ञोयं ब्राह्मण इत्युक्ते कश्चिदाह नैवं व्रात्यैनैकान्त्यादिति । लक्षणादिवाच्ये वाचकत्वकल्पनया विघात उपचार-छलम्, यथा मञ्चाः क्रोशन्तीत्युक्ते नैवं मञ्चानामचेतनत्वादिति ॥२॥

इदानीं जातिनिग्रहस्थानयोर्लक्षणं षोडशप्रमाणादिपदार्थज्ञानफलस्य मोक्षस्य च लक्षणं प्रकृतार्थोपसंहारञ्चैकः श्लोकेनाह-

जातिः साम्यमतोविघातवचनं हेतोरथो निग्रह-
स्थानं यत्तु पराजयस्य वचनं तत्स्यादिति प्रोच्यते ।
मोक्षस्तत्रमतो विशुद्धसुखता दुःखप्रणाशे सति
दोषज्ञात्मन इत्युदीरितमिदं नैयायिकं दर्शनम् ॥३॥

जातिस्वरूपविवेचनम्

साम्यमितीरितो विघातवचनं जातिः । अयमर्थः, वादिना सम्यक्साधनेऽभिहिते झटिति प्रतिवादिनः सदुत्तरास्फुरणात्सः करणस्यैवंमतिरुज्जिहीते। यथाहमुत्तरास्फुरणात्तत्करणस्तथैनमपि भावयसीति । ततो वादुकस्य हेतोर्विघातवचनं युक्त्याभासेन प्रत्यवस्थानं जातिरिति । तद्भेदाः साधर्म्यसमादयोऽनन्तास्ते च स्थूलदृष्ट्या कियन्तः प्रदर्श्यन्ते, तथाहि-

यथा शब्दोऽनित्यः कृतकत्वाद् घटवदित्युक्ते जातिवाद्याह यद्यनित्यघटसाधर्म्यात्कृतकत्वादनित्यः शब्दस्तर्हि नित्यनभः साधर्म्यादमूर्तत्वान्नित्यः किन्न स्यादविशेषादिति साधर्म्यसमः । यदि च नित्यनभोवैधर्म्यात्कृतकत्वादनित्यस्तर्हि तदनित्यघटवैधर्म्यादमूर्तत्वान्नित्यः प्राप्नोत्यविशेषादिति वैधर्म्यसमः ।

यदि कृतकत्वाद् घटवदनित्यः शब्दस्तर्हि घटवदेव सावयवः स्यादित्युत्कर्षसमः । अश्रावणश्च घटो दृष्टस्तद्वदेव तर्हि शब्दोऽपि श्रावणो न स्यादित्यपकर्षसमः ।

यदि शब्दः कृतकत्वानुमानेनानित्यो वर्ण्यते तर्हि घटोऽपि तेनैवानुमानेन तथा वर्ण्यः स्यादिति वर्ण्यसमः । अथान्यस्थाभ्यान्न तथा घटोऽवर्ण्यस्तर्हि शब्दोऽप्यवर्ण्यः स्यादित्यवर्ण्यसमः ।

कृतकत्वाविशेषेऽपि यथा मूर्तामूर्तत्वविकल्पस्तथा नित्यानित्यविकल्पोऽपि स्यादिति विकल्पसमः ।

यदि कृतकत्वादुभयोरनित्यत्वं तर्हि साध्यत्वमप्युभयोः स्यादिति साध्यसमः ।

यथयं हेतुः प्राप्यसाध्यं साधयेत्तर्हि प्राप्तावुभयोरविशेषादन्यतोऽपि किं कस्य साधनं चेति प्राप्तिसमः ।

अप्राप्य साधको नास्ति काष्ठाग्निवदित्यप्राप्तिसमः ।

शब्दस्योत्पत्तेः प्रागनित्यत्वे कारणं नास्तीति नित्यः प्रसक्तः तस्योत्पत्तिर्नोपपद्यत इति अनुत्पत्तिसमः ।

यदि पूर्वं साधनमसति साध्ये कस्य साधनं, अथ पश्चादविद्यमाने कथं साधनं, अथ युगपत् तथापि किं कस्य साध्यं साधनञ्चेत्यहेतुसमः ।

यदि घट शब्दयोरेकस्य कार्यत्वस्योपपत्तिरविशेषस्तर्हि सर्वेषां भावनामस्तित्वस्यैकस्योपपत्तिरविशेष इत्यविशेषसमः ।

विमतं पृथिव्यादि अनित्यं सावयवत्वादित्युक्ते सावयवत्वादावनित्यत्वमुपलब्धमित्युपलब्धिसमः । बुद्ध्यादेः कार्यस्यानुपलब्धिर्या तस्या अनुपलम्भादभावे प्रागूर्ध्वमपि बुद्ध्यादि सद्भावः सिद्ध्यतीत्यनुपलब्धिसमः ।

अनित्यत्वस्य सर्वदा सद्भावे धर्मिणोऽपि शब्दादेस्तथात्वं स्यादन्यथा वा सिद्धो हेतुरिति नित्यसम इति । एवमेते जातिभेदाः स्थूलत्वादुदाहृताः । अन्ये पुनरूह्या इति ।

निग्रहस्थानानां भेदाः

जातिलक्षणानन्तरं क्रमप्राप्तनिग्रहस्थानलक्षणमाह- अथो इत्यादिना प्रोच्यत इत्यन्तेन । यत्तु पराजय स्यवचनं तन्निग्रहस्थानं स्यादिति प्रोच्यते अभियुक्तैरितिशेषः । अथो इत्यनेन निग्रहस्थानस्य हेत्वाभासस्य हेत्वाभासछलजातिवद्गुणभूतत्वं नास्ति किन्तु प्रमाणवत्प्रधानपदार्थत्वमिति दर्शयति ।

यथाहि - प्रमाणान्तर्भूतत्वात्तत्प्रत्यङ्गभूता दृष्टान्तादयः प्रमाणञ्च
तान्प्रति प्रधानभूतः पदार्थः, तथा हेत्वाभासादयो निग्रहस्थानान्तर्भूतत्वेन
तत्प्रतिगुणभूता, निग्रहस्थानं तान्प्रति प्रधानभूतः पदार्थ इति तात्पर्यार्थः।
प्रमाणनिग्रहस्थानाभ्यां दृष्टान्तहेत्वाभासादीनां पार्थक्येनोपदेशः कथा प्रवृ-
त्तिहेतुत्वादिवशादवगन्तव्यः । तदेतन्निग्रहस्थानं विप्रतिपत्त्यप्रतिपत्तिकारण-
भेदात्सामान्येन द्वेधा । तयोश्चानन्ताः प्रतिज्ञाहान्यादयो भेदाः ।तत्रापि
स्थूलम् - प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञासन्यासो हेत्वन्तरमर्थान्तरं निरर्थक-
मविज्ञातार्थमपार्थकं पुनरुक्तमननुभाषणमप्रतिभा विक्षेपो मतानुज्ञानिरनुयो-
ज्यानुयोगोऽपसिद्धान्तो हेत्वाभासादयश्चेति[1] । एतेषां लक्षणानि उदाह-
रणैरुन्नेयानि ।

तद्यथा- यदि कृतकत्वादनित्यः शब्दस्तर्हि अमूर्तत्वान्नित्यः किन्न-
स्यादित्युक्तेऽभ्यवक्तुं किन्नो बाध्यते इति प्रतिज्ञाहानिः । कार्यं सकर्तृकमित्युक्ते
भागे सिद्धसाधनतया प्रत्युक्ते विमतं कार्यमिति वचनं प्रतिज्ञान्तरम् । नित्यः
शब्दः कार्यत्वादिति प्रतिज्ञाविरोधः । अनुष्णोऽग्निरित्यस्य प्रतिषेधः
कः प्राह उष्णमग्निमित्यस्य गन्धादौ व्यभिचार इत्युक्तेऽसति द्रव्यत्वेसत्यमू-
र्तत्वादिति प्रतिज्ञासंन्यासः । नित्यमाकाशममूर्तत्वादित्युक्ते नाहमनुष्णमग्निं
ब्रवीमीतिवचनं हेत्वन्तरम् । अनित्यः शब्दः कार्यत्वादित्युक्त्वा शब्द इति
प्रथमैकवचनं प्रथमत्वप्रातिपदिकार्थादिषु भवेदित्याद्यनुपयुक्तवचनमर्थान्तरम् ।
कचटतपानां जबगडदशत्वादित्यादि निरर्थकम् । अतिद्रुतोच्चारितासिद्धादिवचन-
मविज्ञातार्थम् । जरद्गवः कम्बलपादुकाभ्यां द्वारिस्थितो गायति मद्रकाणी-
त्यादिवचनमपार्थकम् । नित्यमाकाशमविनाशिनभः कार्यत्वादिति पुनरुक्तम्।
शब्दोऽनित्यः कार्यत्वादिति स्पष्टमभिहिते प्रतिवादिनोऽप्रत्युच्चारणमननु-
भाषणम् । कथामभ्युपगम्योत्तराभावोऽप्रतिभा वादिप्रतिवादिनोर्निग्रहस्थानम्।

---

१ न्या.सू. ५।२।१ ।

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः । त्वं चोर इत्युक्ते त्वमपि चोर इति वचनं मतानुज्ञा । अनित्यः शब्दः कार्यत्वादित्युक्तेऽनैकान्तिकोऽयं हेतुरित्युक्तस्यापि दोषे दोषादुद्भावनं निरनुयोज्यानुयोगः । शब्दस्य गुणत्वे प्रमाणं नास्तीति केनचिदुक्ते वैशेषिकः प्राह भवतु तर्हि द्रव्यं शब्द इति वचनं वैशेषिकस्यापसिद्धान्तः । हेत्वाभासाः स्पष्टाः । आदिशब्दाद्दुरुक्तादिकमपि निग्रहस्थानमिति ।

वैशेषिकदर्शनतः निःश्रेयससादृश्येनमोक्षलक्षणनिरूपणोपसंहारः

इदानीं प्रमाणादिनिग्रहस्थानानां तत्त्वज्ञानफलत्वेनोक्तस्य मोक्षस्य लक्षणमाह - मोक्षस्त्वित्यादिना दोऽत्रात्मन इत्यन्तेन । ननु वैशेषिकप्रक्रियायामुक्तं मोक्षलक्षणं तत्तु न न्यायवादिभिरभ्युपगम्यते, अतो यन्न्यायवादिभिरभ्युपगतं तदेव तन्मतनिरूपणे निरूपणीयं मोक्षलक्षणमिति तात्पर्यार्थः । दुःखप्रणाशेति विशुद्धसुखेत्येतन्मोक्षलक्षणम् । अत्र च विशुद्धसुखता मोक्ष इत्येव मोक्षलक्षणम् । दुःखप्रणाशेतीत्येतदुपपादकम् । कस्य मोक्ष इत्यपेक्षायां दोऽत्रात्मन इत्युक्तम् । अनेन सांख्यादिमतव्यावृत्तिरुक्ता । ते हि प्रकृतेरेव बन्धमोक्षाववदन्ति । न च सुखस्यानित्यत्वानभ्युपगमात्, संसारिणमिव हि सुखमनित्यं मोक्षसुखन्तु नित्यमेवाभिव्यज्यते नित्येन संवेदनेन । न च मुक्तस्य सुखं तत्संवेदनञ्चाप्रामाणिकमिति वाच्यम्, आगमेन तत्सिद्धेः, उक्तं हि-

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम् ।
तं वै मोक्षं विजानीयाद्दुष्प्रापमकृतात्मभिः ॥ इति न चैवं सति सुखतत्संवेदनयोर्नित्यत्वान्मुक्तसंसारिणोरविशेषः स्यादिति शङ्क्यम्, संसारिणः, सतोऽपि नित्यसुखतत्संवेदनयोः प्रतिबन्धकदुःखादेः सद्भावात्, मुक्तस्य च तदभावाद्विशेषोपपत्तेः, तस्माद्दोऽत्रात्मनो दुःखप्रणाशेति

विशुद्धमुक्ता मोदा इति रमणीयम् ।

एवमुक्तं मतमुपसंहरति - इत्युदीरितमिदं नैयायिकं दर्शनमिति । इति, अनेन संक्षेपप्रकारेणेदं नैयायिकं दर्शनमुदीरितं निरूपितमिति सकलमकलङ्कम् ॥३॥

इति श्रीकविकैरविन्दुश्रीजाणराजविरचितायां कल्पलतिकायां नैयायिकशास्त्रसङ्ग्रह व्याक्रिया ।

अथभाट्टमतप्रक्रिया

इदानीं प्रभाकरादपेक्षया प्रसिद्धतरत्वाद्भाट्टमतसङ्ग्रहं तावदाच्ष्टे-

भाट्टैस्तत्त्वमनन्तमेव गदितं भिन्नानुवृत्तात्मकं

तच्चैकं परिणामि नित्यमपरं कूटस्थनित्यं द्विधा ।

सर्गो न प्रलयोऽपि नास्ति सततं चेदृग्जगन्नीश्वरो

जीवा एव हि ईश्वः परिणतौ विश्वस्य धर्मादिना ॥१॥

कल्पलतिका

तत्त्वमनन्तम्

भाट्टैस्तत्त्वमनन्तमेव गदित मित्यस्यायं भावः । यथा वैशेषिकादिभिर्द्रव्यादिभेदेन नियतत्वं तत्त्वस्योक्तं न तथा भाट्टैः किन्त्वनन्तमेव तत्त्व मनियतमेवेति यावत् । कुतोनन्तं तत्त्व मित्याशंक्याह भिन्नानुवृत्तात्मकमिति। व्यावृत्तानुवृत्तात्मकमिति यावत् । अयमाशयः, यदि घटादिव्यक्तिभ्योऽनन्ताभ्योऽत्यन्ताभिन्नं द्रव्यत्वादि सामान्यं भवेदेवं तदा तदवरोधात्मकतिचिद्रव्यकयो द्रव्यं कतिचिद्गुण इत्यादि व्यवहार नियमसंभवान्नियततत्त्वं स्यात्, नैतदस्ति, सामान्यस्य व्यक्तिभ्योऽत्यन्तभेदानुपपत्तिभिन्नत्वेन नियतव्यवहारप्रयोजकाभावात् । यदि हि घटादिभ्योऽत्यन्ताभिन्नं घटत्वादिकं तदा घटादिप्रतीतिसदनुरक्ता न स्यात् पटादिप्रतीतिवत् । ततः सामान्यविशेषयोः परस्परपरिहारेणाप्रतीतिभेद एवास्थेयः । तदाहुर्भट्टपादाः-

"स्थिताः नैव हि जात्यादिः परत्वं व्यक्तितोऽन्निः ।
यदि ह्येवं ततोभिन्नं विशिष्यादस्याद्विशेषणम्[१] ॥

स्वानुरूपां तदा बुद्धिं विशेषे जनयेत्कथम् । " इति तस्मात्सामान्यस्य

---

१ प्र.प्र.श्लो.वा. १४२ ।

व्यक्तिभ्यो भेदाभावात्तद्वरोधाद्व्यक्तिविशेषेण द्रव्यादिव्यवहारनियमासंभवादनियतमिव व्यावृत्तानुवृत्तात्मकं तत्त्वमिति । तदाहुर्भट्टपादाः-

"सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका ।
जायते द्व्यात्मकत्वेन विना सा च न सिध्यती"[१]ति ।

एवं वैशेषिकाद्युत्प्रदिततनियतत्वासंभवेनानन्तत्वेपि तत्त्वस्य प्रकारान्तरेण नियतत्वमाह- तच्चेत्यादिना द्विधेत्यन्तेन । परिणामिनित्यं पृथिव्यादि कूटस्थनित्यमाकाशादि इत्येवं द्विधा तत्त्वमित्यर्थः । परिणामोनाम सिद्धस्यैवावस्थाविशेषप्राप्तिः । सोस्यास्तीति परिणामि तच्च तन्नित्यं च परिणामि नित्यम्, तद्विलक्षणं नित्यं कूटस्थनित्यमिति तल्लक्षणं वेदितव्यम् ।

संसारस्यानादित्वम्

पृथिव्यादेः परिणामिनित्यत्वमुपपादयितुमाह- सर्गो न प्रलयोपि नास्तीति । पृथिव्यादे रात्यन्तिक- सर्गप्रलयाभावेनानित्यत्वात्परिणामित्वाच्च परिणामि नित्यत्वमुपपन्नमिति भावः । आत्यन्तिकसर्गप्रलयाभावप्रतिपादिकां युक्तिमभिव्यनक्ति सततं चेद्दृग्जगदिति । अयमभिप्रायः, विमतमहोरात्रं निरन्तराहोरात्रपूर्वकं अहोरात्रत्वाद्यदि तत्तथा यथा सम्प्रतिपन्नमित्यनुमानादिदानीमिव पूर्वमपि विमताहोरात्रस्य निरन्तराहोरात्रपूर्वकत्वसिद्धेर्निरन्तराहोरात्र युक्तमेव सर्वदा जगदिति नात्यन्तिकसर्गप्रलयसिद्धिरिति ।

अथवा सततं चेद्दृग्जगदित्यस्यायमर्थः । यथा साम्प्रतं जीवाः कर्मफलोपभोगरहिता न भवन्ति तथा पूर्वं कदाचिदपि फलभोगरहिता न भवन्ति, तदाहुर्भट्टपादाः- "न च कर्मवतो युक्ता स्थितिः सैभोगवर्जिता"[२]ति । तेन न सर्गप्रलयसिद्धि रात्यन्तिकीति ।

१ श्लो.वा.आ.वा.श्लो. ५ ।
२ श्लो.वा.सं.दो.प. ६६ ।

ईश्वरसत्ताऽभाव:

एवं सर्गप्रलयासंभवसति ईश्वराभ्युपगमो व्यर्थ इत्याशयेनाह - नेश्वर इति । सर्गप्रलयौच न संभवत इत्यभिहितमिति भाव: । किञ्चेश्वर: कर्मपारतन्त्र्येष्विव सर्गप्रलयहेतुरित्यभ्युपगन्तव्य:, अन्यथा कर्मवैफल्यं नैर्घृण्यादिदोषश्च प्रसज्येत, कर्मपारतन्त्र्ये च कर्मोद्बोधकं किञ्चिद्वक्तव्यम्, अनुद्बुद्धकर्मणामसत्समत्वात्सर्गादौ । तच्चेदुद्बोधकमीश्वरेच्छैव, तर्हि सैव कर्मोद्बोधमिव सर्वं किमिति न कुर्यात्, तथा च कर्मवैफल्यादि: पूर्वोक्तदोषस्तदवस्थ: । किञ्चेश्वर उद्बोधकात्कार्यं करोतीतिवाच्यम्, अन्यथा तस्यानित्यत्वादिरूपत्वाच्च सर्वदा सर्ग एव वा प्रलय एव वा प्रसज्येत, उद्बोधश्च कर्मभिश्चेत्परस्पराश्रय: । निमित्तान्तराच्च तदेव तदुद्बोधमिव सर्वं किमिति न कुर्यात् । तदाहुर्भट्टपादा: -

"कर्मणां चाप्यभिव्यक्तौ किं निमित्तं तदाभवत् ।
ईश्वरेच्छा यदीष्येत सैव स्याल्लोककारणम् ।।
ईश्वरेच्छावशित्वे च निष्फला कर्मकल्पना ।
यद्वा तस्या निमित्तं यद्भूतानां भविष्यतीति [१] ।।"

ननु तरुतृणाङ्कुरादि सकर्तृकं कार्यत्वात् कुम्भवदित्यनुमानादीश्वरसिद्धि: । अन्यस्याङ्कुरादिकर्तुरसंभवादित्याशङ्क्याह जीवा एव हि हेतव: परिणतौ विश्वस्येति । तरुतृणाङ्कुरादिजीवकर्तृकत्वेनापि सकर्तृकत्वसिद्धि: कार्यत्वानुमानस्येश्वरसाधकत्वं नास्तीति भाव: । जीवानामङ्कुरादिकर्तृत्वं कथमित्याशङ्क्याह धर्मादिनेति । अयं भाव: । अस्ति तावद्धर्मादि: सुखादिफलहेतुत्वम्, तन्नाङ्कुराद्युत्पादनमन्तरेण संभवति, अतो धर्मादिकर्तार एव धर्मादिद्वारेणाङ्कुरादीन्युत्पाद्य तत्फलं सम्पादयतीति जीवानामङ्कुरादिकर्तृत्वसिद्धिरिति ।

---

१ श्लो. वा. स. दी. प्र. श्लो. ७१-७३ ।

ननु कर्तृत्वंनाम व्यापारवत्वम्, कार्यत्वञ्च व्यापारान्वयव्यतिरेकानु-
विधायित्वं, तथाचाङ्कुरादीनां जीवकर्तृकत्वे जीवगतव्यापारान्वयव्यतिरेका-
नुविधायित्वं वक्तव्यम् । नचाङ्कुरादयो जीवव्यापारेणान्वयव्यतिरेकवन्तः
अनुभव यद्धतिमध्यासते, धर्माधर्मौ च न व्यापारशब्दाभिधेयौ, करोति कर्तृत्वो-
पयोगितया व्यापारशब्दाभिधेयत्वात् । नच जीवानामङ्कुरादिविषयाकृतिः
कल्पयितुं शक्या, तथासतिअङ्कुराद्युपादानगोचरज्ञानादिमत्तादृक्कृत्यनु-
कूलस्य प्रसङ्गेन सर्वज्ञत्वप्रसङ्गादिति ।

अत्रब्रूमः । अस्त्येवांकुरादीनां जीवगतधर्मादिविषयप्रयत्नरूपव्यापारा-
नुविधायित्वम् । नच घटादिषु तदन्यव्यापारजन्यत्वदर्शनादङ्कुरादिष्वपि
तदन्यव्यापारानुविधायित्वं शक्य मनुमातुम् । यथाहि- धर्मादिविषयप्रयत्ना-
दन्यव्यापारशब्देन जीवगतप्रयत्नान्तराभिधानेतदनुविधायित्वस्य व्यभिचारः ।
दृश्यते हि विनापि तादृशप्रयत्नं धन्यानां विधानादि धनसमृद्धिः । कुर्वंतोपि
सन्ततं महान्तमुद्यममर्थार्थिनः केचित् । अन्यथा व्यापारशब्देन जीवादन्यस्य
व्यापारोऽभिधीयेत । तदूपप्रसिद्धविशेषणत्वं, जीवादन्यस्य व्यापारवतोऽ-
प्यप्यसिद्धत्वात्, अतो धर्मादिविषयप्रयत्नस्य जीवगतव्यापारानुविधायित्व-
मस्त्येवांकुरादीनामिति ।

किञ्च यथा जीवस्य प्राणप्रेरणायोपयुक्तः सोऽदृष्टः प्रयत्नो नेच्छा-
भ्यामनुत्थापितोपि नैयायिकैरङ्गीक्रियते । सुखादिवशेन, तथा व्यापकस्य
तत्तदङ्कुराद्यनुकूलः प्रयत्नः किमिति नाङ्गीक्रियते । तथाच जीवानामङ्कु-
रादिविषयमपि कृतौ कल्पितायां न नैयायिकैः सर्वज्ञत्वादि प्रसञ्जयितुं
शक्यम्, तस्मादङ्कुरादेर्जीवकर्तृकत्वेनापि सकर्तृत्वसिद्धेः कार्यत्वानुमानस्येश्वर-
साधकत्वं नास्तीति स्थितम् ।

---

१ अथाग इति कृ र नार्थंटक इति । टि.

संसारानादित्वोपसंहारः

तदेवमुक्तनीत्या व्यावृत्तानुत्मकं परिणामिनित्यं कूटस्थ नित्यञ्चेति द्विविधं सर्गप्रलयरहितं सर्वदानीदृशं निरीश्वरं भाट्टसत्त्वमुक्तमिति श्लोकार्थः ।।१।।

प्रमाणसामान्यलक्षणम्

इदानीं मानाधीना मेयसिद्धिर्मानसिद्धिश्च लक्षणादिति न्यायात्प्रमाणसामान्यलक्षणपूर्वकं प्रमाणविभागं तत्प्रामाण्यस्वरूपं वेदस्यापौरुषेयत्वपूर्वकं प्रमेयविशेषपरत्वञ्च चैकश्लोकेनाह-

अज्ञातप्रमितिः प्रमाणमुदितं सामान्यतः षड्विधं
तच्चाध्यक्षमथानुमानमुपमाशब्दश्च वाक्यात्मकः ।
अर्थापत्तिरभाव एवमिह तु प्रामाण्यमुक्तं स्वतो
वेदस्तावदपौरुषेयस्त्रो धर्मकमानं च सः ।।२।।

कल्पलतिका

अज्ञातप्रमितिः प्रमाणं सामान्यत उदितं भट्टैरिति शेषः । प्रमाणसामान्यलक्षणमितदज्ञातप्रमितिःप्रमाणमिति यावत् । अत्र प्रमितिः प्रमाणमित्येव लक्षणम् । अज्ञातपदं पुनर्न्यायोक्तप्रमाणानामविज्ञातविषयत्वं प्रतिषेधति । प्रमितिः प्रमाणम्, साचाज्ञातविषयेत्यर्थः सम्पन्नः ।

ननु किं सर्वथाऽज्ञातविषयत्वं वा प्रकारेण वा?, नाद्यः,यदि नेह जन्मनि जन्मान्तरे वा यदि प्रत्यक्षेणानुमानादिना वा प्रायः प्रतीतानामपि प्रतीतिः । न द्वितीयः प्रकारेणाज्ञातविषयत्वमिति विकल्पः, तादृक्प्रकारस्यानिर्वचनात्, न हि प्रतिक्षणमनुभूयमानस्तम्भादौ प्रतिक्षणलब्धजन्मापवर्ग

कश्चिद् गुणप्रकारो वा कर्मप्रकारो वा प्रतीतिपथमुपारोहति येन तद्विशिष्टस्तम्भादेरज्ञातत्वात्तत्प्रतीतेरज्ञातविषयत्वं श्रद्दधीमहीति ।

उच्यते, यत्तावदवादि सर्वथैवाज्ञातविषयत्वं प्रकारेणवेति । तत्र प्रथमविकल्पस्तावदनङ्गीकारपराहतः । द्वितीयविकल्पस्त्वभ्युपगम्यते, तथाहि - यद्यपि प्रतिक्षणमनुभूयमानेस्तम्भादौ न कश्चिद्रूपादि गुणप्रकारः कर्मप्रकारो वा प्रतिक्षणलब्धजन्मापवर्गः परिभाव्यते तथापि वर्तमानकालसम्बन्धरूपप्रकारस्य तथाविधस्य संभवात्तद्विशिष्टस्तम्भादेः पूर्वपूर्वज्ञानैरनधिगतस्योत्तरोत्तरैरधिगमादस्त्येव प्रकारेणाज्ञातविषयत्वं प्रमाणस्य । तथाहि -

क्रमभाविनां प्रत्यक्षधारावाहिज्ञानानां न तावदेक एव वर्तमानः कालो विषयः, ज्ञानयौगपद्यप्रसङ्गादेकस्यापि नाना प्रमातृवत् प्रत्यभिज्ञानुपपत्तेश्च। ज्ञानैकत्वे प्येककालावस्थानाकलनात् । नचवाच्यं न कालः प्रत्यक्षगोचरो नापि भिन्नस्वभाव इति कथं धारावाहिज्ञानानां विषयः प्रत्येकं भिन्नो वर्तमानः काल इति । कालस्याप्रत्यक्षत्वेति प्रत्यक्षविशिष्टस्य प्रत्यक्षत्वानुपपत्तेर्जात्यादिवत् । तस्मात्पूर्वपूर्वज्ञानैरनधिगतस्य तत्तद्वर्तमानकालविशिष्टस्योत्तरोत्तरज्ञानैरधिगमादस्त्येवाज्ञातविषयत्वं प्रमाणस्येति स्थितम् ।

प्रमाणविभागः

एवं प्रमाणसामान्यलक्षणमभिधाय तद्विभागमाह तच्चाध्यक्षमित्यादिना एवमित्यन्तेन । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यभावाख्यानि षट्प्रमाणानीत्यभिप्रायः । अध्यक्षशब्देन प्रत्यक्षमुच्यते । वाक्यात्मकः शब्द इत्यनेन तज्जज्ञानं लक्ष्यते, तस्यैव प्रमाणत्वाङ्गीकारान्नशब्दस्य ।वाक्यात्मकपदेन न पदात्मकः शब्दः प्रमाकरणमित्यस्ति च, वाक्यात्मकस्यैव प्रमाकरणत्वं यथास्यात्तथा वक्ष्यामः ।

प्रत्यक्षलक्षणम्

तत्र "सत्संप्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षम्"[1] इन्द्रियाणां सत्संप्रयोगे सतीति विद्यमानेन संप्रयोगे सति पुरुषस्य बुद्धिजन्म यत् तत्प्रत्यक्षं प्रमाणमित्यर्थः ।

नन्वेवमपि विद्यमानेन शुक्तिशकलेनेन्द्रियस्य संप्रयोगे सति जायमानरजतादिबुद्धावप्रमाभूतायामतिप्रसक्तिः प्रत्यक्षलक्षणस्येति चेत्, न शुक्तौ रजतादिबुद्धेरिन्द्रियकत्वेऽपि संप्रयोगजन्यत्वाभावात्, सम्प्रयोगशब्देनादुष्टेन्द्रियसम्बन्धस्य विवक्षितत्वात्, तदाहुर्भट्टपादाः-

"सम्यगर्थे च संशब्दो दुष्प्रयोगनिवारणः ।
प्रयोग इन्द्रियाणाञ्च व्यापारोऽर्थेषु कथ्यते ॥
दुष्टत्वाच्छुक्तिकायोगो वार्यते रजतेक्षणात्"[2] इति ।

न चादुष्टेन्द्रियजन्यत्वेऽपि चित्रनिम्नोन्नतादिप्रत्यक्षस्याभासत्वादत्रातिव्याप्तिरिति वाच्यम्, चित्रनिम्नोन्नतादिवस्तुन्येवेन्द्रियसन्निकर्षाभावात्तत्प्रत्यक्षस्यादुष्टेन्द्रियजन्यत्वाभावात्, रेखाविन्यासविशेषस्यैव तत्र दोषत्वात् । अयं पर्वतो वह्निमानित्यनुमानस्य लिङ्गेन्द्रियजस्येन्द्रियकत्वाभावान्न तत्राप्यतिव्याप्तिः ।

जन्मातिरिक्तव्यापारत्वे बुद्धिजननादिकारकविशेषसंप्रयोगवारणार्थं बुद्धिजन्मेत्युक्तम्, तदाहुर्भट्टपादाः-

---

१ मी. सू. १।१।४ ।

२ श्लो. वा. प्र. सू. श्लो. ३८-३९ ।

" बुद्धिजन्मेति चाप्याह जायमानप्रमाणताम् ।
व्यापारः कारकाणां हि दृष्टो जन्मातिरेकतः ॥

प्रमाणेऽपि तथा माभूदिति जन्म विवक्षितम् ।
नहि तत्क्षणमप्यास्ते जायते वाऽप्रमात्मकम् ॥

येनार्थग्रहणे पश्चाद्व्याप्रियेतेन्द्रियादिवत् ।
तेन जन्मैव विषये बुद्धेर्व्यापार इष्यते[1] ॥ " इति ।

ननु विद्यमानैरिन्द्रियसंप्रयोगे सति बुद्धिजन्म प्रत्यक्षमित्यत्र लक्षणाङ्गीकारे प्रत्यभिज्ञायामविद्यमानस्य तत्रोपलम्भादव्याप्तिरिति चेत्, मैवम् - अदुष्टेन्द्रियेणैकदेशसन्निकर्षादपि जायमानबुद्धेः संकलितघटादिबुद्धिवत्प्रत्यक्षत्वाङ्गीकारात् ।

ननु -

अतीतेऽनागते चार्थे सूक्ष्मे व्यवहितेऽपि च ।
प्रत्यक्षं योगिनामिष्टं कैश्चिन्मुक्तात्मनामपि[2] ॥

इत्युक्तत्वादविद्यमानातीताद्युपलम्भनमपि प्रत्यक्षमिति चेत्, न- अतीतानागतज्ञानस्य योगिनां व्यासादीनां स्वतः प्रतिभातनिखिलवेदार्थत्वात्स्मृतित्वेनाप्युपपत्तेः । वेदानामनन्तत्वादनन्ता वै वेदा इति श्रुतेः । व्यासादीनां तद्दर्शनस्य च प्रसिद्धत्वात् । सूक्ष्मव्यवहितयोस्तु यद्यपि विशिष्टं ज्ञानं योगिनां तथापि स्वग्राह्यस्यैव सतोरिन्द्रियादिनैर्मल्यातिशयवशात् गृध्रादिवत् ।
तदाहुर्भट्टपादाः -

---

१ श्लो.वा.वा.सू. ५३-५६ ।
२ श्लो.वा.प्र.सू. २६ ।

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात् ।

दूरसूक्ष्मादि दृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता [1] ॥ इति तस्मात्सम्प्रयुक्त-विद्यमानोपलम्भनमेव प्रत्यक्षमिति स्थितम् ।

अनुमानलक्षणादिविचारः

अनुमानं पुनर्ज्ञातसम्बन्धस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे बुद्धिः । ज्ञातः सम्बन्धो व्याप्तिर्येनेति ज्ञातसम्बन्धः प्रमाता । तस्यैकदेशदर्शनादेकदेशान्तरेऽसन्निकृष्टेऽर्थे इत्यनधिगतेऽर्थे या बुद्धिस्तदनुमानम् । अत्रैकदेशशब्देन व्याप्तिधर्मिणौ व्याप्यव्यापकरूपौ पदार्थौ, ततश्चायमर्थः - गृहीतव्याप्तिकस्य व्याप्यदर्शनाद्व्यापकेऽनधिगते बुद्धिरनुमानमिति । अथवा ज्ञातः सम्बन्धो व्याप्यस्य यस्मिन्निति ज्ञातसम्बन्धः पर्वतादिस्तत्सम्बन्ध्येकदेशदर्शनादिति धूमवत्त्वादिदर्शनादेकदेशान्तरेऽसन्निकृष्टे वह्निमत्त्वादौ बुद्धिरनुमानम् । अथवा ज्ञातश्चासौ सम्बन्धश्चेति विग्रहे ज्ञातसम्बन्धशब्देन गृहीता व्याप्तिरुच्यते, तस्य सम्बन्धस्यैकदेशदर्शनाद्व्याप्यरूपसम्बन्धिदर्शनादेकदेशान्तरे व्यापकरूपेऽसन्निकृष्टे बुद्धिरनुमानम् । अथवा ज्ञातः सम्बन्धो यस्य व्याप्यव्यापकरूपसमुदायस्येति स तथोक्तः, तस्यैकदेशेन समुदायिना व्याप्यरूपेण व्यापकरूपेऽसन्निकृष्टे बुद्धिरनुमानम् । तदाह वार्तिककृतः -

"प्रमाता ज्ञातसम्बन्ध एकदेशस्तथोच्यते ।
कर्मधारयपक्षे वा सम्बन्धिन्येकदेशता ॥
द्वयं वा ज्ञातसम्बन्धमुपलब्धं परस्परम् ।
तस्यैकदेशशब्दाभ्यामुच्यते समुदायिनाव" [2] इति ।

---

१ श्लो. वा. चा. सू. श्लो. ११४ ।
२ श्लो. वा. अनु. श्लो. २-३ ।

व्याप्यव्यापकशब्दौ न्यूनाधिकवृत्तिपदार्थौ क्रमेण रूढः समवृत्ती वा, तदाहुः-

"यो यस्य देशकालाभ्यां समोन्यूनोऽपि वा भवेत् ।
स व्याप्यो व्यापकस्तस्य समो व्याप्याधिकोऽथवा" [१] इति ।।

शिष्टं वाऽभ्युपगमसिद्धान्तेन निर्वाह्यम् ।

उपमानलक्षणम्

सादृश्यज्ञानकरणकज्ञानमुपमानम् । नगरावगतचगोपिण्डस्य वनमुपेयुषः साक्षाद्गवयमीक्षमाणस्य मतिरुज्जिहीते अनेन सदृशी मदीया गौरिति । तदेतज्ज्ञानमुपमानमितिलक्षणार्थः, नचास्य ज्ञानस्य स्मृतित्वमिष्टव्यम्, परिदृश्यमानगवयसादृश्य विशिष्टतया स्वीयगोपिण्डस्य सर्वथानवगतस्य विषयीकरणात् ।

शाब्दप्रमाणम्

शब्दविज्ञानादसन्निकृष्टेऽर्थे बुद्धिः शाब्दप्रमाणम् । शब्दमात्रविषयंविज्ञानं शब्दविज्ञानम् । यद्वा शब्दजनितं पदार्थमात्रविषयंविज्ञानं, तेन शब्दलिङ्गकवक्तृविशेषानुमाने धूमपदाज्जदर्थविज्ञानेन वन्ह्यनुमाने वा नातिव्याप्तिः । व्याप्तिज्ञानस्यापि तत्र भावात्, मात्रशब्दात्तस्य च व्यावृत्तिः । तदेवं विधाच्छब्दविज्ञानादसन्निकृष्टेऽनधिगतेऽर्थे बुद्धिः शब्दं प्रमाणमित्यर्थः सम्पद्यते।अत्र च पदमत्यधिकाभावात्स्मारकान्नाविशिष्यत इति वचनात् । न पदात्मकः शब्दोऽनधिगतार्थं बुद्धीकरणं किन्तु वाक्यात्मक एवेत्यवगन्तव्यम् ।

वाक्यं नामाकाङ्क्षादिमान्तिपदानि, तच्च वाक्यं स्वविषयज्ञानेन वा स्वावयवपदार्थविषयज्ञानेन वाऽवान्तरव्यापारेणानधिगतार्थप्रमां प्रसूते।

---

१ श्लो वा. अनु. परि. ४ ।

तदेवं शब्दमात्रविज्ञानाच्छब्दजनितपदार्थमात्रविज्ञानाद्वाऽसन्निकृष्टेऽर्थे इत्यनधिगतेऽर्थे बुद्धिः शाब्दं प्रमाणमिति युक्तम् ।

अर्थापत्तिः

अन्यथानुपपद्यमानदर्शनादुपपादके बुद्धिरर्थापत्तिः । यथा जीवन् देवदत्तः क्वचिदस्तीति बुद्धिः । अत्र हि जीविनो देवदत्तस्य गृहनिष्ठाभावो बहिस्सत्त्वमन्तरेणानुपपद्यमानो बहिः सत्त्वमुपपादकं कल्पयति, अतोऽनुपपद्यमानगृहनिष्ठाभावदर्शनादुपपादके बहिः सत्त्वे बुद्धिरर्थापत्तिरित्यर्थः । नवाच्यं देवदत्तो बहिरस्ति जीवत्वे सति गृहेऽसत्त्वात्सम्मतवदित्यनुमानमेवैतन्नार्थापत्तिरिति देवदत्तस्य बहिः सत्त्वसिद्धौ हेतोः पक्षधर्मत्वसिद्धिस्तत्सिद्धौ च बहिः सत्त्वसिद्धिरित्यन्योन्याश्रयप्रसङ्गात् । तदाहुः-

"पक्षधर्मादिविज्ञानं बहिः संबाधते यदि ।
तैश्च तद्बाधतोवश्यमन्योन्याश्रयता भवेदि"[1]ति ।

अतोऽर्थापत्त्या देशान्तरे देवदत्तस्य सत्त्वमधिगन्तव्यम्, पश्चादनुमानं यदि भवेद्भवतु कामम्, तदाहुः-

"तेन सम्बन्धवेलायां सम्बन्ध्यन्यतरोद्ध्रुवम् ।
अर्थापत्त्यावगन्तव्यः पश्चादस्त्यनुमानता[2]।। "इति तस्माद्देवदत्तस्य बहिः सत्त्वसंबोधोऽनुपपद्यमानगृहनिष्ठाभावोपलम्भाज्जायमानोऽर्थापत्तिर्भवितु मर्हतीति युक्तम् ।

---

१ श्लो.वा.अर्था. परि. ३८ ।
२ श्लो.वा.प्र.प्र. २०६ ।

अभावप्रमाणम्

योग्यानुपलब्धिकरणकमथाभावज्ञानमभावप्रमाणम् । दर्शनयोग्यस्य घटादे-रनुपलब्ध्याऽभावज्ञानं जायमानमभावप्रमाणतया व्यपदिश्यत इति भावः । नचानुपलब्ध्या ज्ञातयाऽर्थाभावज्ञानं जन्यते येन ज्ञायमानकरणजन्यतया प्रमाणान्तरानुगमः स्यात् । अनुपलब्धेरुपलब्ध्यभावत्वेनानुपलब्ध्यन्तरविषयत्वेऽनवस्था-पातात् । ननु मध्याह्ने चैत्रमालोचयतः प्रातःकालीनतद्देशनिष्ठतदभावज्ञानं तदनु-पलब्धेरसत्त्वान्निर्मूलतया न स्याद्यदि योग्याभावज्ञानमनुपलब्धिकरणमुच्यत इति चेत्, न तत्रापि केवलं भूतलोपलम्भस्मरणादिलिङ्गेनापि गम्यत्वादभावस्य स्थलविशेष एवानुपलब्धेः प्रमाकरणत्वात्, तदाहुः-

"प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते ।
वस्त्वसत्तावबोधार्थं तत्राभावप्रमाणता" इति ॥

एवं प्रत्यक्षादीन्यभावान्तानि षट्प्रमाणानि लक्षणतो वेदितव्यानि ।

प्रामाण्यंस्वतः

एषां च प्रामाण्यमज्ञातज्ञापनशक्तिलक्षणं स्वत एवेत्याह- इह तु प्रामाण्यमुक्तं स्वत इति । इतीति प्रमाणेषु प्रामाण्यं ज्ञापनशक्तिलक्षणमु-त्पत्तौ वा स्वतमुक्तं भाट्टैरिति शेषः । तदाहुर्भट्टपादाः-

"स्वतः सिद्धप्रमाणानां प्रामाण्यमिति गृह्यताम् ।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यत इति ॥

तत्रोत्पत्तौ स्वतः प्रमाण्यं नाम ज्ञानोत्पादकसामग्रीजन्यत्वेसत्यन्याजन्यत्वम्।

ननु प्रमा [illegible] ज्ञा अनुभवत्वेसति कार्यत्वादप्रमावदि-त्यनुमानादुत्पत्तौ परतस्त्वमेव प्रामाण्यं न स्वतस्त्वमितिचेत्, न -प्रमामात्र-

---

१ श्लो.वा.अभा. परि. १ ।

पदाकारि कार्यत्वादित्तीश्वरप्रमायां त्वन्मते भागासिद्धत्वात् । अनीश्वर-प्रमापक्षीकारे तु हेतोर्विपक्षबाधकतर्काभावेनाप्रयोजकत्वात् ।

ननु यदि प्रमा ज्ञानहेतुमात्राधीना भवेत्तर्हि भवेदप्रमापि प्रमैव, अस्ति ह्यप्रमायामपि ज्ञानहेतुरित्यस्त्येव विपक्षबाधकस्तर्क इतिचेत्, मैवम् - अप्रमाया ज्ञानहेत्वतिरिक्तदोषहेत्वधीनत्वेन तन्मात्राधीनत्वलक्षणापाद-काभावेन प्रमात्वस्यापादयितुमशक्यत्वादुक्तबाधकतर्कस्याभासत्वात् ।

नन्वेवं तर्हि दोषाभावादेर्हेतोर्ज्ञानहेत्वतिरिक्तस्य प्रमायामपि संभवा-त्सिद्धं नः समीहितमितिचेत्, मैवम्, सत्यपि काचकामलादिदोषे कदा-चित् प्रमोदयदर्शनाद्दोषाभावस्य प्रमाहेतुत्वानुपपत्तेः । गुणादिश्य स्वप्रयुक्त-दोषाभावद्वारेणाप्रामाण्यशङ्कानिवारकत्वान्निरपवादप्रामाण्योपयोगि-तयाप्युपपत्तेः प्रमाहेतुत्वाभावात् । तदाहुर्भट्टपादाः -

"तस्माद्गुणेभ्यो दोषाणामभावस्तदभावतः ।
अप्रामाण्यद्वयासत्त्वं तेनोत्सर्गोऽनपोदितः [1]।। इति ।

तदेवं ज्ञानहेत्वतिरिक्तहेत्वजन्यत्वात्प्रमायाः स्वतस्त्वमुत्पत्तौ रमणीयम् ।

तदाहुः -

ज्ञानहेतुसामग्रीजन्यत्वेसत्यजन्यता ।
तदन्यतः प्रमायास्तास्वतस्त्वमिति तद्विदः [2] इति ।

ज्ञप्तौतु स्वतस्त्वं प्रमाया ज्ञानज्ञापकसामग्रीमात्रज्ञाप्यत्वलक्षणं झटिति प्रचुरसमर्थप्रवृत्त्यन्यथानुपपत्त्याऽवगन्तव्यम् । तथाहि -

---

१ श्लो. वा. चोद. ६५ ।
२ प्रत्यक्तत्त्व प्र. स्वतस्त्वम् ।

यदि प्रमा ज्ञानज्ञापकसामग्र्यन्यज्ञाप्याभविष्यत्तर्हि यथोक्तप्रवृत्तिलाभः। यथोक्तप्रवृत्तिर्हि प्रामाण्यस्फुरणमन्तरेण न सङ्गच्छते, तच्च प्रामाण्यस्फुरणं ज्ञानस्य शुद्धकारणकत्वप्रमाधीनम्, सापि शुद्धकारणकत्वस्वकारणशुद्धिप्रमयाऽवगन्तव्या, सापि तथैवेत्यनवस्थेति कुतो यथोक्तप्रवृत्तिलाभः, तदाहुर्भट्टपादाः -

"जातोऽपि यदि विज्ञाने तावन्नार्थोऽवधार्यते ।
यावत्कारणशुद्धत्वं न प्रमाणान्तराद्गतम् ॥

तत्र ज्ञानान्तरोत्पादः प्रतीक्ष्यः कारणान्तरात् ।
यावद्धि न परिच्छिन्ना शुद्धिस्तावदसत्समा ॥

तस्यापि कारणे शुद्धे तज्ज्ञानस्य प्रमाणता ।
तस्याप्येवमितीत्थं च न क्वचिद् व्यवतिष्ठते"[1] ॥ इति ।

ननु प्रामाण्यं ज्ञानज्ञापकत्वातिरिक्तज्ञाप्यं अनभ्यासदशायां सांशयिकत्वात् अप्रामाण्यवदित्यनुमानात्परतः प्रामाण्यसिद्धिरिति चेत्, न- यथा त्वन्मते ज्ञानस्य स्वरूपग्रहणेऽसत्येव प्रामाण्याकारेण सांशयिकत्वं तथाऽस्मन्मते प्रामाण्यस्य स्वरूपग्रहणेऽसत्येव सापवादत्वमित्यपवादत्वाकारेण सांशयिकत्वोपपत्तौ हेतोरन्यथासिद्धत्वात्, अतो ज्ञप्तावपि प्रमायाः स्वतस्त्वं निर्मलम् ।

वेदानामपौरुषेयत्वम्

इदानीं वेदस्यापौरुषेयत्वात्सुतरां तदुत्थज्ञानस्य स्वतः प्रामाण्यं सुनिरूपमित्याशयेनाह- वेदस्तावदपौरुषेयस्तेन इति ।

---

१ श्लो.वा. चो.प्र. ४९-५१ ।

इदमत्राकूतम् ---- यदि वेदः पौरुषेयः स्यात्तर्हि पुरुषदोषसंक्रमाशङ्कया तदुत्थज्ञानस्य स्वरूपग्रहणे सत्येव प्रामाण्यस्फुरणं न स्यात्पा- वदोषाभावो न, निश्चिते तु दोषाभावे प्रामाण्यस्फुरणमिति परतः प्रामाण्यमित्युच्यते ।

यदात्वपौरुषेयो वेदस्तदा कुतः पुरुषदोषसंक्रमाशङ्का, कुतस्तरां तदुत्थ ज्ञानस्य स्वरूपग्रहणे सत्येव दोषाभावनिश्चये प्रामाण्यनिश्चयः कुतस्तमां तन्निश्चये प्रामाण्यनिश्चयात्परतः प्रामाण्यमिति स्वतः प्रामाण्यमौत्सर्गिकं न्याय्यम् ।

नन्वेवं सति मीमांसानारम्भः प्रसज्येत वेदवाक्यमिति चेत्, मैवम्-असंभावनादि निराकरणार्थं तदारम्भोपपत्तिरिति । कथमपौरुषेयत्वं वेदस्येति चेत् - प्रणेतृपुरुषाभावादिति ब्रूमः । तथाहि- किमीश्वरो वेदप्रणेता किं वा जीवः कश्चनेति वाच्यम्, न तावदाद्यः, ईश्वरस्य प्रागेव परास्तत्वात् । किञ्च भवदभिमतेश्वरस्य शरीरित्वाभावात् ताल्वोष्ठाद्यभावेन कथं वर्णात्मक वेदप्रणेतृत्वम् ? ।

अथोच्येत जगदनुजिघृक्षया शरीरित्वमवलम्ब्य वेदप्रणेतृत्वमीश्वरस्य, तर्हि शरीरित्वाज्जीववद्रागादिमत्त्वसंभवेन सर्वज्ञत्वमीश्वरस्य भवदभिमतं भज्येत, तथा च स्वर्गकामोयजेतेत्यादिवचनसामर्थ्यमनुपलभ्याविरचितत्वसंभवादोत्प्रेरिदाकत्वशङ्कया न तत्र तत्र कर्मसु प्रेक्षावन्तः प्रवर्तेरन्, नह्यसर्वज्ञस्तादृगदृष्टं द्रष्टुमीष्टे ।

नच व्यासादीनामिवेश्वरस्यापि तत्तदृष्ट दर्शनमतिशयविशेषादुपपद्यत इति वाच्यम्, व्यासादीनां ह्यतिशयविशेषात्स्वतः प्रतिभातसमस्तवेदवक्तॄणां तद्द्वारेण तत्तदृष्टदर्शनमुपपद्येत नपुनरीश्वरस्य तद्द्वारेणापि, परस्पराश्रयापातात्, तथाहि-

वेदार्थतद्दृष्टमुपलभ्य वेदप्रणयनम्, सति वेदप्रणयने वेदार्थतद्दृष्टोपलब्धिरिति । एतेन जीवविशेषस्यापि वेदप्रणेतृत्वमपास्तम् । तस्मादपौरुषेय वचनो वेद इत्यास्थेयम् ।

वेदस्य धर्मे एवप्रामाण्यम्

इदानीमीदृशस्य वेदस्य प्रमेयविशेषे एव प्रामाण्यमित्याह - धर्मैकमानं च स इति । धर्मे एव प्रामाण्यं वेदस्य नान्यत्रेत्यर्थः ॥२॥

ननु सर्वस्यापि वेदस्य प्रतिवाक्यं विधिवाक्यवद्धर्मैकमानत्वे विध्यर्थवादमन्त्रनामधेयात्मना विभागो न स्यादित्याशङ्क्य तद्विभागानुकूलं सर्वस्यापि तस्य धर्मे प्रामाण्यं धर्मस्वरूपञ्चैकश्लोकेनाह -

स्याद्धर्मे विधिरेव मानमितरन्मन्त्रार्थवादादिकं
विध्यङ्गं हि भवत्प्रमाणमुदितं धर्मः क्रियारूपकः ।
स्वर्गादेः करणं यजेत जुहुयादित्यादिभिर्यैरिति
भावज्ञापककर्मवाचकपदैस्तैरेव तत्सङ्गतिः ॥३॥

कल्पलतिका

विधिमन्त्रार्थवादनामधेयेषु मध्ये विधिरेवेति विधिवाक्यमेव स्वर्गकामो यजेतेत्यादिकं धर्मे प्रमाणम्, इतरत्तु - मन्त्रार्थवादनामधेयात्मकं वाक्यजातं विध्यङ्गमिति विध्येकवाक्यतापन्नं भवत् प्रमाणमित्युदितं भाट्टैरिति शेषः । तत्र विधिवाक्यं धर्मे यथा प्रमाणं स्यात्तथानन्तरमेव वक्ष्यति । मन्त्रादीनां तु विध्येकवाक्यत्वादिशिष्टोक्तं द्रष्टव्यमिति भावः । तथाहि -

तदर्थशास्त्रादिति सूत्रेण पूर्वपक्षाभिप्रायमाशंक्य अवशिष्टं तु वाक्यार्थ इति सूत्रेण मन्त्राणां तावद् विध्येकवाक्यत्वं सिद्धान्तितम् ।

तद्यथा- तदर्थं शास्त्रादित्यस्यायमर्थः[1], 'स्वाध्यायोऽध्येतव्य' इति विधिना सर्वस्यापि वेदस्य पुमर्थपर्यवसायित्व प्रतीतौ तदन्तःपातिमन्त्राणामपि तत्पर्यवसायित्वमवश्यमभ्युपगन्तव्यम्, न च प्रयाजादिवाक्यानामिव मन्त्राणां कर्मोपयिकार्थसमर्पकतया पुमर्थपर्यवसायित्वं, तदर्थं शास्त्रात् । मन्त्रस्वरूपविनियोजकं हि प्रयोगादिशास्त्रं श्रूयते, यथा खलु नीतिरोगोपेतेन्द्रियस्य चक्षुरस्त्वयेति परैर्निरोधिते पथेन तु नीयमानमिवमालोच्य नायमालोचयति स्वयमिति प्रतीयते । तथा मन्त्ररूपमालोचयतां यद्यप्यर्थप्रकाशनशक्तिरस्ति मन्त्रेष्विति मतिरुज्जरीति तथापि तद्विनियोगपरेण प्रतिपद्य स्वयं विनियोजकशक्तिर्नास्तीति मतिरस्ति मतिमतां, ततः कर्मोपयिकार्थाभिधायितया न मन्त्रा विध्येकवाक्यतां प्रतिपद्यन्ते किन्त्वदृष्टार्थोच्चारणेन पुमर्थपर्यवसायिन इति एवं प्राप्ते-

सिद्धान्तसूत्रम् - अविशिष्टस्तु वाक्यार्थ इति[2] । अस्यार्थः । न तावदुच्चारणेनैव मन्त्राणां पुमर्थपर्यवसायित्वम्, उच्चारणस्यार्थाग्रहणेन चारितार्थस्य क्रत्वङ्गत्वाभावात् । एवमक्षरग्रहणस्य पदग्रहणेन, तस्य तदर्थग्रहणेन, तस्य च वाक्यार्थग्रहणेन नैकान्तिकक्रत्वङ्गत्वम्, तस्मान्नादृष्टतया पुमर्थपर्यवसायित्वं मन्त्राणाम्, वाक्यार्थग्रहणन्त्वक्रत्वर्थत्वात्कर्मसमवेतानुष्ठानस्य मानार्थस्मृतिं जनयद्दृष्टार्थतयैव क्रत्वङ्गतामनुभवति । नचान्येन विनियुज्यमानानां स्वयं दृष्टार्थविनियोजकशक्तिर्नास्तीत्यदृष्टार्थता प्रतीयते । तत्र प्रकरणादृष्टार्थताकल्पने लिङ्गविरोधः, लिङ्गाद्दृष्टार्थत्व प्रतीतौ तु न प्रकरणविरोधोऽपि, तस्मादन्येन विनियुज्यमानानामपि स्वयं

---

१ मी. सू. १।२।३१ ।
२ तै. आ. २।५, शतपथ. ११।५।६।३ ।
३ मी. सू. १।२।३२ ।

दृष्टार्थविनियोजकशक्तिर्न विरुध्यते मन्त्राणाम्, तेन तद्द्वारा पुमर्थपर्यवसायित्वान्मन्त्राणां विध्येकवाक्यत्वं युक्तम् ।

अर्थवादानामपि विध्येकवाक्यत्वमत्र शिष्टोक्तम्, तथाहि- 'आम्नाय[१]स्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' - इति पूर्वपक्षसूत्रम्, अस्यार्थः - सर्वस्यापि वेदस्य तावत्क्रियार्थत्वेनैव धर्मे प्रामाण्यं वक्तव्यम्, '[२]चोदनालक्षणोऽर्थो धर्मः' इत्युपक्रमात्, '[३]तस्य ज्ञानमुपदेशः', तस्य धर्मस्य ज्ञानं ज्ञायतेऽनेनेति ज्ञानं प्रमाणमुपदेशश्चोदना इति परामर्शात्, तद्भूतानां क्रियार्थेन समाम्नाय तत् तत्र वेदे भूतानां सिद्धवाचिपदानां क्रियार्थेन कार्यवाचिपदेन समाम्नायः सम्बन्ध इत्युपसंहाराच्च तत्रैव तात्पर्यावगतेः । अतश्च यानि क्रियावाचिपदेन सम्बन्धं नार्हन्ति सो[४]ऽरोदीदित्येवमादीनि पदानि तान्यक्रियार्थत्वादनर्थकान्यप्रमाणभूतानि, तस्मान्न सर्वस्यापि वेदस्य धर्मे प्रामाण्यमित्येवं प्राप्ते-

सिद्धान्तसूत्रम् - 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्यु[५]' रिति । अयमर्थः । 'स्वाध्यायोऽध्येतव्य' इति विधिना सर्वस्यापि वेदस्य समर्थपर्यवसायित्व तावत्प्रतीयते । ततश्च तस्यादाम्नात्रेणाप्यनर्थकेन न भवितव्यमिति यया कयापि विधया सोऽरोदीदित्येवमादेरपि धर्मे प्रामाण्यमास्थेयम् । तच्चैवम् - यजेतेत्यादि विधिवाक्येषु तावद् द्वे भावने गम्येते शब्दात्मिकार्थात्मिका च । तत्रार्थात्मिकया अर्थवादा नापेक्ष्यन्ते, शब्दात्मिकया तु तेऽङ्गीक्रियन्ते ।

---

१ मी. सू. १।२।१ ।
२ मी. सू. १।१।२ ।
३ मी. सू. १।१।५ ।
४ तै. सं. १।५।१ ।
५ मी. सू. १।२।७ ।

सा इत्थं प्रवृत्तिं भावयेदिति, तत्र लिङादीनां प्रयोजककर्तृत्वं पुरुषः प्रयोज्यः । एवञ्चसति किं भावयेल्लिङादिरित्यपेक्षायां पुरुषप्रवृत्तिं प्रवृत्तिनिवृत्त्यात्मकमिति सम्बध्यते, केनेत्यपेक्षिते पूर्वसम्बन्धानुभवापेक्षेण ज्ञानेनेति सम्बध्यते, कथमित्यपेक्षिते प्राशस्त्यादिज्ञानार्थवादकृतेन । कुत एतत्- उच्यते - यावत्प्रशस्तोऽप्रशस्तो वाऽयमिति प्रेक्षावन्तो न प्रतिपद्यन्ते तावन्न प्रवर्तन्ते वा, तत्र विधिविभक्तिः कुण्ठी भवति । तां प्ररोचनानिन्दा वाऽर्थवादकृता प्रवर्तयतीति । तत्र 'वायुर्वै क्षेपिष्ठा देवता' इत्यादयः प्ररोचनार्थवादाः । सोऽरोदीदित्यादयो निन्दार्थवादाः । ततः प्ररोचनादिकारणार्थवादा विध्येकवाक्यतां प्रतिपद्यन्ते । ततो धर्मे प्रमाणमिति ।

नामधेयानान्तु विध्यन्तर्गतत्वं शिष्टोक्तम् । तथाहि- उद्भिदा यजेत बलभिदा यजेतेत्यादि श्रूयते । तत्र सन्देहः - किमुद्भिदादयः किञ्चिद्धर्मप्रत्युपयोगं गच्छन्त्युतनेति, किं प्राप्तम् ? विध्यादिष्वनन्तर्भावादानर्थक्यम्, तथाहि- साध्यसाधनेतिकर्तव्यतानभिधायित्वात्तावच्चोदनावाक्यत्वम्, स्तुत्यादिबुद्ध्यभावादर्थवादातिरिक्तः, कर्माङ्गभूतैवंसंप्रकाशयितव्यार्थाभावान्न कार्यनिवृत्तिः । नचान्यदिह प्रयोजनमस्तीत्यप्रमाणमेवं जातीयका इति प्राप्तेआह-

समाम्नायेदमर्थ्यं स्यादिति । अयमर्थः - विध्यर्थवादमन्त्रात्मकस्य सर्वस्यापि वेदस्य साक्षात्पारम्पर्येण धर्मे प्रामाण्यमुक्तनीत्योपवर्णितम् । तस्मादुद्भिदादीनामपि वेदवचनत्वाद्विध्यर्थवादमन्त्रान्यतमान्तर्गमोऽङ्गीकार्यो नाप्रामाण्यत्वमिति, तथाचोक्तम् -

"सर्वस्य त्रिविभागत्वाद्वेदस्योक्तेन हेतुना ।

उद्भिदाद्यप्रमाणत्वमतिरिक्तान्न सिध्यतीति [१]।।"

सतिचैवं विध्यर्थवादमन्त्रेषु क्वोद्भिदादीनामन्तर्गम इति विमर्शे पूर्वोक्तनीत्या न तावदर्थवादमन्त्रान्तर्गमः । ततः पारिशेष्याद विध्यन्तर्गम एव युक्तः ।

---

१ तन्त्रवार्तिकम् १।४।१ ।

तत्रापि च संशयः किमुद्भिदादीनां गुणविधित्वमुत नामधेयत्वमिति। तत्र गुणविधित्वमिति पूर्वपक्षाभिप्रायः । उद्भिदादिद्रव्येण यजेतेति, नचोद्भिदादिशब्दो न द्रव्ये क्वाचित्प्रसिद्ध इति वाच्यम्, अवयवप्रसिद्ध्या उद्भेदनसमर्थे द्रव्ये खनित्रादौ प्रसिद्ध्युपपत्तेः , ततो गुणविधित्वमित्येवंप्राप्ते -

सिद्धान्तः - "अपि वा नामधेयं स्यादयदुत्पत्तावपूर्वमविधायकत्वाद्" इति।[1] अयमर्थः - यस्य यागस्योत्पत्तावपूर्वं निष्पद्यते तस्येदं नामधेयमेव । गुणविधायकत्वानुपपत्तेः।तथाहि- फलं प्रति गुणो विधीयते उत यागं प्रति । नाद्यः, तथासति परपदसम्बन्धविधानं, व्यवहितकल्पना, औत्पत्तिकसमबाधो नदनीये न च खनित्रादिनात्यन्ताप्रसिद्धेन याग इति च दोषप्रसक्तेः । न द्वितीयः फलपदानर्थक्यप्रत्ययव्यापारविप्रकृष्टतादिदोषप्रसक्तेः । अथ गुणविशिष्टयागविधानमितदुद्भिदायजेतेत्यादीत्युच्येत, तदपि न - अनेकशक्तिकल्पनामन्यथंलक्षणादिदोषप्रसङ्गात्, तथाचोक्तम् -

"गुणो विधीयमानो हि फले कर्मणि वा भवेत् ।
विशिष्टविधिबुद्ध्या वा सर्वथा च न युज्यते"[2]। इति ।

तस्मान्नोद्भिदादीनां गुणविधित्वं किन्तु याग नामधेयत्वमेव । ततो विध्यन्तर्गमेनैव धर्मे प्रामाण्यमिति स्थितमिति ।

धर्मस्वरूपनिरूपणम्

एवं मन्त्रादीनां विध्यङ्गतया विधिश्च साक्षाद्धर्मे प्रामाण्यमित्युक्त्वा धर्मस्वरूपं विधिवाक्यस्यैव तज्ज्ञापकत्वं विधिवाक्यस्वरूपञ्चाह धर्म इत्यादिना।

यागादिधात्वर्थः क्रियासैव रूपमस्येति क्रियारूपको धर्मः ।

---

१ मी.सू. १।४।२ ।

२ तन्त्रवार्तिकम्. ३ ।

ननु यागादिधात्वर्थलक्षणक्रियास्वरूपस्य प्रत्यक्षादिदृश्यत्वात्कथं धर्मत्वं, चोदनालक्षणो धर्म इति सूत्रेण चोदनैव विधिवाक्यमेव धर्मे प्रमाणमिति सूत्रितत्वात् प्रत्यक्षादि दृश्यत्वे च तदनुपपत्तिरित्याशङ्क्याह स्वर्गादि-करणमिति ।

अयंभावः । सत्यं यागादिधात्वर्थलक्षणाक्रियास्वरूपस्य प्रत्यक्षादि दृश्यत्वं तथापि न तेनाकारेण धर्मत्वं ब्रूमः, किन्तु स्वर्गादिफलसाधनत्वाकारेण न्यायमाकारश्चोदनां विनान्यतः सिध्यतीत्यतश्चोदनालक्षणोऽर्थो धर्म इत्यप्यनुकूलं भवति, तेन स्वर्गादेः कारणं क्रियारूपकोऽधर्म इत्येव धर्मस्वरूपम् । तच्च यजेत जुहुयादित्यादिभिर्भावार्थैः कर्मशब्दैश्चोदनापरपर्यायैर्गम्य-इत्याह यजेतित्यादिनाभावज्ञापकैरिति । भावज्ञापकैरिति भावं धात्वर्थं ज्ञापयन्तीति भावज्ञापकास्तैरिति यावत् । कर्मवाचकपदैरिति कर्मशब्दैरित्यर्थः ।

एतदुक्तं भवति - न केवलं कर्मशब्देनापि केवलं भावशब्दैर्धर्मस्वरूपं विज्ञायते, किन्तु भावार्थाः सन्तः कर्मशब्दास्तैरेव धर्मस्वरूपं विज्ञायते, यथा यजेत जुहुयादित्यादिभिः, तदाहुर्भट्टपादाः -

"भावार्थाः कर्मशब्दाये तेभ्यो पूर्वक्रियागतिः ।

तैः कुर्याधिजिना स्वर्गं भेण इत्यर्थो विधीयते ।।" इति ।

भावार्थैः कर्मशब्दैर्धर्मरूपं विज्ञायत इत्युक्तं तत्र हेतुमाह - तैरत्रतत्सङ्गतिरिति ।

अयमाशयः । केचिदाहुः - यजेत जुहुयादित्यादि शब्दान् क्रियास्वरूपस्य स्वर्गादिकारणत्वं ज्ञापयितुमीशते, क्रियायाः क्षणभङ्गुरत्वात्कालान्तरभाविस्वर्गादिकारणत्वानुपपत्तेः, अतः क्रियातोभिन्नं माविस्वर्गाद्यनुकूलं

१ तन्त्रवा. १।४।२२ ।

किञ्चिदपूर्वंतत्करणमास्थेयम् । तदेव यजेतेत्यादिपदैः प्रतिपाद्यत इति-सन्न-श्रुतहानि - अश्रुतदोषकल्पनाप्रसङ्गात्, श्रुतौ हि यजेतेत्यादिषु यागादि-क्रियाभाव्यस्वर्गादिकरणत्वम्, तत्र हि यजेतेत्यादिशब्दैः किं केन कथमित्यं-शत्रयसहिताथंभावना प्रतिपाद्यते । तथाहि -

अभूतार्थ प्रादुर्भावफलं करोत्यर्थमात्रं भावना, साच सर्वत्रसिद्धकर्तृक्रिया-वाचिष्वाख्यातप्रत्ययेषु करोत्यर्थतयानुवर्तते, किं करोति? पचति, किं करोति? पठति, किं करोति? गच्छतीत्यादीनि, तदुक्तम् -

"सिद्धकर्तृक्रियावाचिन्याख्याय प्रत्ययेसति ।
सामानाधिकरण्येन करोत्यर्थो वगम्यते[१] ।।" इति ।

ततश्च सिद्धवत्कर्तृकाख्यातप्रत्ययार्थो भावना, तदत्र यजेतेत्याद्याख्यातप्रत्ययस्य लिङादित्ययमर्थः प्रतीयते कुर्यादिति । तत्र च किं केन कथमित्यंशत्रयापेक्षा भवति । साच लिङ्व्यतिरिक्तशब्दैर्योग्यतावशात्पूर्यते । तत्र च किं कुर्यादिति विमर्शापेक्षा योग्यतया स्वर्गादिशब्दैरन्यैरपेक्षकैरपि पूर्णा भवति । ततश्चायमर्थः सम्पद्यते -

स्वर्गादिकं कुर्यादिति, केन कुर्यादित्यपेक्षायां यजिधात्वर्थः करणांशे निविशते, इतिकर्तव्यताशब्दैश्च कथमित्यंशःपूर्यते, तदित्थं यज्यादिधात्वर्थक्षण-क्रियायाः श्रूयमाणं स्वर्गादिकारणत्वं दीक्षितचापूर्वं तथाकल्पितं प्रसज्येतेति भवत्येव श्रुतहान्यश्रुतकल्पनाप्रसङ्गो यदि यजेतेत्यादि शब्दा न क्रियायाः स्वर्गादिकारणत्वं ज्ञापयन्तीत्युच्यते ।

ननु यज्यादिक्रियाया यथानीप्सिततत्त्वात्म्यकिमर्शरूपेणान्वययोग्यता तथाक्षणभङ्गुरत्वान्नभाविस्वर्गादिफलं प्रति कारणत्वेन केनांशरूपेणान्वयो-

---

१ तं.वा. १।४।२२ ।

ग्यता, अतस्तदतिरिक्तं कारणांशं निवेशयन्ति, तच्चापूर्वं श्रुतिसामर्थ्यादेव लभ्यत इति नीलकंठेन इति चेत् - यथाग्न्यादीनामुत्पत्त्यपूर्वावान्तरव्या-पाराणां परमापूर्वं प्रति साधनभावस्तथा यज्यादिक्रियायाः कल्पितापूर्वा-वान्तरव्यापारायाः स्वर्गादिकरणोपपत्तेः केनांशरूपेणान्वय संभवात्, तदाहुः -

"फलाय विहितं कर्म क्षणिकं चिरभाविने ।[1]
तत्सिद्धिर्नान्यथेत्येवमपूर्वमपि गम्यते ॥" इति ।

तदेवं यागादिक्रियायाः स्वर्गादिकरणत्व संभवादुक्तं प्रीतित्यादिशब्दानां तज्ज्ञापकत्वम्, ततः सर्वस्यापि वेदस्य धर्मे एव प्रामाण्यं सुस्थितमिति सिद्धं भवति ॥ ३॥

ननु वेदान्तभागस्य ब्रह्मणि प्रामाण्यात्सिद्धेर्न सर्वस्यापि वेदस्य धर्मे प्रामाण्यमित्याशङ्क्याह -

आत्मज्ञानफलं न मुक्तिरपि तु स्वर्गोपभोगादिकं
प्रामाण्यं प्रतिपाद्यनिष्ठमुदितं वेदान्तवाचामपि ।
उक्ता मन्त्रमयी न विग्रहवती शक्रादिका देवता
यस्तस्यार्थ उपासनकविषयः सोऽपीति निश्चीयते ॥४॥

कल्पलतिका

मन्त्रमयीदेवता

अस्यायमन्वयः । वेदान्तवाचामपिप्रामाण्यं प्रतिपाद्यनिष्ठमुदितं शिष्टैरिति शेषः ।

---

१ तं.वा. २।१।५ ।

अयमाशय: - ज्योतिष्टोमादि विधय: स्वाधिकारिणं स्वर्गादिफलोपभोगयोग्यं देहव्यतिरिक्तमात्मानमन्तरेण न स्वकार्याय प्रभवन्तीति तज्ज्ञानोपायमपेक्षन्ते । सोऽयमुपाय आत्मा द्रष्टव्य इत्यादिना वेदान्तभागेन विधीयते, अत: क्रतुविध्यपेक्षितात्मप्रतिपत्तिनिष्ठवेदान्तभागस्यापि क्रियार्थत्वाद्धर्म एव प्रामाण्यं न ब्रह्मणीति । सत्येवमन्यार्थत्वादात्मज्ञानस्य न मोक्ष: स्वतन्त्रं फलं किन्तु स्वर्गाद्येव तत्क्रतुद्वारा फलमित्याह- आत्मज्ञान फलं नमुक्तिरपि तु स्वर्गोपभोगादिकमिति, तदाहुर्भट्टपादा: -

"आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न तु चोदिता ।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते [१]।।

विज्ञाति चास्य पारार्थ्यं याऽपि नामफलश्रुति: ।
सार्थवादो भवेदेव न स्वर्गादे: फलान्तरमिति ।।"

एवं च सति यथा वेदान्तानामन्यार्थतया न स्वार्थे प्रामाण्यं तथा वज्रहस्त: पुरन्दर इत्यादि विग्रहवद्देवतावाक्यानामप्यन्यार्थतया न स्वार्थे प्रामाण्यमित्याशयेनाह- उक्ता मन्त्रमयी न विग्रहवती शक्रादिका देवतेति ।

ननु मन्त्ररूपस्यैव देवतात्वेऽभिधेयार्थ तिरोभावेनार्थ शून्यत्वापत्त्या कञ्चन टतपादिशब्दाविशेषात् , अथाभिधेयार्थ: कश्चिदस्ति मन्त्राणामित्युच्येत, तर्हि, तस्यैव प्रतीयमानवज्रहस्तादिपदार्थस्य विग्रहवतीदेवतात्वं संभवति, किमिति मन्त्रमयीदेवता न विग्रहवतीत्युच्यत इत्यतआह- यस्तस्यार्थ उपासैकविषय: सोऽपीति निश्चीयत इति । सत्यमस्ति मन्त्ररूपस्याभिधेयोऽर्थस्तथापि नासौ प्रामाणिक: तथाहि- न तावन्मन्त्ररूपमेव तत्र प्रमाणं तस्यान्यत्र तात्पर्यात्, प्रत्यक्षादिश्च तत्रासंभव एव, इन्द्रियसन्निकर्षादेसंभवात्, योगिप्रत्यक्षस्य सर्वविषयत्वासंप्रतिपत्ते:, तथाचोक्तम् -

---

१ श्लो.वा.सम्ब.परि.प्र. १०३-१०४ ।

यत्राप्यतिशयो दृष्टः सः स्वार्थानतिलङ्घनात्।
दूरसूक्ष्मादि दृष्टौ स्यान्न रूपे श्रोत्रवृत्तिते ति ॥

लिङ्गाभावादनुमानमपि न तत्र प्रमाणम्, नच वैदिकशब्दगम्यत्वं लिङ्गम्, अप्रयोजकत्वात्, उपासनाविषयत्वेनाप्यस्योपपत्तेः । अतएव नार्थापत्तिः, नोपमानमपि, सादृश्यधर्मिण एवाप्यसिद्धेः । अभावप्रमाणमपि न तत्र क्रमते, तस्य भावरूपत्वेन भवद्भिरङ्गीकारात् । अभावप्रमाणस्य च भावविषयत्वानुपपत्तेः, अतः प्रतीयमानोऽपि विग्रहवच्चार्थं उपासनाविषयतया काल्पनिक एवाङ्गीकार्य इति निश्चीयते । तदेवं तथाविधकाल्पनिकार्थमन्त्ररूपमेव देवतात्वेन व्यपदिश्यत इति सर्वं सुन्दरम् । एवं सर्वस्यापि वेदस्य धर्मे एव प्रामाण्यं नान्यत्रेत्युपपादितम् ॥४॥

इदानीं वेदस्य वर्णशरीरत्वाद्वर्णानां नित्यत्वविभुत्वादिकं, तद्भ्रमनिरासय प्रतिपादयति -

नित्याः सर्वगता नभोवदुदिताः सर्वेऽपि वर्णा ध्वनि-
व्यङ्ग्यास्ते ध्वनयश्च मारुतगुणा मन्द्राच्चोच्चादयः।
एतादृग्ध्वनियोगतस्तु निखिला वर्णास्तथाधर्मिण-
स्तद्वद् भान्ति स्वतोच्चमन्द्रमुखरश्चेत्याह तौतातितः ॥५॥

कल्पलतिका

वर्णात्मकशब्दस्य नित्यत्वम्

सर्वेऽपि वर्णा नभोवन्नित्याः सर्वगता उदिताः । तथाहि- वर्णा नित्याः ध्वनिधर्मान्यत्वे सति श्रावणत्वाच्छब्दत्ववत् - इत्यनुमानाद्वर्णानां नित्यत्वं सिद्ध्यति । नचवाच्यमनित्या वर्णाः शब्दत्वात् ध्वनिवदिति सत्प्रतिपक्षग्रस्तं वर्णनित्यत्वानुमानमिति, स एवायं गकार इत्यादिप्रत्यभि-

ज्ञानगकारादिव्यक्तिविषयेति वाच्यम्, व्यक्तिविषयत्वे बाधादर्शनात् । ननु तारगकारव्यक्तेर्मन्द्रगकारव्यक्तिभेदस्तावदङ्गीकार्यः, तारमन्द्रत्वादिविरुद्धधर्माध्यासस्यैकत्रासंभवात्, अतो गकारव्यक्तिभेदसिद्धौ सोयं गकार इत्यादि प्रत्यभिज्ञा नव्यक्तिविषया, किन्तु जातिविषया, अतो गकारादिवर्णव्यक्तीनामनित्यत्वानुमानं न प्रत्यभिज्ञाबाधितविषयमितिचेन्,

मैवंवोचः, गकारव्यक्त्यैक्येपि तारमन्द्रध्वनियोगात्तथाप्रतिभासोपपत्तौ सोयं गकार इति प्रत्यभिज्ञाया गकारव्यक्त्यैक्यविषयत्वोपपत्तिः ।अन्यथात्वन्मतेपि तारमन्द्रगकारव्यक्तिभेदाङ्गत्वस्याभिन्नस्यापि भेदप्रतिभासोपपादनं शिथिली भवेत् । तस्माद्यथा तारादि गकारव्यक्तिभेदाङ्गत्वभेदप्रतिभासस्त्वन्मते तथा मन्मते तथाविधध्वनिभेदाद् गकारव्यक्तिभेदप्रतिभासोपपत्तिरिति । तदाहुः -

"यथैव न तु गत्वादि गम्यमाने द्रुतादिभिः ।
विशेषैरपि नानेकमेवं वर्णोपि नो भवेत् ।।
त्वयापि व्यञ्जक व्यक्तिभेदाद्भेदोभ्युपेयते ।
ममापि व्यञ्जकादिभेदबुद्धिर्भविष्यतीति [१] ।।"

तस्मात्सोयं गकार इत्यादि प्रत्यभिज्ञाबाधितविषयं वर्णानित्यत्वानुमानं न वर्णनित्यत्वानुमानसत्प्रतिपक्षतां भजते । सत्येवं वर्णानां नित्यत्वे सर्वगतत्वं साध्यते । सर्वगता वर्णाः नित्यत्वेसत्यस्मदादिप्रत्यक्षत्वादात्मवदिति । नचास्मदादिपदं व्यावृत्त्याभावादव्यर्थमिति शङ्कनीयम्, परमाण्वादावसर्वगते नित्यत्वेसति योगिप्रत्यक्षे परमाप्राप्तानिव्याप्तिपरिहारार्थतयासार्थक्योपपत्तिः । तस्माद् वर्णात्मकः शब्दो नित्यः सर्वगतश्चेति स्थितम्। तदाहुः -

---

१ श्लो.वा.स्फोट.२४-२५ ।

"वर्णात्मानस्तु ये शब्दा नित्याः सर्वगताश्च ते ।
पृथग्द्रव्यतया ते हि न गुणाः कस्यचिन्मताः"[1] ।। इति ।

ननु वर्णानां नित्यत्वे सति सर्वगतत्वे सर्वदा श्रोत्रसङ्गतत्वादुपलब्धिरनुपलब्धिर्वा स्यात्तयोः कादाचित्कत्वे नियामकाभावादित्याशङ्क्याह-ध्वनिव्यङ्ग्या इति । अयं भावः, वर्णानां ध्वनिव्यङ्ग्यत्वाद्व्यञ्जकध्वनिसम्बन्धे सत्युपलब्धिरसति चानुपलब्धिरित्युपलब्ध्यनुपलब्ध्योः कादाचित्कोपपत्तौ न सर्वदा तयोरन्यतरप्रसञ्जनं समञ्जसमिति, तदाह-

यथा घटादेर्दीपादिरभिव्यञ्जक इष्यते ।
तद्गुणानुग्रहादेवं ध्वनि स्याच्छ्रोत्रसङ्गतिरिति[2] ।।

ननु वर्णातिरिक्तध्वनीनामभावात्कथं वर्णव्यञ्जकत्वं तेषामित्याशङ्क्याह ते ध्वनयश्च मारुतगुणा मन्द्रोच्चनीचादय इति । दूरादुच्चारणवर्णव्यक्त्यभावेऽपि य आकर्ण्यन्ते ते ध्वनयो मारुतगुणाः, चकारान्नभसा वा सर्वथा तावद् वर्णातिरिक्ता एव ध्वनयो न वर्णात्मान इति तात्पर्यार्थः । एतदेव मन्द्रोच्चनीचादय इत्यनेन समसूचि । मन्द्रो गकार उच्चो गकारो नीचो गकार इत्यादिषु गकारव्यक्तेरनुवृत्तेर्मन्द्रत्वादिव्यावृत्तेश्च मन्द्रादि ध्वन्यतिरिक्तो गकार इति गम्यत इति भावः ।

एवं ध्वनिस्वरूपमभिधाय तत्सम्बन्धाद्वर्णेष्वपि तथा प्रतिभाति भवतीत्यत- एतादृ ध्वनियोगत इत्यादिना । मन्द्रादिध्वनियोगादमन्दादि

---

१ श्लो. वार्तिकम् श. नि. प्रकरणम् ।
२ श्लो. वा. शब्दनि. ४२ ।

स्वरूपादिष्वपि निखिलावर्णास्तथाधर्मिणस्तथाविधमन्द्रत्वादि धर्मवन्तः सन्तस्तद्वत्स्वरोच्चमन्द्रमृदवो भान्ति । यथा रक्तः पटस्तत्त्वतोतथाभूतो-पिकुसुम्भादिरक्तद्रव्यसम्बन्धात्तथाविधरक्तत्वादिधर्मैर्वा तद्वदवभासते, तथा वर्णा अपि तत्त्वतो तथाभूता तथाभूतध्वनिसम्बन्धात्तथावभासन्त इति ।

उक्तं(?)थं शिष्टोक्तिरस्तीत्याह- इत्याह तौतातित इति ।शिष्टोक्तिश्च लेशतो दर्शिता यथेत्र तत्त्वगन्धादीत्यादिना।।५।।

इति श्रीकविकविन्दुश्रीजाणराजविरचितायां
कल्पलतिकायां भाट्टशास्त्रसङ्ग्रह
व्याक्रिया ।

अथप्राभाकरशास्त्रसङ्ग्रहप्रक्रिया

इदानीं प्राभाकरशास्त्रस्य भाट्टशास्त्रेण प्रायः सादृश्यात्तन्निरूपणानन्तरं तत्सङ्ग्रहं पद्यत्रयेण प्रतिपादयति -

व्यावृत्तात्मकमेव वस्तु सकलं प्राभाकरीये मते
भेदस्तत्र घटादिरूप उदितस्तद्धर्मरूपी नहि ।
ज्ञानं चापि यथार्थमेव सकलं पञ्चप्रमाणानि तु
प्रत्यक्षप्रमुखान्यभावरहितान्यत्रापि शब्दो गुणः ॥
॥१॥

नित्यः सोऽप्यथवाक्यतः पदचयः सर्वोऽपि कार्यान्वितः
स्वार्थे कार्यपरस्तु कार्यविषये चान्यान्विते शक्तिमान् ।
कृत्युद्देश्यतयाऽप्रधानमपि यत्कार्यं मार्याविदु-
वेदे तच्च नियोग संज्ञकमथो भावार्थसंज्ञं त्विह ॥
॥२॥

यन्मानान्तरगोचरो नहि ततो पूर्वं नियोगो भवेत्
तस्मादेवफलं भवेन्न च पुनर्धात्वर्थतो भङ्गुरात् ।
स्वस्मिन् प्रेरयति नियोज्यपुरुषं यस्मात्ततः प्रोच्यते
तज्ज्ञैरेष नियोग इत्यभिहितं मीमांसकैर्युक्तितः ॥
॥३॥

कल्पलतिका

भाट्टमतादस्य वैलक्षण्यम्

अत्र च ज्ञानयथार्थत्वादिनिरूपणस्य वस्तुव्यवस्थोत्तरकालीनत्वात्तमेव प्रथमश्लोकार्धेन प्रथमं तावदाह- व्यावृत्तात्मकमेव सकलमित्यादिना ।स्वकारण भादौक व्यावृत्तानुवृत्तात्मकत्वं निवारयति । सकलमिति वैशेषिकमतात्व्यावृत्ति-

विधीयते । तत्र हि न सर्वं वस्तु व्यावृत्तात्मकं, नापि व्यावृत्तात्मकमेवापि, किन्तु व्यक्त्यादिव्यावृत्त्यात्मकमेव, जात्याद्यनुवृत्तात्मकमेवेति, ततो व्यावृत्तात्मकमेव जात्याद्यनुवृत्तात्मकमेवेति । ततो व्यावृत्तात्मकमेव वस्तु सकलमिति पदाद्वय व्यावृत्तिपरो युक्तः प्रयोगः ।

ननु कथं सर्वमपि व्यावृत्तात्मकं वस्तु यावता जातिरनुवृत्ता घटादिषु प्रतीयते इति चेत् - मैवं वोचः, जातेरप्रसिद्धत्वात् । ननु यदि जातिर्नाङ्गीक्रियेत तर्हि व्यावृत्तेषु घटादिषु अनुगतप्रत्ययो न स्यात्ततो जातिरङ्गीकर्तव्येति चेत् -

न यया जातिव्यञ्जकमङ्गीक्रियते तेनैवानुवृत्तप्रत्ययोपपत्तिः । नच जातिव्यञ्जकमपि स्वरूपतोऽनुवृत्तं स्वीकर्तुमुचितम्, तथासति हि तस्यापि जातिवन्नित्यत्वापत्त्या सर्वदोपलब्धिवारणाय कादाचित्कं व्यञ्जकमास्थेयम् । तथाच तस्याप्येवं तस्याप्येवमित्यनवस्था प्रसङ्गः । तस्माद्घटादिव्यक्तय एव व्यञ्जकत्वेनाङ्गीकार्याः । ताश्च व्यावृत्ता स्वानुवृत्तस्वरूपं धर्मविनैव यथा तवानुवृत्तघटत्वादिजातिव्यञ्जकास्तथा ममानुवृत्तप्रत्ययंप्रति गोचरीभविष्यन्तीति मुधानुवृत्तजाति स्वीकारः ।

भवतु तर्हि व्यावृत्तानुवृत्तं वस्तुतत्त्वमिति चेत् न विरोधात्, नह्येकमेव वस्तु व्यावृत्तमनुवृत्तञ्चेति युज्यते, नित्यमनित्यमिति वत्, अथवा भेदाद्व्यावृत्तानुवृत्तात्मकत्वमविरुद्धवत्यङ्गीक्रियेत, तदाह:-

"कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हेमात्मना यथाभेदः कुण्डलाद्यात्मना भिदा" इति ॥

तथापि ह्याकारस्य वस्तुनोऽनुगमानुपपत्तेर्व्यावृत्तात्मकमेव वस्तुतत्त्वमङ्गीकर्तुं भवतु, तदाह:-

सामान्यं नहि वस्त्वाभा विशेषश्चित्र एव सः ।

तस्यानन्वयतोभेदवादः शब्दान्तरादय इति ॥

तस्माद् व्यावृत्तात्मकमेव वस्तुतत्त्वमिति ।

भेदो व्यावृत्तात्मकः

ननु पटाद् घटादयोभिन्ना इत्यत्र घटादिषु व्यावृत्तिष्वनुवृत्तोभेदः प्रतीयत इति न सर्ववस्तु व्यावृत्तात्मकमित्याशङ्क्याह भेदस्तत्रेत्यादि घटादेव रूपमस्येति घटादिरूपो भेदः । भेदस्वभावाः सर्वे भावा इत्यर्थः, ततो न घटादिष्वनुवृत्तोभेदो येन न सर्ववस्तु व्यावृत्तात्मकमित्याशङ्क्येतेति भावः । अत्र हेतुमाह तद्धर्मरूपो नहि इति ।

अयमर्थः, यदि भेदो घटादिधर्मस्तर्हि घटादेर्भिन्नोऽभ्युपेयः एकस्यैव धर्मधर्मिभावासंभवात्, यदा च घटादिभ्योभिन्नोभेद इत्यभ्युपगमस्तदापि भेदान्तरेण वा भिन्नः स्वरूपेणैव वेति वाच्यम् । यद्याद्यः, तर्ह्यनवस्था-भेदान्तरस्यापि स्वधर्मिभेदादन्यभेदान्तरेणैव भिन्नत्वाङ्गीकारस्यावश्यकता। अथ घटादिधर्मोभेदः स्वरूपेणैव ततोभिन्न इति द्वितीयः पक्षस्तर्हि घटादिना किमपराद्धं भेदेन च किमनुकूलमाचरितम् । घटादिः स्वरूपतो न भिन्नत्वं भेदस्य तु स्वरूपतोभिन्नत्वमसतिविशेषेऽभ्युपगम्यते । ततो घटादिरेव भेदशब्देन व्यपदिश्यते, तच्च व्यावृत्तात्मकमेव सर्वमित्युपपादितम् ।

ज्ञानं यथार्थमेव

ननु विमतं ज्ञानमयथार्थं प्रत्ययत्वात् सम्प्रतिपन्नवदित्यनुमानाद् घटादिरूपस्यापि प्रतीयमानस्य भेदस्यावस्तुत्वे कथं व्यावृत्तात्मकमपि वस्तुतत्त्वमित्याशङ्क्याह ज्ञानं चापि यथार्थमेव सकलमिति ।

अयमाशयः, यदि विमतं ज्ञानमयथार्थं प्रत्ययत्वात्सम्प्रतिपन्नवदित्यनुमानं दोदिदामं स्यात्तर्हि घटादिभेदप्रत्ययानामयथार्थत्वे घटादिभेदानामवस्तुत्वं स्यात्, न चैतदस्ति, दृष्टान्तस्य साध्यवैकल्येन हेतोर्विरुद्धत्वात्, न ह्ययथार्थं किमपि ज्ञानं नः प्रतिपन्नम् ।

इदं रजतमित्यादि ज्ञानस्यापि यथार्थत्वाभ्युपगमादुपपत्तिश्च । तथाहि-काचकामदापर्भसद्बुद्धदोषदूषितलोचनालोचितशुक्तिकाशकलादिसाधारणाकारकलने तथाविधदोषवशाच्छुक्तित्वादि विशेषास्फुरणे च सति समुद्बुद्धसंस्कारकारणकं रजतगोचरस्मरणमुपजायते तावत् । तच्च स्मरणमान्तरदोषवशादवगतावियुक्तमवभासते, ततश्चेदमिति पुरोवर्तिसाधारणाकारग्रहणस्य रजतमिति स्मरणस्य च विषयतः स्वरूपतश्च परस्परं भिन्नस्याप्यसंसर्गाग्रहात्सम्प्रतिपन्नरजतग्रहणसारूप्येणेदं रजतमिति व्यवह्रियते । न पुनः पुरोवर्तिनीदं रजतमित्यसत्यमेव तदनुभूतिः, येन तत्प्रत्ययस्यायथार्थत्वं स्यात् क्वचित्पुनर्ग्रहणयोरेव यथार्थत्वे[1] दोषाभावान्मानसद्भावाच्च तदन्तःपातिभेदप्रत्ययस्यापि यथार्थत्वे स्थिते सिद्धं स्वरूपभिदाभिन्नं व्यावृत्तात्मकं वस्तुतत्त्वमिति ।

प्रमाणपञ्चकम्

एवं वस्तुतत्त्वं व्यवस्थाप्य मानाधीनामेयसिद्धिरिति न्यायेनैतन्मतानुगतं प्रमाणविभागमुपदिशति पञ्चेत्यर्थः । नित्यत्वं च शब्दस्य वर्णात्मकस्यैव वेदितव्यम् । एतस्यानित्यत्वेन सम्प्रतिपन्नत्वात् । तन्नित्यत्वमत्र भाट्टप्रक्रियानुसारेण समर्थनीयम् ।

---

१ 'यथार्थत्वे' इत्यतः 'दण्डेनेत्यादि' पर्यन्तस्य पाठस्यावृत्ततया तं परित्यज्योचितानुपूर्वी स्थापिता । टि.

कार्यान्विते शक्तिः

एवं शक्तरूपं निरूप्य तस्य कथं प्रामाण्यमित्याकाङ्क्षायां अथेत्यादिना शक्तिमानिरूपयन्तेन ।

अयमत्रार्थसङ्ग्रहः । गामानय दण्डेनेत्यादिपदकदम्बात्मकं वाक्यं कार्यपरतया प्रमाणतामवलम्बते इति सर्वजनप्रतीतिसिद्धम् । तथाहि- गामानय दण्डेनेत्युत्तमवृद्धप्रयुक्तपदकदम्बकश्रवणसमनन्तरसमुपजातप्रवृत्तिं मध्यमवृद्धमवलोक्य मध्यस्थः कश्चिदनुमिनोति - अस्येयं प्रवृत्तिः कार्यज्ञानपूर्विका प्रेक्षावत्प्रवृत्तित्वान्मदीयप्रवृत्तिवदिति । तच्चास्य कार्यज्ञानं कारणान्तरासंभवात्तदनन्तरप्राग्भाविपदकदम्बकश्रवणकारणकमेव भवितुमर्हतीति गामानय दण्डेनेत्यादिपदकदम्बकस्यापि कार्यार्थे तात्पर्यमिति च पर्यालोचयति । तस्माद्गामानयेत्यादि वाक्यस्य कार्यपरतयैवाध्यवसाये स्थिते सत्यावापोद्वापाभ्यां गामित्यादिपदकदम्बकस्य कार्यान्वितस्वार्थाभिधायित्वमानयेत्यादि पदकदम्बकस्य पुनरन्यान्वितस्वार्थाभिधायित्वमध्यवसीयते ।

नचवाच्यं गामित्यादिपदकदम्बकेन कार्यान्वितस्वार्थाभिधाने कार्यपदस्य वैयर्थ्यम्, कार्यपदेनान्यान्वितस्वार्थाभिधाने गामित्यादि वैयर्थ्यम्, तावतैव प्रतिपादयिषित प्रतिपत्त्युपपत्तेरिति । भावानवबोधात् - गामित्यादिपदं तु द्वितीयादि विभक्त्यर्थान्वित एव । द्वितीयादिविभक्त्यर्थश्च क्रियाव्याप्यत्व लक्षणकर्मत्वादिः । तच्चक्रियाव्याप्यत्वं न क्रियान्वयं विना संभवतीति द्वितीयादिविभक्तिमद्भिर्गामित्यादिपदैः क्रियाव्याप्यत्वादिविशिष्टगवादिस्वार्थमभिदधद्भिः । क्रियान्वित एव सोऽभिधीयते ।

क्रियाच धात्वर्थलक्षणा । सा च प्रवर्तकवाक्ये कार्यमित्युच्यते, ततश्च प्रवर्तकवाक्ये क्रियान्वितस्वार्थाभिधायकानि गामित्यादिपदानि कार्यान्वितं

स्वार्थमभिदधतीत्युच्यते ।एवमानयेत्यादिकार्यपदमपि योग्यान्वितमर्थमभिधत्ते, आनयेत्यादिपदेभिहिते हि सामान्येन कारकान्वितमानयनादि प्रतीयते,अन्यथा कारकविशेषाकांक्षानुदयप्रसङ्गात्, सति हि सामान्यतोभिधाने विशेषाकाङ्क्षा भवति । इदमित्युक्ते किमितिवत् । तस्मादानयेत्यादिकार्यपदं योग्यान्वितार्थाभिधायकमित्युचितम् ।

नचैवं सति गामित्युक्ते सत्यानयनस्यानयेत्युक्ते च गवादिपदानामुच्चारणवैयर्थ्यप्रसङ्ग इति वाच्यम् विशेषसमर्पकतया सार्थक्योपपत्तेः ।

कार्यलक्षणम्

एवं गामानयेत्यादिपदकदम्बकस्य कार्यपरतया प्रामाण्यमुपवर्ण्य कार्यपदार्थं लक्षयति कृत्युद्देश्यतयेत्यादिनाविदुरित्यन्तेन । कृत्युद्देश्यत्वेसति प्रधानं कार्यमिति कार्यलक्षणमाचक्षते विचक्षणा इत्यर्थः । प्रधानपदेन फलादिव्यावृत्तिः । तस्य कृत्युद्देश्यत्वेसत्यपि प्रधानत्वाभावात् ।

ननु कथं फलादेः प्राधान्याभावो यावता तादर्थ्यमन्यस्य क्रियादेरवगम्यते, तदर्थं ह्यन्यद्भवति तत्प्रधानमितिप्रसिद्धिरितिचेत् - न, अत्र शाब्दप्राधान्यस्य विवक्षितत्वात् । नच शाब्दं प्राधान्यं फलादेरुपलभ्यते, शाब्दं हि प्राधान्यं तत्रैव भवति, यदप्राप्तं बोध्यते शब्देन । नचाप्राप्तफलादिबोधाय शब्दप्रवृत्तिः तस्य रागादिना प्राप्तत्वात् । किन्तर्हि? रागादिप्राप्तं फलादिकमनूद्याप्राप्ततत्करणादिबोधाय, ततः फलादेः शाब्दप्राधान्याभावाद्युक्ता प्रधानपदेन तद्व्यावृत्तिः ।

तथातीतादिव्यावृत्त्यर्थं कृत्युद्देश्यमिति अस्ति हि रामः सेतुं बबन्धेत्यादिषु सेतुबन्धादेः शाब्दप्राधान्यम् । नच तस्य कृत्युद्देश्यता, अतीतादिस्वरूपत्वात् । तस्मात्कृत्युद्देश्यत्वेसति प्रधानं कार्यमिति कार्यलक्षणं युक्तम् । तदाह:-

कृत्युद्देश्यं प्रधानं यत्तत्कार्यमभिधीयत इति । तदेतत्कार्यं लोके भावार्थापरपर्यायं वेदे तु नियोगसंज्ञमित्याह वेदे तच्चेत्यादिना । अयं भावः, लोके भावार्थस्यैवानयनादेर्यथोक्तकार्यत्वदर्शनाद्भावार्थ एव गामानयेत्यादौ कार्यशब्दाभिधेयः । वेदे तु न तथा, तत्र हि क्षणभङ्गुरे भावार्थे यथोक्तकार्यलक्षणाभावात्तदतिरिक्तं किञ्चित् स्वर्गाद्यनुकूलं कार्यपदेनाभिधीयते । तथाहि- अग्निहोत्रं जुहुयात्स्वर्गकाम इत्यत्र काम्यसम्बन्धात्साध्यस्वर्गविशिष्टो नियोज्यः प्रतीयते । स च नियोज्यस्तदेव कार्यतयाधिगच्छति यत् काम्यमानस्वर्गाद्यनुकूलतामवलम्बताम् । न चाग्निहोत्रादिक्रिया कालान्तरभाविस्वर्गाद्यनुकूला क्षणभङ्गुरत्वात् ततस्तदतिरिक्तमेव किञ्चित् स्वर्गाद्यनुकूलं कार्यतयाधिगच्छति नियोज्य इति गम्यते । तच्च नियोगशब्देनान्वर्थेनाभिधीयते, अस्य चान्वर्थतां नातिदूरे निरूपयिष्यति, तदेव लोके भावार्थसंज्ञया वेदे च नियोगसंज्ञया व्यवह्रियते यथोक्तलक्षणं कार्यमिति ।

न केवलं नियोगसंज्ञया कार्यं व्यवह्रियते, किन्तर्हि ? अपूर्वसंज्ञयाप्यन्वर्थयेत्याह यन्मानान्तरगोचरो न हि ततो पूर्वं नियोगो भवेदिति । पूर्वोक्तरीत्या क्रियादिभिन्नं स्वर्गाद्यनुकूलं यन्नियोगपदगोचरः कार्यं तन्मानान्तरागोचरत्वादपूर्वशब्दविषयो भवेदिति यावत् । तदाहुः-

क्रियादिभिन्नं यत्कार्यं वेद्यं मानान्तरैर्न तत् ।
अतो मानान्तरापूर्वमपूर्वमभिधीयत इति ॥

तदेतदपूर्वं नियोगाभिधानं क्रियादिभिन्नमेव कार्यं स्वर्गाद्यनुकूलं न क्रियालक्षणं भङ्गुरत्वादित्याह तस्मादेव फलमित्यादिना भङ्गुरादित्यन्तेन । स्पष्टोऽर्थः । उपपत्तिस्तु लेशतः प्राक् प्रत्यपादि । एवं क्रियादिभिन्नं नियोगापरपर्यायमपूर्वं वेदे कार्यमित्युक्तम् । तत्र नियोगशब्दस्यान्वर्थतामाह स्वस्मिन् प्रेरयत इत्यादिना । यस्मात् कारणात् स्वस्मिन् नियोज्यपुरुषं

प्रयति ततः कारणात् तज्ज्ञैर्नियोगज्ञाणढोमीमांसकैरेष नियोग इति प्रोच्यते, तदाहुः -

कार्यत्वेन नियोज्यञ्च स्वात्मनि प्रेरयन्नसौ ।
नियोग इति मीमांसानिष्णातैरभिधीयते इति ॥

तदेतघदवादि मीमांसकैस्तदुपपत्ति स्वेत्याह युक्तित इति। युक्तिश्च लेशतो दर्शिता । विस्तरः पुनरन्यतोऽवगन्तव्यः ॥१॥ ॥२॥ ॥३॥

इति श्रीकविकेविन्दुश्रीजाणराजविरचितायां
कल्पलतिकायां प्राभाकरशास्त्रसङ्ग्रह
व्याक्रिया ।

अथ सांख्यमतसङ्ग्रहप्रक्रिया

इदानीं वेदान्तिमतापेक्षया सांख्यमतस्य भेदवादित्वेन पूर्वोक्तदर्शनैः साम्यात्तदनन्तरं तस्यैव वक्तुमुचितस्य संग्रहं प्रतिज्ञापुरस्सरं पद्यत्रयेण प्रतिपादयति -

ब्रूमः सांख्यमिह प्रधानपुरुषाद्भेदेन तत्त्वद्वयं
तत्रापि प्रकृतिः प्रधानवचनात्तस्याश्चतुर्विंशतिः ।
रूपाणि प्रकृतिर्महानहमथो पञ्चापि तन्मात्रिकाः
शब्दाद्या अथ भूतपञ्चकमतश्चैकादशाक्षाणि च ।।

।।१।।

स्यान्मूलप्रकृतिर्विकाररहिता नित्या जगत्कारणं
सत्त्वादित्रिगुणात्मकं महत्प्रभृति तु स्यात्सप्तकं प्राकृतम् ।
अन्यस्य प्रकृतिश्च षोडशपरे भावाः पुनः प्राकृता
नान्यस्य प्रकृतिः पुमांस्तु बहुधा स्याच्चेतनाविग्रहः ।।

।।२।।

नासौ तु प्रकृतिर्न चापि विकृतिर्नाप्यसङ्गोऽपि सं-
स्तादात्म्यं प्रकृतेरवाप्य भजते दुःखादिसङ्गं पुमान् ।
सत्त्वस्यातिशयात्प्रधानपुरुषाभेदावभासे गते
कैवल्यं पुरुषस्य यच्च सहजं निःश्रेयसं तद्विदुः ।।

।।३।।

कल्पलतिका

सामान्यतः पदार्थविभागः

अत्र चाद्यपद्येन विवादितमतप्रतिज्ञां तदभिमततत्त्वस्य सामान्यतो विशेषतश्च तत्तत्संज्ञाभेदेन विभागं निरूपयति तत्र च ब्रूमः सांख्यमिति

प्रतिज्ञा, इत्यादिना तत्त्वविभागनिरूपणम् । तथाहि- इत्यस्मिन् सांख्यशास्त्रे प्रधानपुरुषद्वैधेन तत्त्वद्वयम् । प्रधानं पुरुषश्चेति द्वैधेन सामान्यतस्तत्त्वद्वयम् । अत्रापि प्रधानशब्दः प्रकृत्यपरपर्याय इति दर्शयंस्तस्य चतुर्विंशत्यात्मना विभागमभिधत्ते तत्रापि प्रकृतिरित्यादिना रूपाणीत्यन्तेन।

प्रकृतिभेदः

अयमर्थः, तत्रापीति प्रधानपुरुषयोर्मध्ये प्रकृतिः प्रधानवचना, प्रधानमितिवचनं यस्याः सा तथोक्ता प्रधानशब्देन प्रकृतिरुच्यत इत्यभिप्रायः । प्रकृतिर्नामानात्मकवस्तु, सा च प्रकृतिश्चतुर्विंशत्यात्मना विभक्तेत्युक्तं, तमेव विभागमभिव्यनक्ति प्रकृतिर्महानित्यादिना ।

अयमाशयः, प्रकृतिर्मूलप्रकृतिर्वक्ष्यमाणलक्षणेति यावत्, महानिति प्रथमो मूलप्रकृतिविकारः, अहमित्यहङ्काराख्यो महत्तत्त्वस्य प्रथमो विकारः, अथो पञ्चापि तन्मात्रिका इत्यहङ्काराख्यतत्त्वानन्तरं पञ्चतन्मात्राः शब्दस्पर्शरूपरसगन्धाख्या भवन्ति । अथ भूतपञ्चकमिति शब्दादितन्मात्रानन्तरमाकाशादिभूतपञ्चकं भवति, अतश्चेत्येतदनन्तरमेकादशाक्षाणीति श्रोत्रस्पर्शचक्षूरसनघ्राणवाग्गुदलिङ्गकरचरणा तत्कारणाख्यान्येकादशेन्द्रियाणि भवन्ति ।

प्रकृतिलक्षणम्

एवं प्रकृतिश्चतुर्विंशतिविभागानभिधायाथविभागस्य प्रकृतिशब्दोद्दिष्टस्य मूलप्रकृतितत्त्वस्य लक्षणमाह स्यान्मूलप्रकृतिरित्यादिना त्रिगुणेत्यन्तेन ।

अयमर्थः, जगत्कारणमिति महदादेः प्रपञ्चस्य उपादानकारणं तन्मूलप्रकृतिरिति मूलप्रकृतेः तटस्थलक्षणम् । विकाररहिता नित्यासत्त्वादित्रि-

गुणीति स्वरूपलक्षणम् । विकाररहितेति स्वरूपलक्षणम् । अत्र च सत्त्वादित्रिगुणा नित्येत्यादिव स्वरूपलक्षणम् । विकाररहितेतिपदं नित्यत्वोपपादकम् । यतो विकाररहिता विकारेण कृतत्वेन रहिताः स्वयं विकाररूपा न भवन्ति ततो नित्येति । एतावत्येव मूलप्रकृतेः स्वरूपलक्षणे पुरुषे व्यभिचारस्तस्यापि नित्यत्वात्त इदमुक्तं सत्त्वादित्रिगुणेति । सत्त्वादयस्त्रयो गुणा यस्यास्तथोक्ता ।

ननु सत्त्वादयस्त्रयो गुणा एव मूलप्रकृतिरिति सांख्यैः स्वीकृतत्वात्त्रयो-गुणा यस्या इति गुणत्रयान्मूलप्रकृतेरन्यत्वबोधको विग्रहो न युक्त इति चेत् - न, मूलप्रकृतेर्गुणा नित्या इति मूलप्रकृतेः स्वरूपलक्षणम् । सत्त्वादित्रिगुणा मूलप्रकृतिरित्येव तल्लक्षणे महदादितत्त्वेषु व्यभिचारस्तेषामपि त्रिगुणात्मकत्वात्स्वयं विकाररूपत्वेन मूलप्रकृतित्वाभावाच्च ततो नित्येत्युक्तम्, तदेवं नित्या सत्त्वादित्रिगुणेति मूलप्रकृतेः स्वरूपलक्षणम् ।

तटस्थलक्षणन्तु जगत्कारणमित्युक्तम् । ननु कथं जगत्कारणत्वं गुणत्रयात्मिकाया मूलप्रकृतेरिति चेत् - उच्यते, विमतं अविभक्तजडवस्तूपादानकं परिमितत्वाद् घटशरावादिवत् । तथा विमतं सुखदुःखमोहसामान्योपादानकं नियमेन तदन्वितस्वभावत्वात् यन्नियमेन यदन्वितस्वभावं तत्तत्सामान्योपादानकं यथा मृत्सामान्यान्वितस्वभावं घटशरावादि । नचायमसिद्धो हेतुः विमतस्य रागद्वेषमोहहेतुत्वेन तत्सिद्धेः । तथाहि- काचनकामिनी कस्यचिन्निजप्रियस्य रागमुत्पादयति, सैव सपत्नीजनस्य द्वेषं जनयति उदासीनस्य च मोहमज्ञानलक्षणम् । तत्कस्य हेतोः? तं प्रति सुखदुःखमोहात्मकसत्त्वरजस्तमसामाविर्भावात्, सुखदुःखमोहा एव हि सत्त्वरजस्तमांसि । तेन, गुणत्रयोपादानकं विमतं सिध्यति ।

तथा विमतं अविभक्तं जडवस्तूपादानकं प्रवृत्तिशक्तिमत्वात् घटादिवत्, विमतं जडस्वभावमिति तदुपादानमपि जडस्वभावमिति, तथा विमतं अविभक्तं जडवस्तूपादानकं विचित्रकार्यत्वादिकबीजप्ररूढाङ्कुरकाण्डादिवत् । तदित्यमनेन हेतु-कलापेनास्य जगतो गुणत्रयात्मिका मूलप्रकृतिरेवोपादानमिति युक्तम् । तदाहुः-

[1]भेदानां परिमाणात्समन्वयाच्छक्तितः प्रवृत्तेश्च ।
कारणकार्यविभागादविभागाद्विश्वरूपस्य ... इति ॥

अत्र च कारणमस्ति गुणत्रयात्मकमव्यक्तं महदादिविशेषाणामित्यन्वयः ।

महदादिसप्तकस्य स्वरूपम्

एवं गुणत्रयात्मिका नित्या जगत्कारणं मूलप्रकृतिरित्यात्मवस्तुरूपा-ण्प्रकृतिश्चतुर्विंशत्यात्मनाविभक्ता या आद्यविभागस्वरूपं निरूप्य महदादिविभा-गसप्तकस्य स्वरूपं निरूपयति महदित्यादिना प्रकृतिश्चेत्यन्तेन । महत्तत्त्व-महङ्कारतत्त्वं, शब्दाद्याः पञ्चतन्मात्रा इत्येतत्तत्त्वसप्तकं प्राकृतं प्रकृति-जन्यम्, अन्यस्य प्रकृतिश्च कारणं भवति, पूर्वं पूर्वं प्रति कार्यत्वमुत्तरोत्तरं प्रति कारणत्वमित्यर्थः । तथाहि- महत्तत्त्वं मूलप्रकृतेः कार्यं कारणञ्चाहङ्का-रतत्त्वस्य, तथाहङ्कारतत्त्वमहत्तत्त्वस्य कार्यं कारणञ्च शब्दादितत्त्वा-ख्यतन्मात्रपञ्चकंप्रति, तथा तदपि पूर्वंप्रति कार्यं कारणञ्चोत्तरं प्रतीत्यादि ज्ञेयम् ।

एवं महदादितत्त्वसप्तकस्यापि (आदिक) प्राकृतत्वं प्रकृतित्वञ्चोक्त्वाका-शादीनां षोडशभावानां प्राकृतत्वमेव न पुनः प्रकृतित्वमपीत्याह-षोडशस्तु

---

१ सां.का. १५ ।

भावाः पुनः प्राकृता नान्यस्यप्रकृतिरिति । पी इति शब्दादितन्मात्रापञ्चकामन्तरीक्त आकाशादिभूतपञ्चकमेकादशेन्द्रियाणीत्येतत्पुनः षोडशभावाः प्राकृताः प्रकृतिजन्या, अन्यस्य प्रकृतिरित्युपादानकारणं न भवन्ति । महदादिसप्तकमितेति षोडशभावाः प्राकृताः सन्तः प्रकृतिरूपाश्चान्यंप्रति न भवन्ति किन्तु प्राकृता एवेत्यर्थः ।

पुरुषस्वरूपम्

एवं चतुर्विंशत्यात्मकं प्रकृतिशब्दाभिधेयं प्रधानमभिधाय पुरुषस्वरूपं निरूपयतिपुमांस्तु बुधेत्यादिना । पुमानितिपुरुषश्चेतनाविग्रह इति विज्ञानशरीरी बुधेति प्रतिशरीरं भिन्नस्तत्त्वत इति यावत् । पुमांस्त्विति तुशब्दः पुंसः प्रकृतिवन्नियतविभागत्वं वारयति । "अत्रायंपुरुषः[१] स्वयंज्योतिरि"ति श्रुतिस्तावत् पुरुषस्य विज्ञानशरीरत्वमवगम्यते । स्वयंज्योतिरितिपदेन हि स्वप्रकाशत्वमात्मनोऽभिधीयते, स्वप्रकाशं च विज्ञानमेव, तेनात्मनः स्वप्रकाशत्वमभिदधतीयंश्रुतिर्विज्ञानविग्रहत्वमिवावेदयति ।

ननु विज्ञानस्य स्वप्रकाशत्वं कुत इतिचेत् उच्यते, विमतं विज्ञानं स्वसमानाश्रयस्वसमानकालस्वगोचरज्ञानविरहप्रयुक्त व्यवहारविरहं न भवति विज्ञानत्वादनन्तरव्यवह्रियमाणविज्ञानवत् । विपक्षे घटादिप्रकाशानन्तरमिव 'मयेदं विदितम्' इति विकल्पो न स्यात्, मतत्वविज्ञाते विशेषणे विशिष्टप्रतिभासः[२], न च तद्गोचरंविज्ञानान्तरमनुभूयते, अनुभूयतेचेत् तद्गोचरमप्यनुभूयतेत्यनवस्था स्यात् । तथाचोक्तम् -

"अविदितो विदितं न खलु तदुपाधिव्यवहृतिः
प्रतीतावन्यस्यां प्रसभमनवस्था प्रसरति" इति ।

---

१ बृ.उ. ४।३।९ ।

२ विशिष्टज्ञानस्य विशेषणज्ञानपूर्वकत्वनियमादित्यर्थः । टि.

ततो विज्ञानस्य स्वप्रकाशत्वं सिद्धम् । ततश्चात्रायं पुरुषः स्वयंज्योतिरिति श्रुतिः पुरुषस्य स्वप्रकाशत्वमभिदधातीति विज्ञानविग्रहत्वमप्यभिधत्ते इति स्थितम् ।

ननु क्षणभङ्गुरज्ञानविग्रहत्वं नित्यस्य पुरुषस्यानुपपन्नमितिचेन्न, ज्ञानस्य क्षणभङ्गुरत्वासिद्धेः, तद्विनाशप्रतीतिस्तु घटाकाशादिविनाशप्रतीतिवदौपाधिकत्वेनाप्युपपत्तेः । ततो विज्ञानविग्रहत्वमात्मनो युक्तम्, प्रतिशरीरं तत्त्वतोभिन्नत्वञ्च पुरुषस्यानुमानादिनावगन्तव्यम् ।तथाहि- विमतानि शरीराणि स्वसंस्थैयात्मवन्ति शरीरत्वात् सम्प्रतिपन्नवत्, जननादीनां प्रतिनियमाच्च पुरुषभेदसिद्धिः तदाहुः-

"जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्य विपर्ययाच्चैव" ति[1] ।

नवाच्यं जननादयः क्षेत्रसमवायिनः क्षेत्रस्य च भेदः प्रसाध्यत इति किं केन सङ्गतमिति, भावानवबोधात्- अयं ह्यस्य भावः, यदि प्रतिशरीरं पुरुषभेदो नाभ्युपगम्येत तर्हि यथैकस्मिन्नेकजीववति देवदत्तशरीरेजातेवा चेष्टावति वा मृते वा जीवोऽपि जातश्चेष्टावान् मृतः किलेति लोको व्यवहरति तथा शरीरान्तरेऽपि तदेव व्यवहरेत्, नचैवमुपलभ्यते व्यवहारः, तस्मात्पुरुषभेदोऽभ्युपेत इति ।

नवाच्यं "एकमेवाद्वितीयमि"[2] त्यादिना पुरुषभेदप्रतिषेधान्नैवमिति, एकमेवाद्वितीयमित्यादेरुपचारार्थत्वेनाप्युपपत्तेः पुरुषभेदप्रतिषेधकत्वायोगात् । यथा ह्यभिन्नदेशकालं तत्त्वमेकमित्युच्यते तथात्मनोऽपि विभुनित्यत्वा-

---

१ सां.का. १८ ।

२ छा.उ. ६।२।१ ।

दभिन्नदेशकाल इत्येकत्वेनोच्यते इति । "अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः"[1] इत्यादि श्रुतिश्च पुरुषभेदोवगम्यते । तस्मादेवमादयुपपत्तेः पुरुषश्चेतनाविग्रहः प्रतिशरीरं तत्त्वतोभिन्न इति स्थितम् ।

सचैवं नानाभूतोपिपुरुषो जडवर्गवत् न कस्यचित् प्रकृतिर्विकृतिश्चेत्याह नासौ तु प्रकृतिर्नचापि विकृतिर्नानापीति । नानापीत्यनेनाशङ्काबीजमुक्तम्, यद्धिनाना तत्कस्यचित्प्रकृतिर्विकृति र्वा दृष्टम्तो यदिपुरुषो नाना स्यात्तर्हि कस्यचित्प्रकृतिर्विकृतिर्वा स्यादिति तामेतामाशङ्कां नानापीतिपदेन द्योतयति, तुशब्द आशङ्कामपनुदति । यद्यपि नाना पुरुषस्तथाप्यसौ न प्रकृतिर्न विकृतिः कस्यचित् नित्यत्वाचायदयं न विकृतिः स्वप्रकाशत्वान्नप्रकृतिरपि, यदि हि स्वप्रकाशस्याप्यस्य प्रकृतित्वमाश्रीयेत् तद्यदिदं विकृतित्वेनाभिमतस्यापि स्वप्रकाशत्वमथवा जडत्वमापद्येत, समानयोरेव प्रकृतिविकृतिभावोपलम्भात्, तस्मान्नपुरुषः प्रकृतिर्विकृतिश्च कस्यचिदित्यास्थेयम् ।

पुरुषस्यदुःखित्वमध्यासनिबन्धनम्

ननु प्रकृतिविकृतिभावा ये तस्यासङ्गस्य पुरुषस्य दुःखादिसङ्गासंभवादहं दुःखीत्यादिव्यवहारस्याकस्मिकत्वप्रसङ्ग इत्याशङ्क्याह - असङ्गोपि सन्नित्यादि वा पुमानित्यन्तेन । अयमभिप्रायः, परिशुद्धचेतन्यविग्रहः प्रकृतिविकृतिभावाद्यतः पुरुषस्तटस्थः परमार्थतोदुःखादिसङ्गरहितोप्यन्तः करणाकारपरिणतप्रकृतितादात्म्यमविविच्य तादात्म्यमविषयां प्रतिपद्यते, ततश्चेतिताध्यासादन्तःकरणवृत्तीनां दुःखादीनां पुरुषधर्माणां च प्रकाशत्वादीनामन्तःकरणेध्यासादहं दुःखीत्यादि व्यवहारी भवतीति ।अविद्या-

---

१ श्वे.उ. ४।५।

नामानित्याशुचिदुःखानात्मवस्तुनि नित्यशुचिसुखात्मख्यातिः[1]। सा च तमोगुणोद्रेकादाविर्भवति, विविक्तयोरपि प्रकृतिपुरुषयोस्तादात्म्यमवभासयति, ततश्चोत्तरेषामस्मितारागद्वेषाभिनिवेशानां क्लेशशब्दाभिधेयानां हेतुरविद्येति गीयते। तथाचोक्तम् - "अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम्" इति[2]। प्रसुप्तत्वादिकञ्चास्मितादिक्लेशानां तत्त्वज्ञानातिशयादिना भवति, तदुक्तम् -

"प्रसुप्तास्तत्त्वलीनानां तनुदग्धाश्च योगिनाम्।
विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम्" इति॥

तस्मादविद्यामूलात्प्रकृतिपुरुषतादात्म्यादेव पुरुषे दुःखित्वादिव्यवहारो यथा तप्तायःपिण्डेऽग्नितादात्म्याद्दाहकत्वादिव्यवहार इति समञ्जसम्।

मुक्तिनिरूपणम्

सतिचैवमखिलानर्थकन्दलीभूताया अविद्यायाः सत्त्वातिशयविशेषाविर्भूतविद्यया विनाशिते यत्पुरुषस्य सहजचैतन्यावस्थानं तन्मोक्षापरपर्यायं निःश्रेयसमित्याह- सत्त्वस्येत्यादिना तद्विदुरित्यन्तेन। स्पष्टोऽर्थः।

नन्वविद्यायास्तमोगुणोद्रेकादाविर्भवतीत्युक्तम्, विद्यया च तमोगुणोद्रेकविलयेऽपि तमोगुणस्य नित्यत्वात्पुनरपि उद्रेकसंभवेनाविद्याविर्भावसंभवान्मुक्तिप्रच्युतिः स्यादिति चेन्न, दृढतमचित्तवृत्तिनिरोधलक्षणयोगबलात्पुनरुद्रेकानुपपत्तेः। तथाचोक्तम् - "स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः"[3] - व्युत्थानसंस्कारेण न बाध्यत इति। तस्मादुक्तलक्षणमेव मोक्षापरपर्यायं पुरुषस्य निःश्रेयसं समञ्जसम्। नन्वसङ्गोदासीनस्य पुरुषस्य बन्धस्व

---

१ योग.सू. २।५ ।
२ यो.सू. २।४ ।
३ यो.सू. १।१६ ।

न सङ्गच्छते कुतो मोक्षो बन्धाभावरूप इतिचेत् - सत्यम्, असङ्गोदासीनस्य पुरुषस्य नैववस्तुवृत्या बन्धमोक्षावुपपद्येते किन्तु प्रकृतेरेव बन्धमोक्षौ पुस्युपपद्येते । तदाह:-

"रूपैः सप्तभिरेवं बध्नात्यात्मानमात्मना प्रकृतिः[1] ।
सैव च पुरुषस्यार्थं विमोचयत्येकरूपेण" इति ।।

अस्यार्थः, धर्माधर्मवैराग्यावैराग्यैश्वर्यानैश्वर्याज्ञानाज्ञानान्यष्टौ प्रकृतिरूपाणि । तत्रज्ञानव्यतिरिक्तैर्धर्मादिभिः सप्तभिरूपैः प्रकृतिरात्मनैवात्मानं बध्नाति । एकरूपेण ज्ञानाख्येन च विमोचयतीति, तदाह:-

"धर्मेण गमनमूर्ध्वं गमनमधस्ताद्भवत्यधर्मेण ।
ज्ञानेनचापवर्गो विपर्ययादिष्यते बन्धः[2]" इति ।।

तदेवं सकलमकलङ्कम्, शिष्टैश्चाभ्युपगमसिद्धान्तेन निर्वाह्यम् ।।१।। ।।२।। ।।३।।

इति श्रीकविकविन्दुश्रीजाणराजविरचितायां
कल्पलतिकायां सांख्यमतसङ्ग्रह
व्याक्रिया ।

---

१ सां.का. ६३ ।

२ सां.का. ४४ ।

अथ वेदान्तमतसङ्ग्रहप्रक्रिया

अथेदानीं पद्यसप्तकेन वेदान्तमतसङ्ग्रहं चिकीर्षुस्तत्प्रतिपाद्यमर्थं प्रथमपद्येन प्रतिजानीते -

अथपरमरहस्यं सर्वशास्त्रेषु सारं
    प्रभवति चरितार्थो यत्र वेदान्तवादः ।
इदमहमभिधास्ये ब्रह्मजिह्मापनुत्यै
    भवगलभिगतां लक्षणान्यातनस्व ॥१॥

कल्पलतिका

सिद्धान्तरूपमिदं दर्शनम्

अस्यार्थः, अथेदं ब्रह्म अहमभिधास्ये निरूपयिष्यामि । अथशब्देन पूर्वोक्त-दर्शनापेक्षयाऽस्य दर्शनस्य सिद्धान्तत्वं द्योतयति ।

ननु पूर्वोक्तान्यपि दर्शनान्यन्यापेक्षया सिद्धान्तरूपाण्येव, तत्किमित्यस्यैव दर्शनस्यान्यापेक्षया सिद्धान्तत्वमथशब्देन द्योतयतीति चेत् - उच्यते, वैशेषिकादीनि दर्शनानि खलु स्वपक्षसाधनप्रयोगपुरस्कारेणैव प्रवर्तन्ते वेदान्तमतं पुन परपक्षदूषणपुरस्कारेणैव प्रवर्तते,[1] स्वपक्षसिद्धिस्तु परिशेषादेव

---

१ इत्यापाततो नेतिनेतीतिश्रुत्यनुसारम्, वस्तुतस्तु 'अथातो ब्रह्मजिज्ञासा' इत्यादि शारीरकमीमांसासूत्रप्रणयतो महर्षेर्बादरायणस्य तथामतमिति न प्रतीयते, अन्यथा प्रथमाध्याये श्रुतिसमन्वयेन स्वरूपनिरूपणमपार्थकं स्यात्। निबन्धग्रन्थकर्तृष्वात्मनो वैतण्डिकत्वं ख्यापयन्तोऽपि खण्डनकृत् उपोद्घाते(अद्वैतवादसिद्धान्तं निरूपयन् । उक्ताधिकारिणां स्वपक्षनिरूपणं पर्याप्तमिति द्योतनाय 'उपपादनञ्च स्वपक्षसाधनपरपक्षदूषणाभ्यां भवती'ति कण्ठतस्त्वाभिदधत् अद्वैतसिद्धिकृतः स्वपक्षसाधनस्याप्यावश्यकत्वमिति बादरायणीयमेव मतं पोषयन्ति । एवञ्च परपक्षदूषणपुरस्कारेणैव प्रवृत्तिरिति कथनस्य युक्तायुक्तत्वालोचने विद्वांस एव प्रमाणम् । टि.

तत्र वितण्डा प्रधानत्वात्तद्दर्शनस्य, वितण्डायां हि स्वपक्षासिद्धिः पक्षिणा-देवावदाति । तथाहि- त्वया समर्थनीयं मया खण्डनीयमित्येवं सम्बन्धात्प-रिशिष्टाद्येन स्वपक्षासिद्धिमभिप्रेत्य यत्रान्यतरः प्रवर्तते कथायां सा वितण्डे-ति । अस्यार्थस्तु प्रागेव विवृतः[1]। तस्मादथशब्देन पूर्वोक्तदर्शनापेक्षयास्य दर्शनस्य परपक्षदूषणप्रधानतया सिद्धान्तत्वमेव द्योतयतीत्येवं व्याख्या ज्यायसी ।

इदं ब्रह्माहमभिधास्य इत्युक्तम्, तत्र किमिदमित्यपेक्षायामाह प्रभवती-त्यादि यत्र वेदान्तवाद इति मीमांसापरपर्यायो वेदान्तवाक्यविचारश्चरि-तार्थः प्रभवति । यदुद्देशेनाथातो ब्रह्मजिज्ञासेत्यादि मीमांसाप्रवृत्ता तद्ब्रह्माह-मभिधास्य इति भावः । इतरशास्त्रापेक्षया वेदान्तवादस्यातिशयविशेषमाह परमरहस्यं सर्वशास्त्रेषु सारमिति । वैशेषिकादि सर्वशास्त्रेषु मध्ये परमर-हस्यं दुर्विवेकत्वादतिगहनं सारं प्रधानं वेदान्तवाद इत्यर्थः । सारमिति निय-तलिङ्गपदं विलिङ्गेनापि वेदान्तवाद इति पदेन विशेषणतयान्वेतुमुचितं भवति, नियतलिङ्गानां पदानां विलिङ्गपदैरपि विशेषणतया सम्बन्धो-पलम्भात्, यथा -

"सारं सारङ्गनयना तावल्लोचनगोचरः ।
यावद्विष्णुपदद्वन्द्वं मुक्तिहेतुर्न चिन्तितम्" ।। इति ।

कथं पुनर्ब्रह्माभिधेयमित्यपेक्षायामुक्तं लक्षणान्मानतश्चेति । जन्माद्यस्य यत इति सूत्रानुसारेण वक्ष्यमाणलक्षणान्मानतश्चेति यथोक्तलक्षणे ब्रह्मणि किं प्रमाणमित्यपेक्षायां शास्त्रयोनित्वादिति सूत्रानुसारेण वेदान्तवाक्यान्येव तत्र प्रमाणमिति वक्ष्यमाणप्रमाणादिति भावः ।

---

१ न्यायमतप्रक्रियायाम् । टि.

एवंविधब्रह्माभिधाने फलमाह- जिह्मीपनुत्त्यै भवजलधिगतानामिति संसारिणामविद्यापटललक्षणकुटिलविघटनायेति यावत् । लक्षणादिना हि ब्रह्माभिधानेन ब्रह्मतत्त्वज्ञानादविद्यानिवृत्तिः फलं सम्पद्यते । ततश्चायमेतत्पद्यप्रतिपाद्यार्थसङ्ग्रहः । लक्षणप्रमाणाविरोधसाधनफलाख्यप्रकारपञ्चकेन ब्रह्माभिधास्य इति ॥१॥

ब्रह्मणो लक्षणादिकम्

एवं लक्षणादिना ब्रह्माभिधानं प्रतिज्ञायेदानीं तल्लक्षणमाह-

जननविलयवृद्ध्याद्यस्य लोकस्य यस्मात्
तदमलसुखरूपं ब्रह्म चिद्रूपमेकम् ।
श्रुतिगदितमितीदं लक्षणम् ...
.... ॥२॥

कल्पलतिका

स्वरूपलक्षणञ्चीकम्, तथाहि- अस्य लोकस्य जननविलयवृद्ध्यादि यस्मात्तद्ब्रह्मेत्येतावत्तटस्थलक्षणम् । अस्येति प्रत्यक्षादिव्यावहारिकप्रमाणसिद्धस्येत्यर्थः । यस्मादिति पञ्चमी यच्छब्दवाच्यस्योपादानत्वं द्योतयति। ततश्चैवं लक्षणार्थः सम्पन्नः, अस्य प्रत्यक्षादिव्यावहारिकप्रमाणसिद्धस्य लोकस्येति जगतो जन्मस्थितिप्रलयापचयापक्षयविपरिणामा यस्मादुपादानाद्भवन्ति तद्ब्रह्मेति । न च शून्यमेवास्योपादानमित्यर्थान्तरमिति वाच्यम्, "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः"[१] इत्यादिश्रुत्यास्य लोकस्य सन्मूलत्वप्रतिपादनात् । "असद्वा इदमग्र आसीद्"[२] इत्यादि

---

१ छा.उ. ६।८।४ ।

२ छा.उ. ६।२।१ ॥

श्रुतीनां पुनरव्याकृतसत्कारणविषयतयाप्युपपत्तिः । अन्यथा "तदैक्षत बहु स्यां प्रजायेय[1] ", "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते[2] " इत्यादि सत्कारणवादानुकूलबहुश्रुतिव्याकोपप्रसङ्गात् । किञ्च शून्यमेवास्य लोकस्योपादानमिति वदन्तः प्रष्टव्याः, किं केवलस्य तस्योपादानत्वमन्यसचिवस्य वा? नाद्यः, केवलस्य कारणत्वासम्प्रतिपत्तेः, तन्नित्यतया सर्गस्य कादाचित्कत्वाद्यनुपपत्तिप्रसङ्गाच्च । अस्मन्मते पुनरचिन्त्यसामर्थ्यानिर्वाच्याविद्यासचिवस्य ब्रह्मणः कारणत्वान्न सर्गस्य कादाचित्कत्वादिदोषप्रसक्तिः ।

अथान्यसचिवस्यैव शून्यस्योपादानत्वमित्युक्तः पक्षः सोऽप्यसाधुः, सर्गात्पूर्वं शून्यादन्यस्यासंप्रतिपत्तेः । अथ त्वन्मत इव मन्मतेऽप्यविद्यानादिरस्तीति सर्गात्प्रागपि तत्संभवात्तत्सचिवं शून्यमुपादानमस्य लोकस्येति चेत् - न, तन्मतेऽविद्यायाः साधकानुपपत्तेः, न तावच्छून्यमेवाविद्यायाः साधकं बाधकाभावम् । अप्रकाशत्वात्तस्य, नाप्यविद्या स्वप्रभत्वेन सिद्धा, अविद्यात्वव्याघातात् ।

नापि प्रमाणं तत्साधकम्, बाधकाभावप्रसङ्गात्, शून्यपदोत्विदंशहीनस्य प्रमाणसाधकत्वानुपपत्तेश्च, तस्माच्छून्यकारणवादस्यानुपपन्नत्वान्नशून्येनार्थान्तरता यथोक्तब्रह्मलक्षणस्येति सिद्धम् ।

नापि परमाणुभिरर्थान्तरता, तेषां जगदुपादानत्वानुपपत्तेः । यत्र हि यत्समवेतमुत्पद्यते तत्तदुपादानम्, नच जगत्परमाणुसमवेतमुत्पद्यते, तथासति परमाणुसमवेतरूपादेरिव जातोऽप्रत्यक्षत्वप्रसङ्गात् ।

किञ्च परमाणूनां जगदुपादानत्वे 'यस्मिन् विशति सर्वमिदं विशतं

---

१ छा.उ. ६।२।३ ।
२ तै.उ. ३।६ ।

भवती[१]"ति जगदुपादानविज्ञानेन सर्वविज्ञानप्रतिज्ञाव्याकोपः प्रसज्यते, तद्विज्ञानेपि निमित्तकारणाविज्ञानात्। अस्मन्मते पुनर्जगदुपादानस्यैव जगन्निमित्तत्वात्, ततोऽन्यस्य तटस्थवस्तुनोऽभावाच्च तद्विज्ञाने सर्वविज्ञानप्रतिज्ञोपपद्यते। "यं वै सोम्यैतमणिमानं न निभालयसे एतस्यैव सौम्यैषोऽणिम्न एवं महान्यग्रोधस्तिष्ठति श्रद्धत्स्व सोम्ये[२]"ति छन्दोगश्रुतिर्ब्रह्मपरतयाप्युपपद्यते न परमाणुकारणपरत्वम्। "स एष अणिमा ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो[३]" इति ब्रह्मण्यणिमशब्दप्रयोगदर्शनात्। ततो न परमाणुभिरप्यथान्तरता ब्रह्मलक्षणस्येति सिद्धम्।

तदैक्षत बहु स्यां प्रजायेयेत्यादि श्रुतिर्न प्रधानेनापि जडेनार्थान्तरता। किञ्च सर्गात्प्राग्गुणत्रयसाम्यात्मकप्रधानस्य सर्गकाले गुणवैषम्यं न तावत्पुव्यापारात्पुंसोऽकर्तृत्वेन व्यापारवत्त्वानुपपत्तेः। नापि कर्मभ्यस्तेषां प्रसुप्तत्वात्। न च मिथ्याज्ञानं रागादयो वा कर्मोद्बोधं गुणवैषम्यं वा तदा विदध्युः, तदानीं मनसोऽनुत्पन्नत्वेन तद्वृत्तीनां तेषामसंभवात्। तदाहुर्भट्टपादा अपि-

"पुमानकर्ता येषां तु तेषामपि गुणैः क्रिया।
अयमादौ भवेत्तत्र कर्म तावन्नविद्यते ॥
मिथ्याज्ञानं न तत्रास्ति रागद्वेषादयोपि वा।
मनोवृत्ति हि सर्वेषां न चोत्पन्नं मनस्तदे[४]"ति ॥

एवं तच्छ्रुतिन्यायपर्यालोचनया यथोक्तब्रह्मलक्षणस्यान्यैरप्यथान्तरता निराकरणीया।

---

१ मुण्ड.उ. १।३ ।
२ छा.उ. ६।१२।२ ।
३ छा.उ. ६।१२।३ ॥
४ श्लो.वा. स.दीप.प. ८७-८८ ।

ब्रह्मणः स्वरूपलक्षणन्तु अमलघुत्व स्वरूपं चिद्रूपमेकमित्यनीकम् । शुद्धानन्द ज्ञानस्वरूपं ब्रह्मेति स्वरूपलक्षणार्थः । तथाच श्रुतिः "विज्ञानमानन्दं ब्रह्म"[1] इत्यादि । ननु क्षणभङ्गुरं विज्ञानं कथं नित्यस्य ब्रह्मणो रूपं भवेदितिचेत् - न, सांख्यप्रक्रियायामुक्तोत्तरत्वात् । ननु भवतु विज्ञानरूपत्वं ब्रह्मणस्तथाप्यानन्दस्य दुःखाभावरूपत्वात्तद्रूपत्वं ब्रह्मणो न युक्तमिति ब्रह्मण्यानन्दश्रुतिरुपचरितार्थेतिचेत् - न, दुःखाभावमन्तरेणाप्यानन्दस्य श्रुतिभासमानत्वाद्भावरूपत्वोपपत्तौ ब्रह्मणो मुख्यवृत्त्यानन्दरूपत्वोपपत्तेस्तत्रानन्दश्रुतेरुपचरितार्थताया वक्तुमशक्यत्वात् । तस्मादानन्दमित्यादिश्रुतेरानन्दरूपत्वं ब्रह्मणो युक्तम् । तथाच प्रयोगः - आत्मा तावदानन्दरूपः परप्रेमास्पदत्वात् यन्नैवं न तदेवं यथा घट इति । ननु भवतु परःप्रेमास्पद आत्मा तथाप्यानन्दस्वरूपो मा भूत्, किंबाधकमितिचेत् ? आत्मगोचरप्रेम्णः सातिशयत्वप्रसङ्गो बाधक इति ब्रूमः ।

नचात्मगोचरात्प्रेम्णोऽधिकः किञ्चिद्विषयः प्रेमास्ति यदपेक्षयात्मगोचरः प्रेमा सातिशयः स्यादिति न तस्य सातिशयत्वप्रसङ्गो दूषणमित्युच्येत । लौकिकमपि सुखमात्मार्थत्वेव प्रेमगोचर इति तद्विषयः प्रेमानात्मगोचरप्रेम्णोऽधिको यद्विषयदर्शनतया प्रेमगोचरस्तद्विषयप्रेम्णो न्यूनप्रेमगोचरो यथा लौकिकसुखार्थतया प्रेमगोचरात्कलत्रादेः लौकिकं सुखम् । तत आत्मगोचरः प्रेमा सर्वेभ्योऽपि पुत्रमित्रकलत्रादिप्रेमभ्योऽधिको निरतिशयश्चाभ्युपगन्तव्यः । तथाच श्रुतिः - "आत्मनस्तु कामाय सर्वं प्रियं भवति"[2] इति तत आत्मनोऽनानन्दत्वे तद्विषयप्रेम्णः सातिशयत्वप्रसङ्गो बाधकस्तर्कः सिद्धः । तस्मात्परप्रेमास्पदत्वादात्मानन्दरूपत्वास्थैर्यः ।

---

१ बृ.उ. ३।९।२८ ।

२ बृ.उ. २।४।५ ।

आत्मा च ब्रह्म, अयमात्माब्रह्मेत्यादिश्रुतिः । तेन परप्रेमास्पदत्वेनात्मन आनन्दरूपत्वसिद्धे ब्रह्मैवानन्दरूपं सिद्धं भवति, एतदेव स्फोरयति एकमिति। नन्वस्यात्मनो ब्रह्मणैकत्वे संसारित्यादिव्यवस्था नोपपद्यते इतिचेत्- न, औपाधिकभेदेनापि तदुपपत्तेः । यथा खलु कर्णशष्कुल्यवच्छिन्नस्य नभसस्तत्त्वतः परमनभसैक्येपीन्द्रियत्यादि व्यवस्था कर्णशष्कुल्युपाधिनिबन्धना तथैवास्यात्मनो ब्रह्मणैक्येपि संसारित्यादिव्यवस्थातत्कारणोपाधिनिबन्धनोपपद्यते । तस्माद्विशुद्धानन्दविज्ञानरूपमेकं ब्रह्मेति ब्रह्मणः स्वरूपलक्षणं साधीयः । तदेवं जन्मविलयवृद्ध्यादीत्यादिना पूर्वार्धेन ब्रह्मणस्तटस्थलक्षणं स्वरूपलक्षणञ्चोक्तम् ।

निरुक्तलक्षणस्य प्रामाण्यम्

इदानीं यथोक्तलक्षणद्वयस्यासंभवाशङ्कानिराकरणाय प्रामाणिकत्वमाह श्रुतिगदितमितीदं लक्षणमिति । इतीत्थं प्रकारमिदं लक्षणं श्रुतिगदितं श्रुत्युक्तमित्यर्थः, तथाहि- "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति"[1] इत्यादिश्रुतिर्यथोक्तं ब्रह्मणस्तटस्थलक्षणमाचष्टे, विज्ञानमानन्दं ब्रह्मेत्यादि श्रुतिः स्वरूपलक्षणम् ।

स्यादेतत् यदि विज्ञानमानन्दमित्यादि श्रुतिवचसां सिद्धरूपेणाभिमते ब्रह्मणि प्रामाण्यं सङ्गच्छेत, नैतदस्ति, साध्यार्थविषयत्वाच्छब्दप्रमाणं भवेत्तदा वेदान्तानां सिद्धे ब्रह्मणि- अप्रमाणम्, नैतदस्ति, 'पुत्रस्ते जात' इत्यादि शब्दप्रमाणस्य सिद्ध विषयत्वस्यापि दर्शनात् । ततश्च यथा पुत्रस्ते जात इत्यादिवचसां सिद्धार्थे समन्वयदर्शनात्प्रामाण्यम्, एवं वेदान्तानामपि सिद्धरूपे ब्रह्मणि समन्वयदर्शनात्प्रामाण्यमास्थेयम् ।

---

१ तै.उ. ३।१ ।

ननु वाच्यं शाब्दप्रामाण्यस्य पदार्थसंसर्गनिष्ठत्वमन्यान्वितप्रधानपदार्थनिष्ठत्वं वेति स्थिते वेदान्ताख्यशाब्दप्रामाण्यस्याखण्डैकरसब्रह्मनिष्ठत्वमिति, "प्रकृष्टःप्रकाशः सविता" "सोऽयं देवदत्त" इत्यादि वाक्यानामखण्डार्थपरत्वस्यापि दर्शनात् - शाब्दं प्रमाणमिति तेन पदार्थसंसर्गनिष्ठं वाऽन्यान्वितप्रधानपदार्थनिष्ठं वेति निश्चयानुपपत्तिः, ततो वेदान्ताख्यशाब्दप्रमाणस्य विज्ञानमानन्दमित्येवमादेस्तद्वदेवाखण्डैकरसनिष्ठत्वोपपत्तौ न कश्चिद् दोषः ।तथाच प्रयोगः, विज्ञानमानन्दं ब्रह्मेत्यादिलक्षणवाक्यमखण्डार्थनिष्ठं लक्षणवाक्यत्वात् प्रकृष्टः प्रकाशः सविता इत्यादिवाक्यवत् । तथा तत्त्वमस्यादिवाक्यमखण्डार्थनिष्ठमकार्यकारणद्रव्यनिष्ठत्वे सति समानाधिकरणत्वात् सोऽयं देवदत्त इत्यादिवाक्यवदिति । नचानुमानद्वयेऽपि साध्यविकलो दृष्टान्त इति वाच्यम्, तत्राखण्डसवितृप्रातिपदिकार्थमात्रबुभुत्सुंप्रति हि प्रकृष्टः प्रकाशः सवितेति प्रतिवचनमुच्यमानं बुभुत्सिताखण्डार्थस्यैव प्रतिपादकम् । अन्यथाऽनवधेयवचनतापत्तेः । तथा परंप्रति तद्देशकालोपलक्षितस्य देवदत्तस्वरूपस्याखण्डस्य स्वयं प्रत्यभिज्ञातस्य प्रतिपादकं सोऽयं देवदत्त इति वाक्यम्, अन्यस्यार्थस्य परेणाप्रतिपित्सितत्वात् । तस्मात्प्रकृष्टः प्रकाशः सविता सोऽयं देवदत्त इत्यादिवाक्यमखण्डार्थनिष्ठमिति स्थितौ तद्दृष्टान्तावष्टम्भेन वेदान्तवाक्यानां विज्ञानमानन्दमित्येवमादीनामखण्डार्थनिष्ठत्वं स्थितम् ।

नन्वनेकपदानामखण्डार्थनिष्ठत्वे घटकलशादिशब्दवत्पर्यायत्वप्रसङ्गेन सहप्रयोगो न स्यादिति चेत् - मैवम्, व्यवच्छेद्यभेदेन तदुपपत्तेः, तथाहि-प्रकृष्टः प्रकाशः सविता इत्यत्र तावत्प्रकृष्टपदमप्रकृष्टचन्द्रादिव्यावृत्त्या, प्रकाशपदञ्च सन्तमसादिव्यावृत्त्या सवितृप्रातिपदिकार्थमात्रपर्यवसायीति न पर्यायत्वप्रसङ्गः स्यादित्युक्तिः, सोऽयं देवदत्त इत्यादिष्वपीयमेव दिगनुगन्तव्या । तस्माज्जगज्जन्मादिहेतौ विज्ञानानन्दरूपे ब्रह्मण्यखण्डैकरसे सिद्धरूपे वेदान्तानां प्रामाण्यसंभवान्न पूर्वोक्ते ब्रह्मणि लक्षणद्वयमसंभवीति सिद्धम् । ।२।।

अतात्त्विकस्यापि तात्त्विकसाधकत्वम्

इदानीं जगज्जन्मादि हेतुत्वं ब्रह्मणस्तदस्थलक्षणमक्षममाणस्य पूर्वपक्षिणोऽभिप्रायमाशङ्कते -

ननु कथय किमेतद् ब्रह्म निस्सङ्गमेकं
रचयति जगदेतत् किंस्विदन्येन सकम् ।
प्रथममिह न वाच्यं तादृशोऽकारणत्वा-
च्चरममपि च न स्यादद्वयत्वप्रकोपात् ॥३॥

कल्पलतिका

स्पष्टोऽन्वयः, अयमभिप्रायः - एतद्विज्ञानानन्दलक्षणमेकमिस्यखण्डं ब्रह्म किं निस्सङ्गं सदेतत्परिदृश्यमानं जगद्रचयति किं स्विदन्येन सकम् । नाद्यः, केवलस्य कारणत्वानुपपत्तेः, अपरथा केवलस्य कारणत्वे सामग्र्यन्तरापेक्षाया अभावात्कार्यस्य कादाचित्कत्वभङ्गप्रसङ्गात् । न द्वितीयः, ब्रह्मणोऽन्यसम्बन्धेऽपि जगत्कारणत्वेऽद्वैतवादभङ्गप्रसङ्गादिति ॥३॥

अत्र द्वितीयं विकल्पमङ्गीकृत्य तद्दूषणं परिहरति-

इदमिहकथनीयं सत्यमन्येनसकं
रचयति जगदेवं नीद्वयत्वप्रकोपः ।
सदसदुभयभिन्ना विषया तस्य सङ्गे
नहि भवति विरोधस्तात्त्विकाद्वैतयुक्तेः ॥४॥

कल्पलतिका

अयं भावः, न ब्रह्म केवलं सज्जगत्कारणमिति ब्रूमः । किन्तु सदसदादिप्रकारानिर्वाच्याविद्यासचिवं ब्रह्म जगत्कारणमिति ।नचैवं सत्यद्वैत-

व्याकोपः, नहि वयं सर्वथाद्वैतमाचक्ष्महे किन्तु तात्त्विकमद्वैतम् ।

नचानिर्वाच्याविद्याभ्युपगमे तात्त्विकाद्वैतयुक्तिव्याकोप इति, स्यादेतत्प्रपञ्चस्यापि पुनः प्रत्यक्षादिप्रमाणसिद्धत्वेन तात्त्विकत्वात्कथं न तात्त्विकाद्वैतयुक्तिव्याकोप इतिचेन्न, मैवं वोचः, प्रत्यक्षादिप्रमाणसिद्धत्वेपि प्रपञ्चस्य चन्द्रप्रादेशिकत्वादेरिव तात्त्विकत्वाभावात् । न हि प्रत्यक्षादिप्रमाणं तत्त्वावेदकम्, एकमेवाद्वितीयमित्याद्यागमेन बाधितविषयत्वात् । किन्तर्हि ? व्यावहारिकविषयम् । तेन प्रपञ्चस्यातात्त्विकत्वेपि प्रत्यक्षादिप्रमाणसिद्धत्वोपपत्तेस्तात्त्विकाद्वैतयुक्तिव्याकोपः । तदाह:-

"प्रत्यक्षादिप्रमाणानां प्रामाण्यं व्यावहारिकम् ।
आश्रित्यायं प्रपञ्चः स्यादलीकोपि प्रमाणवानिति ।।

नन्वद्वैतागमस्यापि प्रमाणत्वाविशेषेण व्यावहारिकविषयत्वापत्त्या तद्विषयस्याद्वैतस्यापि न तात्त्विकत्वं प्रपञ्चवदितिचेन्न, न- अद्वैतागमवाक्यस्य प्रमाणत्वेपि प्रत्यक्षादिप्रमाणवत्प्रमाणान्तरबाधित विषयत्वाभावात्तद्विषयस्याद्वैतस्य तात्त्विकत्वोपपत्तेः । तदाह:-

"अद्वैतागमवाक्यं तु तत्त्वावेदकलक्षणम् ।
प्रमाणभावं भजतो बाधवैधुर्यहेतुतः ।। " इति ।

तद्यथा ज्योतिःशास्त्रादिबाधितविषयं चन्द्रप्रादेशिकत्वादिग्राहकं प्रत्यक्षादिप्रमाणं न तत्त्वावेदकम् । ज्योतिःशास्त्रन्तु प्रमाणान्तरबाधितविषयत्वाभावात्तत्त्वावेदकमिति, तथाऽद्वैतग्राहकप्रत्यक्षादिप्रमाणमद्वैतागमबाधितविषयं न तत्त्वावेदकम् । अद्वैतागमस्तु प्रमाणान्तरबाधितविषयत्वाभावात्तत्त्वावेदक इति तद्विषयस्तात्त्विकमद्वैतमिति सिद्धम् ।

नन्वादित्यो यूप इत्याद्यागमस्येवाद्वैतागमस्य प्रत्यक्षादिप्रमाणविरु-
द्धार्थाभिधायित्वादतात्त्विकस्य स्वार्थपरत्वमिति चेत् -उपक्रमोपसंहारादि
षड्विध तात्पर्य लिङ्गोपेतत्वात्मक तात्त्विक स्वार्थपरत्वोपपत्तेः । तथाहि-
एकमेवाद्वितीयमित्याद्युक्तेनोपक्रम ऐतदात्म्यमिदं सर्वमित्याद्युक्तेनोपसंहारस्त-
त्त्वमसीत्यादि अद्वैताभ्यासः ।

उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् ।

अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये ॥

प्रत्यक्षादिप्रमाणागोचरत्वाद्वैतस्यापूर्वत्वम् । 'तरति शोकमात्मवित्'[1] इत्यादि फलम्, तदैक्षत बहु स्यां प्रजायेयेत्यादि अर्थवादः- यथा 'सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्'[2] इत्याद्युपपत्तिरित्यद्वैतागमस्य तात्पर्य-लिङ्गानि श्रूयन्ते । आदित्यो यूप इत्यादिस्तु न तात्पर्यलिङ्गोपेतत्वमिति न तात्त्विकस्वार्थपरत्वम् तस्मात्प्रत्यक्षादिप्रमाणैरिवाद्वैतागमबाधितविषयमिति न तद्विषयस्तात्त्विक इति नाद्वैतागमसिद्धस्याद्वैतस्य तात्त्विकत्वयुक्तिर्व्या-घात इति सिद्धम् ॥४॥

सर्वस्यापि प्रपञ्चस्यातात्त्विकत्वेऽनिष्टमाशङ्कते -

ननु यदि सकलोऽपि स्यादसत्यः प्रपञ्चः

श्रुतिरपि सकला स्यात्तर्हि मिथ्यात्मिकैव ।

इति च सति कथं स्याद्ब्रह्मणीयं प्रमाणं

नहि भवति मृषा यत्कुत्रचित्तत्प्रमाणम् ॥५॥

कल्पलतिका

स्पष्टोऽन्वयः । अस्यायमाशयः यदि सर्वोऽपि प्रपञ्चोऽतात्त्विकः-स्यात्तर्हि श्रुतिरपि सर्वा तथा स्यात्प्रपञ्चान्तःपातित्वात् घटादिवत्,

---

१ छा.उ. ७।१।३ ।

२ छा.उ. ६।१।४ ।

सतिचैवमप्येकमेवाद्वितीयमित्यादि श्रुतिर्ब्रह्मणिप्रमाणं न भवेन्मिथ्यात्वात्, यन्मिथ्या तत्कुत्रचित्प्रमाणं न भवति यथा स्वप्नपरिदृष्टधूमादीति ॥५॥

परिहरति -

इह परिहृतिरेवं यद्यपीयं मृषा स्या-
तदपि भवति मानं सा श्रुतिर्ब्रह्मणीति ।
भवति हि शशिविम्बे सत्यरूपेप्यसत्यं
जलगतशशिविम्बं सूचकत्वेन मानम् ॥६॥

कल्पलतिका

अतात्त्विकप्रपञ्चान्तःपातित्वादप्येकमेवाद्वितीयमित्यादिश्रुतिर्मिथ्या स्यात्, भवतु कामम् । तदपीति तथा सा श्रुतिरेकमेवाद्वितीयमित्यादि लक्षणाद्ब्रह्मणि प्रमाणं भविष्यतीति परिहारार्थः । भवति हीत्यादि हेतुग्रन्थः ।

अयमर्थः, हि यस्मात्कारणात्सत्यरूपेपि शशिविम्बे जलगतशशिविम्बमसत्यमपि सूचकत्वेन मानं भवतीति ।

नचात्र जलगतशशिविम्बज्ञानमेव स्वरूपतः सत्यं, सत्यशशिविम्बे सूचकत्वेन मानं न पुनर्जलगतशशिविम्बमसत्यमिति । केवलज्ञानस्य तत्र मानत्वेति प्रसङ्गात्, विषयावच्छिन्नस्य प्रमाणतायां विषयस्यापि प्रमाणत्वस्यावर्जनीयत्वात् । तस्मान्मिथ्यात्मिकाया अप्येकमेवाद्वितीयमित्यादिश्रुतेर्ब्रह्मतत्त्वे प्रामाण्ये न काचन दोषकणिकेति । तेनैतदपास्तम् - यदाहुः -

अद्वैते प्रमाणमस्ति चेदद्वैत व्याहतिः प्रमाणस्यैव द्वितीयत्वात् । नास्ति चेदप्रामाणिकमद्वैतमापतेदिति । विद्यमानस्यापि प्रमाणस्य स्वरूप-तोऽसत्त्वाभ्युपगमादुक्तदोषाप्रसङ्गात् । तस्मादद्वैतमेव तात्त्विकं न प्रपञ्च इत्यभ्युपगमेन दोषलेशावकाशोऽपीति सिद्धम् ॥६॥

जीवत्वमनाद्यविद्योपाधिनिबन्धनम्

ननु "द्वा सुपर्णा सयुजा सखाया समानं वृक्षं[1] परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीति" । तथा द्वे ब्रह्मणी वेदितव्ये परं चापरमेव चेत्यादि श्रुतिर्जीवब्रह्मणोर्भिन्नत्वावगमाद् ब्रह्मवज्जीवोऽपि तात्त्विको द्वितीय इति कथमद्वैतमेव तात्त्विकमित्याशङ्क्य जीवस्य वस्तुवृत्त्या ब्रह्मस्वरूपस्यैवानाद्यविद्योपाधिवशाद् भिन्नत्वादिकं प्रसङ्गान्मोक्षलक्षणं[2]-चाह-

जीवस्तावदनादिरेव तमसोऽनादेरुपाधेः सं
तद्धर्मैस्तु तथा तथैव भवति ब्रह्मस्वरूपोऽपि सन् ।
मोक्षस्तत्त्वमसीति वाक्यकलनान्मोक्षस्त्वविद्याक्षयः
स संसार उदाहृतेति गदितो[3] वेदान्तवादः स्फुटः ॥७॥

कल्पलतिका

जीवस्तावद् ब्रह्मस्वरूपः सन्नपि अनादिस्तमस उपाधिरनादिस्तद्धर्मैस्तु तथा तथैव भवतीत्यन्वयः । अयमभिप्रायः अयमात्मा ब्रह्मेत्यादि तात्पर्यवच्छ्रुति-भ्यस्तात्त्विको ब्रह्मस्वरूप एव जीवो न तु ब्रह्मणो भिन्नस्तात्त्विको येन कथम-द्वैतं तात्त्विकमित्याशङ्क्येत तथापि लिङ्गशरीराद्याकारपरिणततमः शब्दाभि-

---

१ मुण्ड. ३।१।१ ।
२ मोक्षलक्षणमिति मु. पु. दृश्यते स न प्रकृतानुकूल इति स्वारोऽपसारितः । टि.
३ निगदित इति मु. पु. छन्दोभङ्गभयाद् गदित इत्येव स्थापितः । टि.

धियानाद्यविद्योपाधिवशादनादिकालं ब्रह्मणो भिन्नो भवति । लिङ्गशरीर-
धर्मैः पुनस्तत्तल्लोकान्तरसंसारकर्मफलशालित्वादिभिः स्वयमपि लोकान्तरस-
ञ्चारकर्मफलशालीव भवति । तथा लिङ्गशरीरमुपक्रम्योक्तम् - "तदुपहितो-
सौ लोकान्तरं देहान्तरं रोहति तल्लग्नधर्माधर्मफलञ्च तत्र भुङ्क्ते इति"
तत्त्वदर्शिभिरिति[1] ।

ननु लिङ्गशरीरस्य महाप्रलयादावभावात्कथमनादित्वमिति चेत् - न,
महाप्रलयेऽपि सूक्ष्मशक्त्यात्मनावस्थानाङ्गीकारात्, यथोक्तं देवताधिकरणे
वाचस्पतिमिश्रैः - "यद्यपि महाप्रलये नान्तःकरणादयः समुदाचरद्वृत्तयः
सन्ति तथापि स्वकारणेऽनिर्वाच्यायामपि विद्यायां लीनाः सूक्ष्मेण शक्तिरूपेण
कर्मविदीपिका विद्यावासनाभिः सहावतिष्ठन्त एवेति[2]" च वाच्यम् ।
नन्वन्तःकरणादीनां महाप्रलये सूक्ष्मशक्त्यात्मनावस्थानमुक्तं न तु लिङ्ग-
शरीरस्येति - अन्तःकरणादीनां लिङ्गशरीरतो भेदाभावात्, तथा चोक्तम्-
प्राणादिपञ्चकं भूतसूक्ष्मपञ्चकं कर्मेन्द्रियपञ्चकमन्तःकरणमविद्याकामकर्मेति
पुर्यष्टकमेतदेव जीवबन्धनमागमप्रसिद्धमिति । तस्मादनाद्यविद्योपाधिनिब-
न्धनो जीवभिन्नत्वादिव्यवहार इति सिद्धम् । एवं जीवस्य ब्रह्मस्वरूपतया
नित्यमुक्तस्याप्यविद्याकृतब्रह्मभिन्नत्वादिव्यवहारहेतुं निरूप्य सर्वथा तात्त्विक-
मद्वैतमिति स्थापितम् ।

मिथ्याज्ञानतत्त्वज्ञानयोरयथार्थत्वेऽपि निवर्त्यनिवर्तकभावोपपत्तिः

नन्वेवं सति तात्त्विकस्य मोक्षस्यासंभवाद्ब्रह्मस्वरूपस्य च तात्त्विकस्य
नित्यतया हेतुत्वानुपपत्तेरन्यथा बन्धस्यैवासंभवप्रसङ्गादतात्त्विकस्य च कस्यचित्क-
मादेरपि प्रत्युत अहेतुत्वादनिर्मोक्षप्राप्तौ मोक्षशास्त्राप्रामाण्यप्रसङ्गस्तत-

---

१ तत्त्वदर्शिनि इति यथाश्रुतपाठस्यानन्वयादुक्तमित्येनान्वयानुरोधान्तृती-
यान्तत्वम् । टि.

२ भामती १।३।३० ।

स्तात्त्विकं ब्रह्मणोऽन्यत्किञ्चिन्मोक्षसाधनमास्थेयमिति न सर्वथा तात्त्विक-
मद्वैतमित्याशङ्क्याह - मोक्षस्तत्त्वमसीतिवाक्यकलनादिति । वाक्यजनित-
कलनं-वाक्यकलनं, वाक्यार्थपरिज्ञानं तस्मात्तत्त्वमसीतिवाक्यार्थपरिज्ञानान्मो-
क्षो भवतीत्यर्थः ।

इदमाकूतम् - तत्त्वमसीति वाक्यार्थ परिज्ञानं वृत्तिरूपत्वात्स्वरूपतोऽ-
तात्त्विकमपि सामर्थ्यात्सकलानर्थनिदानाद्यविद्याकर्मवासनादिकमशेषमपि निर्द-
हन्मोक्षहेतुर्भवति । नच स्वरूपतोऽतात्त्विकं तत्त्वमसीति वाक्यार्थज्ञानं कथं
स्वरूपतोऽतात्त्विकतया सजातीयाविद्यानिवर्तकमिति वाच्यम् - भवन्मतेऽपि
पर्यनुयोगेन साम्यात् -तथाहि -

स्वरूपतस्तात्त्विकमेव पदार्थतत्त्वज्ञानं कथं स्वरूपतस्तात्त्विकतया सजातीय
संसारकारणमिथ्याज्ञाननिवर्तकमिति - स्वरूपतस्तात्त्विकत्वाविशेषेऽपि मिथ्या-
ज्ञान तत्त्वज्ञानयोरयथार्थत्वयथार्थत्वभेदान्निवर्त्यनिवर्तकभावो नानुपपन्न इति-
चेत् - तर्ह्यस्मन्मतेऽपि समः समाधिः । स्वरूपतो तात्त्विकत्वाविशेषेऽप्यविद्या-
तत्त्वमसीति वाक्यार्थज्ञानयोरयथार्थत्वभेदान्निवर्त्यनिवर्तकभावोनानुपपन्न
इति ।

एतेनैतदप्यपास्तम्, यदवादि- अतात्त्विकस्य च कस्यचित् कर्मादेरपि
प्रकृत बन्धहेतुत्वादनिर्मोक्षप्राप्तौ मोक्षशास्त्राप्रामाण्यप्रसङ्ग इति ।
यथोक्तन्यायेनातात्त्विकस्यैव तत्त्वमसीति वाक्यार्थज्ञानस्य मोक्षहेतुत्वप्रति-
पादनात् ।

नच कर्मादेरप्येकान्ततो बन्धहेतुत्वमस्मदभिमतं, नित्यादिकर्मणां
परम्परया मोक्षहेतुत्वाभ्युपगमात् । तथाच श्रुतिः -

"तमेतं वेदानुवचनेन ब्राह्मणाविविदिषन्ति यज्ञेन दानेन तपसानाशकेने"[१]ति।
स्मृतिश्च -

मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः ।
नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहीर्षयेति ।।

"न कर्मणा न प्रजया न धनेने"त्यादि निषेधस्तु कर्मणां साक्षान्मोक्ष-
साधनत्वविषयः ।

मोक्षकारणं ज्ञानमेव

ननु 'तत्प्राप्तिहेतुर्ज्ञानं च कर्मचोक्तं महामुने' इत्यादिना कर्मणोऽपि ज्ञानवत्साक्षान्मोक्षहेतुत्वप्रतिपादनान्न कर्मणां साक्षान्मोक्षसाधनत्वविषयो न कर्मणेत्यादिनिषेधः किन्तु केवलानां तत्साधनत्वं नास्तीत्यर्थपर इतिचेत्, न- धर्मात्सुखंज्ञानञ्च, ज्ञानान्मोक्षोधिगम्यत इत्यादि स्मृतिभिः परम्परया कर्मणां मोक्षसाधनत्वावगमात् । 'नान्यः पन्था विद्यते यनाय' 'ज्ञानादेव तु कैवल्यम् प्राप्यते येन मुच्यते' इत्यादिना ज्ञानादन्यस्य साक्षान्मोक्षहेतोर्निषेधाच्च । तत्प्राप्तिहेतुर्ज्ञानञ्च कर्मेत्यादि स्मृतिः क्रमसमुच्चयपरत्वेनाप्युपपत्तेश्च । तस्मात्कर्मादेरपि परम्परया मोक्षहेतुत्वस्य स्थितत्वान्नैकान्ततो बन्धहेतुत्वमस्मदभिमतं येन तद्दृष्टान्तावष्टंभादतात्विकस्य, प्रत्युत बन्धहेतुत्वादनिर्मोक्षप्राप्तौ मोक्षशास्त्राप्रामाण्यप्रसङ्गइत्याशङ्क्येतेति सिद्धम् ।

मोक्षलक्षणम्

तदेवं तात्त्विकाद्वैताभ्युपगमे मोक्षसाधनासंभवप्रयुक्तमोक्षशास्त्राप्रामाण्यप्रसङ्गवारणाय मोक्षसाधनं तत्त्वमसी[२]तिवाक्यार्थज्ञानं निरूप्य मोक्ष-

---

१ बृ.उ. ४।४।२२ ।
२ छा.उ. ६।८।७ ।

लक्षणं निरूपयति - मोक्षस्त्वविद्यात्यय इति । अविद्या नाम विद्यानि-
वर्तनीयोभावरूपः पदार्थो नाज्ञानतमःशब्दापरपर्यायः । तथाचोक्तम्-

"अनादिभावरूपं यद्विज्ञानेन विलीयते ।
तदज्ञानमिति प्राज्ञा लक्षणं सम्प्रचक्षते[1] ।।" इति ।

तदस्तमयो मोक्ष इति लक्षणार्थः ।

यथोक्तलक्षणा वा विद्येति द्योतयति सा संसार उदाहृतेति । संसार-
श्चानादिभावत्वेऽसति ब्रह्मसाक्षात्कारलक्षणविज्ञाननिवर्त्यत्वाद्भवति
यथोक्तलक्षणं ततस्तद्रूपा विद्यापि तथेत्यर्थः ।

ननु संसारस्याविद्याकार्यत्वादविद्यायाश्च संसारकारणत्वात्कथं संसार
एवाविद्योदाहृतेति चेत् कार्यकारणभावादेवेति ब्रूमः । न खलु कार्यकारणयो-
र्भेदो वाऽभेदो वा निर्वक्तुं शक्यः, कार्यकारणभावोऽपि न भिन्नयोः किन्तु
तदेव वस्तु कथञ्चिदवस्थाभेदमापन्नं तथा नामभेदं प्रतिपद्यते सुवर्णमिव कुण्डला-
दिनामभेदम् । एवमविद्यैव शरीराद्यवस्थाभेदमापन्ना संसार इत्युदाह्रियते,
तस्मात्संसाररूपाविद्यास्तमयो मोक्ष इति मोक्षलक्षणार्थः सम्पद्यते । तथा-
चोक्तम् -

"अविद्यास्तमयो मोक्षः सा संसार उदाहृता[2]" इति ।

नन्वयमविद्यास्तमयो ब्रह्मस्वरूपो भिन्नो वा तत आद्ये तत्त्वमसीतिवा-
क्यार्थज्ञानसाध्यत्वं न स्यात्, ब्रह्मस्वरूपस्य सिद्धत्वात् । द्वितीये सद्रूपश्चेद-

---

१ त.प्र. अविद्यालक्षणम् ।

२ अ.सि. लघुचन्द्रिकायां वार्तिकादुद्धृतः, पृ.२ ।

क्तिव्याहतिः, अत्यन्तासद्रूपश्चेन्नराविषाणवत्सत्ताख्यापत्तिः । सदादिप्रकारा-प्रकारविलक्षणश्चेदविद्यातत्कार्यान्यतरत्वप्रसङ्गेन मोक्षेऽप्यविद्यानुवृत्तिरनि-ष्टा प्रसज्येत । अतो नाविद्यास्तमयो मोक्षः दोषदाम: सदसद्वादिनामिति, उच्यते - अविद्यास्तमयलक्षणो मोक्षः सदसदादिप्रकारविलक्षणत्वाभ्युपेयः प्रकारान्तरस्यासंभवात् । तथा चोक्तम् -

"सदादिभ्यश्च भिन्नोऽस्य प्रकारः परिशिष्यतः ।
तथायमुपपद्येत तथैव परिकल्प्यतामि" ति ॥

नत्वेवमप्यविद्यातत्कार्यान्यतरत्वप्रसङ्गेन मोक्षेऽप्यविद्यानुवृत्ति प्रसङ्गादिति शङ्कनीयम्, अविद्यातत्कार्यान्यतरत्वस्य निवर्त्यत्वोपाध्यधीनत्वात्। अविद्यास्त-मयस्य च निवर्तकासंभवान्निवर्त्यत्वाभावात्, ततः सदादिप्रकारविलक्षणत्वा-भ्युपगमेऽप्यविद्यास्तमयस्य मोक्षत्व इति सिद्धम् ।

एवं निरूपितमतमुपसंहरति इति गदितो वेदान्तवादः स्फुट इति ।

इति श्रीकविकविन्द्रश्रीजाणराजविरचितायां
कल्पलतिकायां वेदान्तमतसंग्रह
व्याख्या ।

कल्पलतिकाया उपसंहारः

इदानीमस्य षड्दर्शनीसङ्ग्रह-प्रकरणस्य प्रणेता शिष्टाचारपरम्पराप्राप्ताविशिष्टवंशप्रभवस्वनामकीर्तनमुखेन स्वकृतिमुपश्लोकयति -

आसीद्विष्णुमहीपतिः क्षितिपतिः प्रत्यग्र संग्रामभू-
भीमः श्रीमहिमानुभावसुभगो धन्यो वदान्योत्तमः ।
धीरस्तत्तनयो नयोचितगुणः श्रीजाणराजाभिधो
भूपालः कविकिरविन्दुमकरोत्षड्दर्शनीसङ्ग्रहम् ॥

॥१॥

स्पष्टोऽर्थः । अत्र च आसीद्विष्णुमहीपतिरित्यनेन श्रीजा[1]धामप्रतिसिद्धवंशवर्णनमुपलक्षयति, तथाहि-

श्रीमत्काश्यपगोत्रजः कृतधियामग्रेसरो माधुरः
श्रीकायस्थकुलप्रदीपमकुलीधामाभिधानो भवत् ।
येन श्रीमहिषासुरप्रमथनीं देवीं कुलाधीश्वरी-
माराध्य श्रियमुज्ज्वलां श्रुतवतां सेवाभिवार्जिताम् ॥

॥२॥

तस्याभूत्तनयः प्रसाधितनयः श्रीनीलकायस्ततो
देवानां 'द.' इति प्रसिद्धचरितश्रीभोजराजस्ततः ।
तस्मादाभट इत्यभूदयमहीपालस्ततोप्यूर्जितः
श्रीभूजः सम्भूतः कमलसी दोमन्धरस्तत्सुतः ॥

॥३॥

---

१ नामैकदेशग्रहणेन नामग्रहणमितिन्यायात् । जा.इत्यदारौ जाणराजबोधक इति यावत् । टि.

तस्यापि द्विजवर्यपूजनपरस्यासीदद्विजातिव्रजा-
निकाशीर्वचनाधिलब्धमहिमा प्राज्याधिराज्योदयः ।
श्रीविष्णुः श्रुतिवित् पवित्रचरितश्रेणीषु चूडामणिः
श्रीमद्विष्णुपदाब्जपूजनपरो धर्मैकधुर्यः सुतः ॥

॥४॥

तत्राप्यभूवन्नथ जाणराज श्रीभैरवीविष्णुरमी पवित्राः ।
पुत्रास्त्रयः शास्त्रविदः पुमर्था धर्मार्थकामा इव साधुवृत्तेः ॥

॥५॥

तत्र श्रीनिजवंशपावनगुणालङ्कारसंशोभिना
नानासाधुजनानुषङ्गरुचिना शास्त्राणि सर्वाण्यपि ।
आभासेन विना विशुद्धमतिना संभूय सारेक्षिणा
चक्रे भूपतिजाणराजकविना षड्दर्शनीसङ्ग्रहः ॥ इति.

॥ ६ ॥

नानागमापारगभीरसिन्धोराग्रहेण प्रकटीकृतासौ ।
जेजीयतां कल्पलताश्रितार्थसंप्रार्थनापूरकसत्फलाढ्या ॥

॥७॥

इति श्रीकविकविन्दु श्रीजाणराजविरचिता कल्पलतिका
समाप्ता

परिशिष्टम(१)

पारिभाषिकशब्दार्थविवरणम्

प्रास्ताविक

षट्प्रकरणी = प्रकरणं नाम एकार्थप्रतिपादकग्रन्थभागः यथा पदार्थप्रकरणम् ।तच्-छास्त्रसिद्धार्थनिरूपकग्रन्थस्यौपयोगित्वसत्वकृतनिष्कर्षत्वानुबन्धिविचारविस्तारो वा "शास्त्रार्थविषयावगतिप्रधानं संदीप्तः प्रकरणं कथ्यते" इति सर्वज्ञात्ममुनिवचनात्, यथा वा प्रकृतग्रन्थ एवात्रोदाहरणम् । एवं हि तथाविध-भागानां विस्ताराणां वा षण्णां सम्मेलनेन ग्रन्थोयं निष्पन्नः ।तथाच षण्णां प्रकरणानां समाहारः षट्प्रकरणी प्रकृतग्रन्थः । अत्र हि वैशेषिकादीनां षण्णां प्रकरणानां समावेशोस्ति ।

अभ्यर्हितम् = पूजायामर्हति धातुः प्रकर्षद्योतकश्चाभिशब्द इत्युक्तिं श्रेष्ठं पूजितं वाभ्यर्हितम् । दर्शनग्रन्थाध्येतॄणां दर्शनं किमिति ज्ञानं नोचितमात्रमपितूचिततम-मतस्तेषां तादृशं ज्ञानमपेक्षितमेव भवतीति ।

प्रयोजकता = योजकः प्रत्यासत्तिनियामकस्तस्यभावस्तत्ता, तत्र प्र उपसर्गः प्रकर्ष-द्योतकः । कार्यं कारणस्य प्रत्यासत्तिर्भवति, यथा- मुक्तेः साक्षात्कारणं ज्ञानं, करणं शास्त्रमिति तत् कारणतावच्छेदकान्तर्गतम् । एतदुभयं मुक्तावुपाय-भूतं [illegible]नेति तदुभयबोधापेक्षिणी प्रयोजकता । सा च जनकजनकतावच्छेदक-साधारणीत्यभिमतिः शास्त्रकृताम् , शास्त्रजन्यज्ञानस्य मुक्तिप्रयोजकत्वाङ्गीका-रादिति ।

अन्वर्थत्वम् = उचितानुपूर्वीघटितपदश्रवणसमनन्तरमेव तादृश पदशक्तिमदर्थस्य बुद्धावारोहः स अन्वर्थस्तस्यभावस्तत्त्वम्, अनुपदसामर्थ्यात्तथार्थप्रतीतिः ।अनुप-दमन्वात्रोत्तरकालाभिधायि यथा- घट इत्युक्ते कम्बुग्रीवादिमदर्थो बुद्धिमारोहति, शब्दस्यार्थप्रत्यायकता निष्प्रत्यूहैव, वाच्योऽर्थो वाचकश्च शब्द इत्यापामरप्रसि-द्धेरिति ।

अपार्थः = अर्थशब्दविवरणं पूर्ववत्, अत्रोपसर्गः अप इति, तस्यार्थश्चात्र वियोगश्चौर्यं वा, एवञ्चार्थसम्बन्धरहितो नष्टार्थो वा अपार्थः, स्त्रियामपार्थेति ।

समवायिकारणम् = कार्यनियतपूर्ववृत्तिकारणम्, तत्र विशेषणं समवायित्वम्, तच्च समवायसम्बन्धेन वृत्तित्वम्, यथा- पटः समवायेन तन्तुषु वर्तते, तन्तवश्च पटपूर्ववृत्तित्ववन्त इति तन्तवः पटस्य समवायिकारणमिति न्यायवैशेषिकसमयः । मतान्तरे तु समवायिकारणमुपादानपरम् ।

उपाधिः = समीप आधिः, उपपन्न आधिर्वा उपाधिः । प्रयोगो यथा-

१) एक एव वायुर्मुखादिनिर्गमनप्रवेशादिनिमित्तभेदात् प्राणापानादिसंज्ञां लभत इति निमित्तमुपाधिः । वस्तुतः 'प्राण' इति नाम निमित्तरूपोपाधिद्योतकमतोऽन्वर्थम् । "एष उ एव प्राणः । एष हीमाः सर्वाः प्रजाः प्रणयति तस्येति प्राणः" इति श्रुतिरिति ।

२) धर्ममात्रमप्युपाधिः, तत्र प्रकारद्वयम् - जातितदितरभेदात् । यथा वैशेषिकसमये द्रव्याणां नवसंख्यात्वेऽपि तद्विभाजकोधर्म एक एव, तेन हि द्रव्यत्वरूपधर्मस्य नवद्रव्यवृत्तित्वे ज्ञात एव तेषां द्रव्यत्वं जातिरूपोपाधिरिति निर्णीतो । तदितरोपाधिः पुनर्द्विविधः सखण्डाखण्डभेदात् । तत्र सखण्डः स्वरूपतो ज्ञानप्रकारीभूताभिन्न आकाशत्वादिः । अखण्डस्तु स्वरूपतः प्रकारीभूतः प्रमेयत्वकुण्डलित्वादिः । जात्यखण्डोपाध्यतिरिक्तस्यापि स्वरूपतोभानमभ्युपेत्येदम् । बहुपदार्थघटितस्य सामान्यरूपस्य सखण्डोपाधित्वे तूपदर्शितोदाहरणानां सखण्डत्वमेव । अखण्डत्वमप्यत्र नानिर्वचनीयत्वमपितु तदतिरिक्तं पारिभाषिकमेवेत्युपदर्शितम् । चर्चितोऽयं विषयः सामान्यलक्षणाग्रन्थेऽन्यत्र च निबन्धग्रन्थेष्विति ।

३) उपधेयभूते एकस्मिन्पुरुषे, पाचकधावकपाठकत्वादीनां सामानाधिकरण्येऽप्युपाधिभूतानां पाचकत्वादीनान्तत्रासाङ्कर्यमुपपन्नं भवत्येवेति सोयं वृत्तिमदुपाधिः ।

४) स्वरूपमप्युपाधिः क्वचिद्भवति, स तु स्पष्ट एव ।

५) लोहितः स्फटिक इत्यत्र स्फटिके लौहित्याभावेऽपि समीपतरवर्तिदाडिमीकुसुमसान्निध्यात्तत्र तथा प्रतीतिरिति तस्या विषयविशेषजन्योपाधिनिबन्धनत्वमिति ।

६) वेदान्तमते आवरणविक्षेपनामकमस्ति शक्तिद्वयमज्ञानस्य तेन हि बुद्धिपिधानंसृष्टिश्च भवतः । इच्छा च 'एकोऽहं बहु स्याम्' इतीश्वरस्य बहुभवनेच्छा, अतः शक्तिरिच्छे उपाधिरिति ते । एतयोर्विस्तृतं विवरणं वेदान्तग्रन्थेषु ।

७) पर्वतो धूमवान् वह्नेरित्यादौ वह्नेर्हेतुत्वभ्रम उपाध्यज्ञानात्, उपाधिश्चात्राऽऽर्द्रेन्धनसंयोगः, तस्य हेतुव्यापकत्वाभावादुपाधित्वम्, तेन हि परम्परयानुमितिः प्रतिबध्यते, हेत्वाभासप्रयोजकीभूतधर्मत्वात्तस्य शिष्टं हेत्वाभासत्वविवृतौ, विशेषो न्यायवैशेषिकग्रन्थेषु । व्यभिचारोत्थापकतया उपाधेर्दूषकत्वमतएव 'उपाधिर्हि चिन्तायां कुटुम्बव्यापृत एव' इत्यभिधानाच्चलार्थकत्वन्तस्य वस्तुतोऽनुक्तं भवतीति ।

अनुयोगित्वम् = अनुयोगित्वं स्वरूपसम्बन्धविशेष अखण्डोपाधिर्वा । 'घटवद्भूतलम्' इत्यादौ घटनिष्ठप्रतियोगित्वनिरूपितमनुयोगित्वं भूतले । 'घटो नास्ती'ति प्रतीतिविषयाभावे घटनिष्ठप्रतियोगित्वनिरूपितमनुयोगित्वमिति तद्भावाभावसाधारणमिति ।

प्रतियोगित्वम् = अनुयोगित्वनिरूपणेन निरूपितप्रायम्, यथा-

१) विरोधित्वम् - तेजस्तिमिरयोः सहानवस्थानरूपो विरोधः, बध्यघातक-सहानवस्थानभेदेन विरोधविस्तारो वैशेषिके मीमांसायाञ्च प्रसिद्धः।

२) विच्छित्त्वम् - 'चन्द्रसदृशं मुखम्' इत्यत्र चन्द्रस्य सादृश्यप्रतियोगित्वम्।

३) अन्वयित्वम् - स्वरूपसम्बन्धविशेषो यथा 'घटवद्भूतलम्' इत्यत्र संयोग-सम्बन्धस्य प्रतियोगित्वं घटे भूतलेचानुयोगित्वम्, स्ववशानियतसत्ताव-त्त्वमिति निष्कर्षः ।

४) निरूपकत्वम् - निष्कर्षरूपधात्वर्थो ज्ञानानुकूलव्यापारस्तस्यैव सम्बन्ध-विधया ज्ञानोत्पादकत्वमिति प्रायशो निरूपितम् ।

५) स्वाश्रयसंयुक्तत्वम् - यथा 'चैत्रो जीवनमरणान्यतरप्रतियोगी प्राणित्वा-न्मद्वत्' इत्यत्र जीवनस्यमरणस्य वा प्रतियोगित्वं चैत्रादितः स्वपदं चैत्रादिशरीरावच्छिन्नात्मपरम् । प्रसिद्धिमनुसृता प्रदर्शिता स्तेऽर्थाः, नत्वर्थान्तरनिरासायातः सन्दर्भानुकूलार्थचिन्तायां विदुषां स्वात-न्त्र्यमिति ।

अन्वयः = यत्सत्त्वेयत्सत्त्वम्, यथा कुलालकृतिसत्त्वे घटसत्ता । यद्वा कार्येषु कारणत्वेनानुवृत्तिः यदा कार्याणि जायन्ते तदोपादानतयश्वरस्य सर्वत्रानुवृत्तिः, यथा जाग्रदाद्यवस्थासु ततत्साक्षितया, अधिष्ठानाकाशादिषु सद्रूपेण, कुण्डलादिषु च स्वर्णतयाऽभिव्यक्तिः । यद्वा अनुवृत्तत्वमन्वयः, तन्निरूपणे व्यक्तीभविष्यति ।

शाब्दबोधीयसंसर्गताख्यविषयतावांश्च, स द्विविधो भेदान्वयाभेदान्वय-भेदात् । तत्र प्रथमो 'राज्ञः पुरुषः' इत्यत्र राजपुरुषयोः । द्वितीयस्तु 'नीलोघटः' इत्यादौ नीलघटयोः । बोधोऽयं शब्दानुमानवेत्यन्यदेतत्, प्रमाण-द्वयवादिनामनुमानमन्येषां शब्द इति तत्तदाकरेषु स्फुटमिति ।

व्यतिरेकः - यथा -

१) अभावो यथा 'अन्वयेन व्यतिरेकेण च व्याप्तम्' इत्यत्र व्यतिरेको-ऽभावः ।

२) साध्यहेत्वोरभावसाहचर्यम् - सामानाधिकरण्यनिरूपणेन निरूपितप्रायम्, उदाहरणञ्च व्यतिरेकव्याप्तिरिति ।

३) व्यतिरेकव्याप्तिर्यथा - 'अन्वयव्यतिरेकि लिङ्गम्' इत्यत्र व्यतिरेकत्वं व्यतिरेकव्याप्तिबोधकम् ।

४) कार्यकारणभावयोः साहचर्यम् - तद्धि यदभावे यदभावो यथा दण्डकपा-लाभावे घटाभाव इति ।

५) अत्यन्ताभावप्रतियोगित्वम् - यथा 'घटव्यतिरेकः' इत्यत्र व्यतिरेकत्वं घटाभावस्य बोधकम् ।

६) व्यावृत्तत्वम् - तन्निरूपणे स्फुटीभविष्यति ।

७) 'वैश्येभ्यः क्षत्रियाः शूराः' इत्यत्र पञ्चम्यर्थो व्यतिरेकः ।

प्रकारान्तरे तु - यदा ऽविकृतः परमात्मा कारणरूपेण वर्तते तदा कार्याणामभावात्मको व्यतिरेकः । यथा- अकार्येण खपुष्पादिना सद्रूपत्वस्य, अविकृतसुवर्णादौ च कुण्डलत्वादेर्व्यतिरेक इति यथायथमूह्यम् । अन्यत्र सजातीयाधिक्यविनात्वाथालङ्कारविशेषणातिक्रमा अप्यर्था भवन्तीत्यालङ्कारिकाणामभिनिवेश इति तत्तदर्थजिज्ञासुभिस्तत्र तत्रान्वेष्टव्यमिति ।

अवच्छिन्नत्वम् = यथा हि -

१) व्यापकत्वम् - यद्विषयकत्वावच्छिन्नज्ञानस्यानुमितिप्रतिबन्धकत्वमित्यत्रावच्छिन्नत्वं व्यापकत्वम् - यथा 'ह्रदो वह्निमान्' इति बुद्धिं प्रति वह्न्यभाववद्ध्रदस्य व्यापकविषयकत्वेन प्रतिबन्धत्वम् ।

२) सामानाधिकरण्यम् - वह्निव्याप्यधूमवान् पर्वत इति पदाविशेष्यताशालिज्ञानं व्याप्तिप्रकारतावच्छिन्नं हेतुप्रकारतावच्छिन्न चेत्यत्रावच्छिन्नत्वं सामानाधिकरण्यार्थकम् । समानाधिकरणविषयतयोर्भेदो ऽभेदो वेति शास्त्रार्थो नव्यन्यायपरिष्कारेण ।

३) स्वरूपसम्बन्धविशेष - अग्रावच्छिन्नो वृक्षः कपिसंयोगीत्यत्र कपिसंयोगस्याग्रावच्छिन्नत्वं स्वरूपसम्बन्धविशेषः ।

४) विशिष्टत्वम् - प्रतियोगित्वानुयोगित्वनिरूपणेन निरूपितम् ।

५) साहित्यम् - शरीरावच्छिन्नात्मनि भोग इत्यत्रावच्छिन्नत्वं साहित्यम् ।

६) अनुकूलत्वं प्रयोजकत्वं वा - 'फलावच्छिन्नव्यापारो धात्वर्थः' इत्यत्रावच्छिन्नत्वस्यानुकूलत्वं प्रयोजकत्वं वार्थः । निरूपितं प्रयोजकत्वम् ।

७) सम्बन्धः - शाब्दिकसङ्केतः ।

८) इयत्ताकरणम् - 'द्रोणावच्छिन्नो व्रीहि' रित्यत्रावच्छिन्नमियत्ताकरणम् ।

९) सीमाकरणम् - 'कर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम्' इत्यत्रावच्छिन्नपदं सीमाबोधकम् ।

वस्तुतोऽवच्छेदकतानिरूपकतात्वमेवावच्छिन्नत्वम्, पठितृणां बुद्धिवैशद्यायैवमिथा निरूपणमिति ।

द्वारम् = व्यापारः, स च तज्जन्यत्वेसति तज्जन्यजनकः, यथा विषयेन्द्रियसंयोगः प्रत्यक्षं प्रति व्यापारः । अत्र तत्पदमिन्द्रियपरम् । एवमन्यत्रापि यथायथमूह्यम् ।

अन्यथासिद्धः = कारणत्वं समवायिकारणघटकतन्निर्वचनवत् तत्सहभूतमन्यथासिद्धम्, यथा घटं प्रत्याकाशः । नव्यास्तु लघुनियतपूर्ववर्तिनं एव कार्यसंभवे तत्सहभूतमन्यथासिद्धम । तत् त्रिविधं- शरीरकृतम्, उपस्थितिकृतम्, सम्बन्धकृतञ्च । एतस्य विवरणं न्यायग्रन्थेषु स्फुटम् ।

हेत्वाभासः = हेतोराभासा हेत्वाभासा इति षष्ठीतत्पुरुषसमासाश्रयणे हेतुनिष्ठदोषाभिधायी, हेतुवदाभासन्त इत्युपमितसमासाश्रयणे तु दुष्टहेतुपरः । हेतुर्द्विविधः सद्धेतुरसद्धेतुश्च, व्याप्तिपक्षधर्मताविशिष्ट आद्यः । द्वितीयस्तु व्याप्तिपक्षधर्मत्वाभाववान्, स एव दुष्टहेतुरित्युच्यते ।

प्रवृत्तिनिमित्तम् = प्रवृत्तौ यत्नविशेषे निमित्तं हेतुरित्यर्थः । तच्च वाच्यत्वेसति वाच्यवृत्तित्वेसति वाच्योपस्थितिप्रकारत्वम् । यथा गोत्वं गोरूपार्थस्य प्रवृत्ति-निमित्तम् ।

अध्यासः = स्मृतिरूपः परत्रपूर्वदृष्टावभास अवभास मात्रं वा । भ्रमात्मकं ज्ञानमिति यावत्, यथा शुक्तौ रजतमिति ज्ञानम् । वेदान्तग्रन्थेषु चर्चितोऽयं विषयो बाहुल्येनेति ।

उपजीव्यत्वम् = कारणत्वं प्रयोजकत्वं वा । समवायिकारण प्रयोजकत्वयोर्विवृत्तौ विवृतमुभयमेवेति ।

प्रकारता = विषयता सा च विशेषणत्वापरनामा विलक्षणविशेषः । यथा- 'अयं घट.' इति ज्ञाने विशेषणस्य घटत्वादेर्विशेषणत्वापरनामाविष-यताविशेष इति ।

आश्रयता = अधिकरणमिति प्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेषः । 'घटवद्-भूतलम्' इत्यादौ घटनिष्ठ आधेयतानिरूपिता आश्रयता भूतलस्येति ।

कल्पलतिकायाम्

----ooo----

स्वोपज्ञता = जानातीति ज्ञः, सोऽर्थो धात्वर्थानुगमाद् 'ज्ञोब्रह्मबुधविद्वत्सु' इति कोषाच्च सिध्यति । ज्ञानं विषयसापेक्षं, निर्विषयस्य ज्ञानत्वेपि तत्र प्रवृत्त्यनुपपत्तिः । 'अर्थेनैव विशेषो हि निराकारतया धियाम्' इति प्रवादात्, अतः सविषयकज्ञानवानात्मा ज्ञः, मतान्तरेत्वन्तः करणम् । स एवुपोपसर्ग-विशेषितः, तदर्थं सामर्थ्यदादिप्ये

∴ उपः सामर्थ्यदादाप्यदोषाख्यानात्ययेषु च ।
आचार्यकरणेदाने व्याप्तावारम्भपूजयोः ॥
तद्योगेऽपि च वीप्सायां भणार्थेपमार्थयोः ।
उपो हीनेऽधिके प्रोक्तोऽप्यासन्नेऽप्युपकीर्तितः ॥ ∴

इति विश्वप्रकाशकोषस्तत्र प्रमाणम् । अत उद्दिष्टः सः सामर्थ्यदाढ्याप्य-विशिष्ट इति तयोरंशसामानाधिकरण्यं सिद्धम् । इदमुपलक्षणम् - अर्थान्तराणां सामानाधिकरण्यं संभवाभिप्रायं यथायथं योज्यम् । दर्शितदिशा स्वः शब्द आत्मबोधक इति पुनरात्मबोधनवैयर्थ्यादत्र स्वशब्द आत्मीयबोधकोऽप्युपेयः । एवं ह्यात्मनः कृतिभूतः षड्दर्शनीसङ्ग्रहस्तस्य या टीका कल्पलतिकाभिधा स्वोपज्ञितटीकाविशेषणम्, सा = उक्तार्थाभिर्ता स्वयं ग्रन्थकर्त्रैव परिष्कारविधिना ग्रथितेति यावत् । भावितलू स्त्रीत्वञ्चेति ।

उपबृंहितत्त्वम् = बृद्धिकर्मा हि बृंहतिधातुरतिशायने वर्तते, तदिदमतिशायनं नानवच्छिन्नं तथात्वन्तु नान्यत्र ब्रह्मणः । अतस्तत् सावच्छिन्नमभिप्रेतम्, बृहत् कुम्भ इतिवत् । अतिशायनमत्र प्रकर्षेनिगूढार्थप्रकाशरूपोयथाविविचितोपार्थसारतः । एवं ह्यत्र तद्दर्शने सूत्रस्थानीयान् श्लोकान् आदौ संग्रथ्य तेषां पुनस्तदाकरानुसारिसिद्धान्ताभिव्यञ्जकरूपमुपवृंहणं टीकाङ्गेण कृतम्, सतितथात्वस्व पाठकानां सौविध्यमित्याकल्प्योपबृंहितः षड्दर्शनीसङ्ग्रहः भावे त्वप्रत्ययः क्लीवताचेति ।

आत्माश्रयः = स्वस्याव्यवहितस्वापेक्षारूपस्तर्कदोषः । यथा प्रमेयत्वं नाम कश्चिद्धर्मो घटादिवृत्तिः सः स्वात्मनि वर्तते स्वस्यापि प्रमेयत्वमित्यात्माश्रयः । उत्पत्तिस्थितिज्ञप्तिद्वारास्त्रिविधः, क्रमेणोदाहरणम् -

१) यद्ययं घट स्तद्घटजन्यः स्यात्तदैतद्घटानधिकरणदाणीत्तरवर्ती न स्यात् ।

२) यद्ययं घट स्तद्घटवृत्तिः स्यादेतद्घटव्याप्यी न स्यात् ।

३) यद्ययं घट स्तद्घटज्ञानाभिन्नः स्याज्ज्ञानसामग्रीजन्यः स्यादित्यादीति ।

व्यावृत्तत्वम् = यथोदाहरणम् -

१) अवृत्तित्वम् - यथा 'यस्त्वस्मादृव्यावृत्त' इत्यत्र व्यावृत्तत्वमवृत्तित्वबोधकम् ।

२) विरोधी यथा - 'अश्वत्वव्यावृत्तं गोत्त्वम्' इत्यत्र व्यावृत्तत्वं विरोधपर्यवसन्नम् ।

३) अन्योन्याभावात्यन्ताभावयोः प्रतियोगित्वम् - यथा 'नराणां दात्रियः शूर' इत्यत्र निर्धारणाविभक्त्यर्थो व्यावृत्तम् । शिष्टं व्यतिरिक्तत्व निरूपणे ।

४) इतरभेदानुमिति विशेष्यम् - यथा 'विशिणः स्वतस्व व्यावृत्तः' इत्यत्र विशिणस्येतरभेदानुमितिविशेष्यत्वम्, व्यावृत्तत्वादेवेति ।

विशिष्टम् = विशिणवद्विशेष्यम्, यथा 'घट' इत्युक्ते घटत्वविशिणविशिष्टस्य घटस्य बोधः सप्रकारकस्यैव ज्ञानस्य विशिणविशिणत्वात् । निष्प्रकारकेतु ज्ञाने विशेष्यमात्रमवभासते न्यायनये, निष्प्रकारकस्याप्यनुभवविषयत्वन्तु वेदान्तस्य बौद्धस्यचाभिमतमिति तत्र तत्रान्वेष्टव्यमिति ।

कैवल्यम् = केवलस्य भावः कैवल्यम् = मुक्तिः सा च मतभेदेन भिन्नरूपा, यथा वैशेषिकमते(ऽशेषविशेषगुणध्वंसी वेदान्तमते च स्वस्वरूपाभिव्यक्तिरित्येवं दर्शनान्तराभिमतमुक्तिनिरूपणं तत्तद्दर्शनसिद्धान्तेन निर्वाह्यं भवतीत्याकरग्रन्थानुसारिपन्थाः शरणीकरणीयः ।

तौतातितः = 'तु तात ' इति कुमारस्वामिन एव नामान्तरम्, तथाप्रथेति प्राचीनाप्रथा, तुतातेन व्याख्यातं दर्शनं तौतातितं दर्शनम् । 'तौतातितमततिलकम् ' इति भाट्टमतानुसारिग्रन्थ इमां प्रथां [illegible] ।अतस्तौतातितस्तौतातितो वा भट्टकुमारिलस्यैवाभिधानम् ।दृश्यते हि प्रबोधचन्द्रोदयनाटके ''तौतातितं दर्शनम् ' इति ।

अनवस्था = तर्कदोषः, सचानन्तपदार्थकल्पनाविश्रान्त्यभावः । यथा-सत्ताया जातित्वेन द्रव्यवृत्तित्वाङ्गीकारवत्तत्रापि जात्यन्तराङ्गीकारः कुतो न संभवतीत्यापादनम्, तच्च न संभवति प्रमाणाभावादिति ।

व्यञ्जकम् = ज्ञानजनकम्, निगूढभावस्य बहिर्निस्सारणमिति यावत् ।

अनुवृत्त्वम् = सामानाधिकरण्यं यथाविवेचितमधस्तात्, व्याप्तिर्वा सापि सामानाधिकरण्यरूपा व्यापकत्वघटितैव । व्यापकत्वन्तु तद्वन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्त्वम्, यथा 'वह्निमान् धूमादि 'त्यादौ धूमवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वं वह्नित्वस्येति तदवच्छिन्नस्य वह्नेर्धूमानुवृत्तत्वम् । 'धूमवान् वह्ने 'रित्यादे तु वह्निमन्निष्ठात्यन्ताभावप्रतियोगितावच्छेदकमेव धूमत्वमिति तदवच्छिन्नस्य धूमस्य न वह्न्यनुवृत्तत्वमितीत्या(ऽनुवृत्तत्वमननुवृत्तत्वञ्चोह्यमिति संक्षेपः ।

---ooo---

परिशिष्टम् (२)

कारिकात्मकारावनुक्रमणिका

प्रकरणम्	प्रतीकम्	पृष्ठम्
भाट्ट.	अज्ञातप्रमितिः	७५
वेदान्त.	अथपरमरहस्यम्	११६
वैशेषिक.	अप्तेजी	२२
भाट्ट.	आत्मज्ञानफलम्	८३
वेदान्त.	इदमिह कथनीयम्	१२४
वेदान्त.	इत्याद्युक्तिः	१२७
वैशेषि.	एकानेकात्मन्	३७
वैशेषि.	गन्धस्तु	३५
वेदान्त.	जननविलय	११८
न्याय.	जातिः साम्यकीः	६५
वेदान्त.	जीवास्तावत्	१२८
वैशेषिक.	तत्राद्यं परम	६
न्याय.	तर्कोऽनिष्ट	५८
वैशेषिक.	द्रव्यंचाथ	८
वैशेषिक.	दुःखं नैकम्	४२
वैशेषिक.	धर्माधर्मौ वा	२४
वेदान्त.	ननु कथय	१२४
वेदान्त.	ननु यदि	१२६
साङ्ख्य.	नासौ तु प्रकृतिः	१०७
प्राभाकर.	नित्यः सौख्यथ	८६
भाट्ट.	नित्याः सर्वगताः	८५
वैशेषिक.	पृथ्व्यापी	१४
न्याय.	प्रत्ती न्यायमतम्	५२

साङ्ख्य.	क्रमः सांख्यमि	१०७
भाट्ट.	भाट्टैस्तत्त्वम्	७१
प्राभाकर.	यन्मानान्तरगोचरः	६६
वैशेषिक.	रूपरज्वापि	२४
प्राभाकर.	व्यावृत्तात्मकम्	६६
वैशेषिक.	श्रीशम्भुम्	१
वैशेषिक.	स्यादिकः समवायः	४६
भाट्ट.	स्याद्धर्मे विधिः	८६
वैशेषिक.	स्याद्धर्मोपि	४५
साङ्ख्य.	स्यान्मूलप्रकृतिः	१०७

इति

---oooooo---

परिशिष्टम् (३)

सन्दर्भग्रन्थविवरणम्

------०००-------

१- वैशेषिकसूत्रोपस्कारः - चौखम्बा वाराणसी १९६९ ई. ।

२- पदार्थधर्मसङ्ग्रहः (वैशेषिकभाष्यम्) - चौखम्बा वाराणसी १९२४-३० ई. ।

३- पदार्थधर्मसंग्रहस्य व्योमवतीटीका - चौखम्बा वाराणसी १९२४-३० ई. ।

४- किरणावली - संस्कृतविश्वविद्यालय, वाराणसी ।

५- कारिकावली-मुक्तावली दिनकरीरामरुद्रीसहिता - चौखम्बा १९५१ ई. ।

६- तर्कसंग्रह दीपिका - कृष्णवल्लभाचार्य स्वामिनारायण १९३४ ई. ।

७- तर्कसंग्रह न्यायबोधिनी - निर्णयसागर १९२५ ई. ।

८- तर्कसंग्रह पदकृत्यम् - निर्णयसागर १९२५ई. ।

९- तर्कसंग्रहमूलम् - निर्णयसागर १९२५ ई. ।

१०- न्यायलीलावती - चौखम्बा वाराणसी ।

११- वैशेषिकदर्शन एक अध्ययन (हिन्दी) नारायणमिश्र

१२- न्यायसूत्रम् - चौखम्बा वाराणसी १९४२ ई. ।

१३- न्यायभाष्यम् - चौखम्बा वाराणसी १९४२ ई. ।

१४- न्यायवार्तिकम्

१५- न्यायवार्तिकतात्पर्यटीका - चौखम्बा वाराणसी १९२५ ई. ।

१६- सामान्यनिरुक्तिगादाधरी - चौखम्बा वाराणसी १९३८ ई. ।

१७- व्युत्पत्तिवादः - चौखम्बा वाराणसी १९८८ वि. सं. ।

१८- न्यायमञ्जरी - चौखम्बा वाराणसी १९७१ ई. ।

२०- कुसुमाञ्जलिप्रकाशः - चौखम्बा २०१३ वि.सं. ।

२१- मीमांसासूत्रम् - लालबहादुर सं. वि. पीठम् ।

२२- मीमांसाभाष्यम् - आनन्दाश्रम पूना १९७६-८५ ई. ।

२३- कुतूहलवृत्तिः - लालबहादुर सं. वि. पीठम् ।

२४- श्लोकवार्तिकम् - रत्नपब्लिकेशन वाराणसी ।

२५- तन्त्रवार्तिकम् - आनन्दाश्रम, पूना १९७६-८५ ई. ।

२६- अर्थसंग्रहः - चौखम्बा वाराणसी १९५३ ई. ।

२७- मीमांसापरिभाषा - चौखम्बा वाराणसी १९४१ ई. ।

२८- तैत्तिरीयसंहिता - आनन्दाश्रम, पूना १९७८ ई. ।

२९- मीमांसान्यायप्रकाशः - चौखम्बा सं.संस्थान १९८१ ई. ।

३०- मानमेयोदयः

३१- ऋग्वेदसंहितासायणभाष्यम् - चौखम्बा १९६६ ई. ।

३२- निरुक्तः

३३- योगसूत्रंभोजवृत्तिसहितम् - भारतीयविद्याप्रकाशन वाराणसी १९६३ ई. ।

३४- सांख्यकारिकातत्त्व-कौमुदीसहिता - स्वामि आत्मास्वरूपोदासीन हरिद्वार १९८७ सं. ।

३५- अद्वैतसिद्धिः - निर्णयसागर १९३७ ई. ।

३६- लघुचन्द्रिका - निर्णयसागर १९३७ ई. ।

३७- तैत्तिरीयोपनिषद्-शाङ्करभाष्ययुता - महेशानुसन्धान, वाराणसी १९७९ ई. ।

३८- तत्त्वप्रदीपिका - उदासीन सं. वि. काशी १९५६ ई. ।

३९- वेदान्तपरिभाषा - शास्त्र प्र. मन्दिरम् नर्मदापुरम् १९६७ ई. ।

४०- ब्रह्मसूत्रं शाङ्करभाष्यसहितम् - मोतीलाल, वाराणसी १९८० ई. ।

४१- बृहदारण्यकोपनिषत् - वाणीविलास काशी २०११ वि.सं. ।

४२- न्यायनिर्णयः - मोतीलाल वाराणसी १९८० ई. ।
४३- शिवमहिम्नः स्तोत्रस्य मधुसूदनीटीका - निर्णयसागर ।
४४- विवरणप्रमेयसंग्रहः - अच्युतग्रन्थमाला काशी सं. १९९६।
४५- मनुस्मृतिः - निर्णयसागर १९४६ ई. ।
४६- याज्ञवल्क्यस्मृतिः - निर्णयसागर १९३६ ई. ।
४७- तैत्तिरीयारण्यम् - आनन्दाश्रमः १९७८ ई. ।
४८- अवयवप्रकरणम् - लोकप्रकाशन, वाराणसी १९६४ ई. ।
४९- अष्टाध्यायी
५०- भामती - कृष्णराज अकादमी वाराणसी १९८२ ई. ।
५१- कठोपनिषत् - मोतीलाल वाराणसी १९८० ई. ।
५२- बृहदारण्यकोपनिषद्भाष्यवार्तिकम् - महेशानुसन्धान वाराणसी १९८२-९० ई. ।
५३- छान्दोग्योपनिषत् - मोतीलाल वाराणसी १९८० ई. ।
५४- संक्षेप शारीरकम् - चौखम्बा वाराणसी १९१३ ई. ।
५५- मुण्डकोपनिषत् - मोतीलाल वाराणसी १९८० ई. ।
५६- पदार्थप्रकरणम् - चौखम्बा वाराणसी १९३५ ई. ।
५७- वेदस्वरूपविमर्शः - भक्तिसुधासाहित्यपरिषद् कलकत्ता २०२६ वि.सं. ।
५८- शास्त्रदीपिका - निर्णयसागर ।
५९- शुक्लयजुःसंहिता - मोतीलाल वाराणसी १९७८ ई. ।
६०- श्वेताश्वतरोपनिषत् - गीताप्रेस गोरखपुर सं. २०२७ ।
६१- ब्रह्मबिन्दूपनिषत् - मोतीलाल वाराणसी १९८० ई.
६२- न्यायकन्दली - संस्कृतविश्वविद्यालय वाराणसी ।

६३- न्यायकोशः - भण्डारकररिसर्च इन्स्टिच्यूट पूना
१६७८ ई. ।

६४- सामान्यलक्षणाजागदीशी - दक्षिणामूर्तिमठ, वाराणसी २००६
वि.सं.

६५- प्रबोधचन्द्रोदयनाटकम् - निर्णयसागर १६३७ ई. ।

६६- शतपथब्राह्मणम् - अच्युतग्रन्थमाला काशी सं. १६६७ ई. ।

६७- अमरकोषः - व्याख्यासुधाव्याख्योपेतः
चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
१६८४ ई. ।

६८- श्रीमद्भागवतम्, श्रीधरी- - चौखम्बा संस्कृत प्रतिष्ठान दिल्ली
सहितम् १६८७ ई. ।

६९- संदीपशारीरकम् - चौखम्बा वाराणसी १६९२ ई. ।

---000---